अश् 9 P; भक्ष् 10, भुज् 7 A, घस् 1 P, ग्रस् 2 P, आस्वाद् 1 A, गृ 6 P, चर्व् 1 P, अभ्यवह् 1 P, प्रत्यवसो 4 P; 'e. one's own words' स्ववचनमसत्यं-अवितथं-कृ 8 U, स्ववचनेन विसंवद् 1 P; 'e., drink and be merry' अश्नीतपिबता, खादतमोदता. -ABLE, *s.* भक्ष्यं, भोज्यं, अभ्यवहार्यं, खाद्यं, भोज्यवस्तु-द्रव्यं. -ER, *s.* खादकः, भक्षकः, भोक्तृ *m.*, आशिन् *m.*, अश्न-भुज् in comp.; अद्-भद् in comp.; 'flesh-e.s' मांसाशिनः, पिशिताशनाः; 'dead-body-e.' कुणपभुज्; क्रव्याद्, मांसादः, &c. -ING, *s.* भक्षणं, खादनं, अशनं, आस्वादनं, भोजनं, &c.; 'e. together' सहभोजनं, जग्धि *f.*; 'e.-house' सिद्धान्नविक्रयशाला.

EAVES, *s.* पटलप्रांतः, वलीकः-कं, नीध्रं, बल(ड)भि-भी *f.*; 'e.-dropper' निभृतश्रवणेच्छुः, प्रच्छन्नश्रावित् *m.*

EBB, *s.* क्षीयमाणा वेला, वेलापरिवर्तनं-परावर्तः, परा वेला. 2 (fig.) क्षयः, हानि *f.*, अपचयः, व्यसनं, नाशः, परिवर्तः; 'e. and flow' व्यसनोदयौ. -*v. i.* (in pass.), ह्रासं-लयं-गम् 1 P; (वेलावत्) परावृत् 1 A; *See* DECAY.

EBONY, *s.* कोविदारः, चमरिकः, कुद्दालः, युगपत्रकः.

EBRIETY, *s.* मदः, मत्तता, उन्मादः.

EBRIOSITY, *s.* उन्मादशालिता, क्षीवता.

EBULLITION, *s.* उत्सेचनं, उत्सेकः; उद्रेकः, फेनायितं, फेनोद्गमः. 2 अंतःक्षोभः, अंतर्वेगः, चित्तवैक्लव्य-व्याकुलता, अंतस्तापः.

ECCENTRIC, *a.* सामान्येतर, विषम, विलक्षण, लोकबाह्य, लोकाचारविरुद्ध, विपथगामिन्, व्यभिचारिन्, उत्क्रांतमर्याद, उत्सूत्र. 2 केंद्रभ्रष्ट-च्युत. -ITY, *s.* वैषम्यं, उत्सूत्रता, वैलक्षण्यं, सामान्यविरोधः, लोकाचार-व्यवहार-विरोधः.

ECCLESIASTIC, *s.* पुरोहितः, आचार्यः, धर्माध्यापकः. -*a.*,-AL, *a.* धर्मोपदेशविषय, पौरोहित्यसंबंधिन्.

ECHO, *s.* प्रतिशब्दः-ध्वनिः-स्वनः-रवः-नादः-वचनं-गर्जनं, अनुरसितं-नादः, प्रतिश्रुत्-नि *f.* -*v. i.* प्रतिस्वन्-ध्वन-रस्-नद्-स्तन् 1 P, प्रति-रु 2 P, अनुनद्-रस, कृ 8 U with (*s.*). -*v. t.* Causal of roots above; 'e.-ing the caves' कंदरभुवः प्रतिध्वानयन-प्रतिध्वानिताः कुर्वन्.

ECLAT, *s.* प्रतिष्ठा, शोभा, गौरवं; आडंबरः. 2 स्तुति *f.*, कीर्ति *f.*, ख्याति *f.*, प्रशंसा.

ECLECTIC, *a.* उद्धारक.

ECLIPSE, *s.* ग्रहः, ग्रहणं, ग्रासः, उपरागः, उपसर्गः, उपप्लवः, ग्रहपीडनं. -*v. t.* ग्रस् 1A, प्र-आ-च्छद् 10, तिमिरयति (D.), ग्रह् 9 P, उपसृज् 6 P, उपप्लु 1 A, उपरज् c. 2 (fig.) प्र-आ-,छद्, (गुणवत्तरपाषेण छाद्यते गुणिनां गुणाः P. I. 10); प्रत्यादिश् 6 P; 'Urvas'i e.s Lakshmi, proud of her beauty' उर्वशी प्रत्यादिशो रूपगर्वितायाः श्रियः (V. 1). -ED, *a.* उपरक्त, उपसृष्ट, ग्रस्त, उपप्लुत, सोपप्लव, ग्रहपीडित. 2 तमोवृत, प्रच्छन्न, मलिनप्रभ. 3 प्रत्यादिष्ट, प्रत्याख्यात.

ECLIPTIC, *s.* क्रांतिवृत्त-मंडलं, रविमार्गः.

ECONOMY, *s.* निर्वाहः-हणं, प्रणयनं, नयः, नीति *f.*; 'e. of the house' गृहकार्यनिर्वाहः, गार्हस्थ्यं. 2 परिमित-मित-व्ययः, स्वल्प-विवेक-व्ययः, अमुक्तहस्तत्वं. 3 विन्यासः, विरचनं, प्रकल्पनं, संविधानं. 4 (Political) अर्थशास्त्रं, राजनीतिः-शास्त्रं. -IC,-ICAL, *a.* मित-स्वल्प-व्यय, अमुक्तहस्त. 2 कार्यनिर्वाहसंबंधिन्. -ICALLY, *adv.* मित-स्वल्प-व्ययेन, अमुक्तहस्तं. -IST, *s.* मितव्ययिन् *m.*, अमुक्तहस्तः. 2 अर्थशास्त्रज्ञः, राजशास्त्रविद् *m.*, नीतिज्ञः. -IZE, *v. t.* मितं व्ययं 10 (व्यययति), स्वल्पशः विनि-प्र-युज् 7 A, 10. -*v. i.* मितव्ययेन गृहकार्याणि निर्वह् c. or प्रणी 1 P.

ECSTASY, *s.* हर्षोन्मादः, आनंदभरः, प्रहर्षः, प्रमदः, अत्यानंदः, संमोहः, उन्मादः. -ED, *a.* हर्षोन्मत्त,-पुलकित, हर्षमूढ-जड. -ECSTATIC,-AL, *a.* उन्मादिन्, संमोहिन्, परमानंदप्रद, मोहक.

ECUMENICAL, *a.* सर्वसाधारण (णी *f.*).

EDACIOUS, *See* GREEDY.

EDDY, *s.* आवर्तः, भ्रमः-मि *f.*, भ्रमरकः.

EDENTATED, *a.* निर्दशन, नीरद.

EDGE, *s.* धारा, अग्रं, कोटि-अग्रि *f.*, पालि-ली *f.*, अणिः-णी. 2 उपांतः, सीमा, प्रांतः, परिसरः, पर्यंतः, उत्संगः; समंतः. 3 अंचलः, दशाः pl. (of garments). 4 तेजस् *n.*, तीक्ष्णता, निशितता; 'e. of a brook' कच्छः, कूलं, तीरं, तटं; 'two or double e.-ed' द्विधार, उभयतस्तीक्ष्ण; कार्यद्वयसाधक; 'setting the teeth on e.' दंतहर्षः. -*v. t.* प्रांतयति (D.), पर्यंतेन सनाथीकृ 8 U. 2 शो 4 P, तिज् c., तीक्ष्णीकृ. -ED, *a.* कोटिमत्, धारासनाथ, तीक्ष्ण, सधार; 'sharp e.' तीक्ष्णाग्र, निशितधार. -LESS, *a.* अतीक्ष्ण, धाराहीन.

EDIBLE, *a.* खाद्य, भक्ष्य, भोज्य.

EDICT, *s.* शासनं, राजाज्ञा, राजशासनं; 'written e.' आज्ञा-शासन-पत्रं.

EDIFICE, *s.* भवनं, सदनं, हर्म्यं, मंदिरं, गृहं, प्रासादः, सौधं.

EDIFY, *v. t.* उत्कृष् 1 P, उन्नी 1 P, उन्नति-उत्कर्षं प्राप् c. 2 ज्ञानं वृध् c., शिक्ष् c., उपदिश् 6 P, मोह-भ्रांति-नश् c. or निरस् 4 U. -ED, *a.* प्राप्तज्ञान, निरस्तमोह, उपदिष्ट. -ICATION, *s.* ज्ञानप्राप्ति-वृद्धि *f.*, उपदेशः, शिक्षणं. -ING, *a.* उपदेशक, ज्ञानवर्धक.

EDIT, *v. t.* शोधयित्वा प्रकाश् c., शुध् c. 2 लिख् 6 P. -ION, *s.* प्रकाशनं, शोधनं, प्रकटीकरणं. 2 आवृत्ति *f.* -OR, *s.* प्रकाशकः. 2 लेखकः.

EDUCATE, *v. t.* विनी 1 P, शास् 2 P, अनुशास्, प्रबुध् c., शिक्ष् c., अधि-इ c. (अध्यापयति), संस्कृ 8 U;

उपदिश् 6 P. 2 विद्यादानेन पा c. (पालयति) or संवृध् c. or पुष् c. -ED, a. कृत-गृहीत-उपात्त-लब्ध-विद्य, शिक्षित प्रबुद्ध; संस्कृतचित्त, विनीत, व्युत्पन्न, कृताभ्यास, लब्ध-ज्ञान. -ION, s. विनयः, शिक्षा-क्षणं, अध्यापनं, अनुशासनं, संस्कारः, विद्यादान-ग्रहण-प्राप्ति f., व्युत्पत्ति f., उपदेशः. 2 पोषणं, संवर्धनं. -OR, s. विनेतृ m., शिक्षकः, प्रबोधकः.

EEL, s. जलव्यालः. अंधाहिः.

EFFABLE, a. कथनीय, निवेदनीय; वाच्य; 'in-e.' अनिर्वचनीय; 'in-e. joy' कोपि आनंदः, किमपि सुखं.

EFFACE, v. t. अप-प्र-व्या-उद्-निर्-मृज् 2 P or c., विनश् c., उच्छिद् 7 P, विलुप् 6 P or c., उद्-हृ 1 P, उन्मूल् 10. -v. i. उच्छ्वस् 2 P. -MENT, s. अपामार्जनं, लोपः, व्यामर्षः; 'e. of colours' वर्णिकोच्छ्वासः (S. 6).

EFFECT, s. कार्यं, नैमित्तिकं; उत्पन्नं, निष्पन्नं, सिद्धि f. 2 फलं, परिणामः, फलोदयः, उत्तरफलं, अंतः. 3 अर्थः, प्रयोजनं, गुणः, फलं, प्रभावः. 4 अभिप्रायः, आशयः. 5 निष्पत्ति-सिद्धि-f.; 'of no e.' निष्फल, निष्प्रयोजन, निर्गुण; 'to take e.' फल 1 P, मूर्च्छे 1 P, (छायान मूर्च्छति मलोपहतप्रसादे दर्पणतले S. 7); 'to take no e.' ex. by कुंठ, (वज्रं तपोवीर्यमहत्सु कुंठं K. III. 12); 'to this e.' इति, एतदभिप्राय a.; 'to what e.' किमर्थं, केन हेतुना; 'to destroy the e. of' निष्फली-मोघी-कृ 8 U; 'in e.' अर्थतः, वस्तुतः, तत्वतः. 6 (E. s.) विभवः, द्रव्याणि, धनसामग्री, रिक्थं. -v. t. कृ 8 U, विधा 3 U, सं-निः-पद c., साध् 5 P or c., निर्वृत् c., निर्वह् c. 2 जन् c., उत्पद् c. -IVE, a. कार्यसाधक, फलवत्, निष्पादक, संपादक, फलोत्पादक; 'e. speech' हृदयग्राहि वचः. -UAL, -EFFICACIOUS, a. फलोत्पादक, गुणावह, अमोघ, अव्यर्थ, गुणवत्, सिद्धिकर (री f.), कार्यसाधक, सफल. 2 प्रबल, समर्थ, सप्रभाव, क्षम, अलंतम. -UALLY, adv. अमोघं, सफलं, निष्पत्तिपूर्वं, अव्यर्थं. 2 प्रभावेण, सामर्थ्येन. -UATE, v. t. कृ, संपद् c., &c.

EFFEMINATE, a. क्लीब, दुर्बल, सुकुमार. 2 स्त्रैण (णी f.), स्त्रीधर्मन, स्त्रीवदाचारिन्, स्त्रीप्रकृति, स्त्रीगुणविशिष्ट; स्त्रीभाव; 'an e. man' क्लीबः, कापुरुषः, गेहशूरः. -v. t. क्लीबीकृ 8 U, दुर्बली-निष्पुरुषी-कृ. -LY, adv. क्लीबवत्, नारी-स्त्री-वत्, स्त्रीधर्मानुसारेण. -EFFEMINACY, s. क्लीबता, दौर्बल्यं, स्त्रीत्वं, स्त्रैणं, स्त्रीधर्माचरणं, सौकुमार्यं, मृदुता.

EFFERVESCE, v. i. बुद्बुदायते (D.), फेनायते (D.), उत्स्विद् pass., उच्छूनीभू, फेनिलीभू. -ENCE, s. फेनोद्गमः, उत्स्वेदनं, बुद्बुदायितं, फेनिलता, उच्छूनीभावः, मंडोद्गमः. 2 उत्तापः, संक्षोभः; आलोडनं. -ING, a. फेनिल, फेनायमान.

EFFICACY, s. प्रभावः, बलं, सामर्थ्यं, गुणः, शक्ति f., तेजस् n., क्षमता, अमोघता, सफलता, फलोत्पादकत्वं. -OUS, a. प्रबल, समर्थ; See EFFECTUAL.

EFFICIENT, a. कार्यसाधक, कार्यसिद्धिक्षम, कार्यापटु, विचक्षण, कर्मक्षम, अलंकर्माण, निपुण; See EFFECTUAL also. -LY, adv. अमोघं, सिद्धिपूर्वं, निपुणं, विचक्षणतया. -EFFICIENCY, s. कार्यक्षमता, कार्यसिद्धिक्षमता, नैपुण्यं, वैचक्षण्यं.

EFFETE, a. जीर्ण, दुर्बल, निःशक्ति, क्षीण, निःसत्व, क्षीणशक्ति. 2 वंध्य, निष्फल, मोघ.

EFFIGY, s. प्रतिमा, मूर्त-प्रतिकृति f., प्रतिरूपं.

EFFLORESCENCE, s. पुष्पोत्पादनं, प्रस्फोटनं. 2 दद्रुः.

EFFLUENCE, s. प्रवाहः, निर्गमः, प्लवः, निःस्रवणं.

EFFLUVIUM, EFFLUVIA, s. उद्गारः, वासः. 2 दुर्गंधः, पूतिगंधः.

EFFLUX, EFFLUXION, s. प्रवाहः, निस्रावः, ओघः, निःसारः-सरणं, निर्गमः.

EFFORT, s. प्र,-यत्नः, उद्यमः, व्यवसायः, आयासः, चेष्टा, चेष्टितं; 'to make e. s' उद्यम् 1 P; See ATTEMPT.

EFFRONTERY, s. धाष्ट्यं, वैयात्यं, निर्लज्जत्वं, प्रागल्भ्यं, प्रतिभानं.

EFFULGENT, a. दीप्तिमत्, तैजस (सी f.), उज्ज्वल, सुप्रभ, तेजस्विन्. -EFFULGENCE, s. तेजस् n., दीप्ति-कांति f., प्रभा; रुच् f., शोभा; See BRIGHTNESS.

EFFUSE, v. t. प्र-निः-सृ c., प्रमुच् 6 P, उत्-वि-सृज् 6 P, पत् c., नि-अव-सिच् 6 P. -ION, s. उत्सर्गः, निषेकः, स्रावः, मोक्षणं, अवपातनं.

EGG, s. अंडं, पक्षि-शी f., कोषः-शः; 'lay e. s' अंडमोक्षणं कृ 8 U, अंडानि सू 2 A; 'e. on' प्रोत्सह c.; See PROMPT.

EGLANTINE, s. अरण्यजपा-वा.

EGOTISM, s. अहंकारः, आत्मश्लाघा-स्तुति f., आत्माभिमानः, ममता. —EGOTIST, s. आत्मश्लाघिन्-अहंकारिन्-आत्माभिमानिन् m., विकत्थनशीलः. -IC, -ICAL, a. अहंकारिन्, दृप्त, गर्वित; See ARROGANT. -ICALLY, adv. सदर्पं, आत्मश्लाघापूर्वं.

EGREGIOUS, a. अत्यंत, असाधारण (णी f.), विशिष्ट, प्रख्यात, प्रसिद्ध, उत्तम, प्रमुख; oft. by अति pr.; 'an e. rogue' सुप्रसिद्धः शठः; अतिमूर्खता, &c. -LY, adv. अत्यंतं, अतीव, भृशं, अतिमात्रं, सातिशयं.

EGRESS, s. निर्गमः, निष्क्रमः, निर्याणं, निःसरणं, अपसारः, निर्गति f.

EIGHT, a. अष्टन्, अष्टकं; 'in e. ways' अष्टधा; 'e. times' अष्टकृत्वः; 'e.-fold' अष्टगुण.

EIGHTEEN, a. अष्टादशन्.

EIGHTY, a. अशीति f.

EITHER, pron., a. अन्यतर; 'on e. side' उभयतः. -conj. (-or) वा-वा; or वा singly.

EJACULATE, v. i. सहसा उदीर् 10 or उच्चार् c.,

प्रार्थनां उदाह 1 P. 2 उद् 6 P, उत्क्षिप् 6 P. -ION, *s.* उद्गारः, आक्रंदनं, सहसा उदीरणं, उच्चारणं.

EJECT, *v. t.* निरस् 4 U, निराकृ 8 U, निःसृ c. ; *See* DRIVE AWAY, DISCHARGE. 2 उत्क्षिप्-उद्गृ 6 P. -ION, *s.* निःसारणं, निराकरणं, निष्कासनं; अधिकाराद् भ्रंशनं.

EJULATION, *s.* विलपनं, परिदेवनं, आर्तनादः, आक्रंदनं.

EKE, *v. t.* वृध् c., विस्तृ c., प्रस् c., तन् 8 U.

ELABORATE, *v. t.* महाश्रमेण साध् c., or निष्पद् c. or निर्मा 3 A or विधा 3 U or प्रकृप c. -ED, *a.* बहुश्रमसिद्ध, महाप्रयत्नकृत-विरचित-प्रकल्पित. -LY, *adv.* महायत्नेन, बहुश्रमेण, महायासेन. -ION, *s.* बहुश्रमेण निर्माणं.

ELAPSE, *v. i.* व्यति-इ 2 P, अतिक्रम् 1 U, 4 P, व्यतिक्रम्, गम् 1 P; 'days having e.-ed' दिनेषु गच्छत्सु.

ELASTIC, *a.* स्थितिस्थापक, प्रकृतिप्रापक. -ITY, *s.* स्थितिस्थापकता-त्वं.

ELATE, *v. t.* उत्सिच् 6 P, दृप् c., आध्मा 1 P; दर्पेण उद्-धि c. or उद्-हन् 2 P; *See* PUFF. 2 प्रहृष् c., प्रमुद् c., उल्लस् c. -*a.*,-ED, *a.* दर्पोन्मत्त, उद्धत, गर्वित, उत्सिक्त, मदोद्धत, दृप्त, गर्वोच्छून. 2 प्रहृष्ट, प्रमुदित, सोल्लास, हृष्टचित्त. -ION, *s.* गर्वः, दर्पः, औद्धत्यं, प्रहर्षः, चित्तोल्लासः.

ELBOW, *s.* कूर्परः, कफ(फो)णि *m. f.* 2 वंकः, पुटभेदः. -*v. t.* कूर्परेण आहत्य बहिष्कृ 8 U.

ELDER, *a.* ज्यायस्, वरीयस्, अग्रज, पूर्वज, वर्षीयस्, वयोज्येष्ठ; 'e. brother' अग्रजः, अग्रजन्मा, ज्यायान् भ्राता. -*s.* गुरुः, वृद्धः; 'e. s, elderly persons' गुरुजनः, गुरवः, आर्यजनः, वृद्धाः.

ELDEST, *s.* ज्येष्ठ, वर्षिष्ठ, वरिष्ठ, श्रेष्ठ, सर्वज्येष्ठ.

ELECT, *v. t.* वृ 5 U or 10 (वरयति), वृ 9 U. 2 ग्रह् 9 P, आदा 3 A, स्वीकृ 8 U. 3 नियुज् 7 A, 10, निरूप् 10, निर्वच् c., 'self-election' स्वयंवरः 'self-e. ed bride' स्वयंवरवधूः; 'e. ed him as her husband' पतित्वे तं वरयामास. -*a.*,-ED, *a.* नियुक्त, निरूपित, वृत, निर्वाचित; व्यावृत्त; 'a person e.' नियोज्यः, नियोगिन *m.*, निर्वाचितः. -ION, *s.* नियोजनं, वरणं, निर्वाचनं, वृतिं *f.* -IVE, *a.* जननियुक्त; 'e. right' वरणाधिकारः; 'e. municipality' जननियुक्तसभ्या ग्रामपालिका. -OR, *s.* नियोजकः, निर्वाचकः, वरणाधिकारविशिष्टः; 'body of e. s, electoral body' नियोजकगणः.

ELECTER, ELECTRUM, *s.* कांस्यं, मिश्रधातुः.

ELECTRIC, *a.* वैद्युत (ती *f.*), विद्युन्मय (यी *f.*), विद्युद्विषय. -ITY, *s.* तडित्-वैद्युत-वैद्युतशक्ति *f.*

ELECTUARY, लेह्यं, अवलेहः.

ELEEMOSYNARY, *a.* दरिद्रार्थं, दरिद्रोपकारिन्.

ELEGANT, *a.* चारु, ललित, सुंदर, सुरूप, लावण्यवत्, श्लील, अग्राम्य, सुभग. 2 (As composition) सुरस, ललित, चारु. -LY, *adv.* सविलासं, चारु, ललितं. -ELEGANCE,-CY, *s.* चारुता, सौंदर्यं, विलासः, लावण्यं, शोभा, विभ्रमः, लालित्यं; 'e. of words' पदलालित्यं.

ELEGY, *s.* करुणरसं गीतं, शोकगानं-गीति *f.*

ELEGIAC, *a.* करुणामय (यी *f.*), शोकप्रधान.

ELEMENT, *s.* भूतं, बीजं, मूलं, मूलवस्तु *n.* 2 तत्त्वं. 3 अवयवः, भागः, अंशः. 4 आरंभः, उपक्रमः, मूलतत्त्वं, बीजभूतं ज्ञानं. 5 वस्तुमात्रं; 'out of his e.' अस्थाने. -ARY, *a.* भौत (ती *f.*), भौतिक (की *f.*). -ARY, *a.* अव्याकृत, शुद्ध, निरवयव. 2 मूल in comp., प्रारंभक.

ELEPHANT, *s.* गजः, हस्तिन्-करिन् *m.*, मातंगः, मतंगजः, कुंजरः, नागः, वारणः, इभः, द्विरदः, द्वि-अनेक-पः, दंती, दंतावलः, स्तंबेरमः; 'she-e.' करिणी, करेणु *f.*-णुका, वशा, धेनुका; 'a young e.' कलभः, करिशावकः; 'e. driver' हस्तिपः-पकः, आधोरणः, महामात्रः, निषादिन् *m.*; 'wild e.' वनगजः, वन्यः करी; 'furious or rutting e.' मदोत्कटः, मदकलः, प्रभिन्नः, गर्जितः, मत्तः; 'e. out of rut' उद्भ्रांतः; निर्मदः; 'head of a herd of e.s' यूथनाथः, यूथपः; 'herd of e.s' हास्तिकं, गजता, गजयूथं; 'war-e. s' गजघटा; 'e. s of the quarters' दिग्गजाः; 'frontal globe of an e.' कुंभः; 'e.'s fore-head' ललाटं, अवग्रहः; 'his eyeball' इ(ई)क्षि(क्षी)का, अक्षिकूटकं; 'corner of his eye' निर्यांणं; 'root of his ear' चूलिका; 'his withers' आसनं, स्कंधदेशः; 'his side' पार्श्वभागः, पक्षभागः; 'the temple-juice' मदः, दानं; 'water emitted from the trunk' वमथुः, करशीकरः; 'his roaring' बृंहितं, गर्जितं; 'the whip to strike him' तोत्रं, वेणुकं; 'binding-post' आलानं; 'binding chains' शृंखलं, अंदुकः, निगडः; 'caparisoning of an e.' कल्पना, सज्जना; 'coloured housings' प्रवेणी, आस्तरणं, वर्णः, परिष्टो(स्तो)मः, कुथः.

ELEPHANTIASIS, *s.* श्लीपदं, शिलीपदं.

ELEVATE, *v. t.* उन्नम् c. (उन्नमयति), उच्छ्रि c., उद्यम् 1 P, उत्कृष् 1 P; उत्था c. (उत्थापयति), उन्नी 1 P, अधिरुह् c. (रोपयति), उन्नति-उत्कर्ष-नी or कृ 8 U; 'e. to a high office' उत्तमपदे नियुज् 7 A, 10, उत्कृष्टपदं प्राप c. -ED, *a.* अधिरोपित, उन्नीत; उत्तमपदनियुक्त. 2 उच्छ्रित, उत्तुंग, उन्नत, सोच्छ्राय; *See* HIGH. -ION, *s.* उन्नति *f.*, उत्कर्षः; उच्छ्रायः, उत्थापनं, अधिरोपणं, उच्चपदप्रापणं, उदयः. 2 उत्सेधः, उत्तुंगता, उच्छ्रयः, उन्नतस्थानं; *See* HEIGHT.

ELEVEN, *a.* एकादशन्. -ELEVENTH, *a.* एकादश (शी *f.*); 'what is the use of doing things at the e. hour' मोहनिशे भवने तु कूपखननं प्रत्युद्यमः कीदृशः (Bh. II. 88).

Elf, *s.* वेतालः, भूतः, पिशाचः, अपदेवता. **-ish**, *a.* पैशाच (ची *f.*).

Elf-lock, *s.* जटा, सटा.

Elicit, *v. t.* निर्गम् c. (गमयति), निष्कृष् 1 P, उद्धृ c., निःसृ c., प्रकाश् c., अपवह् 1 P or c., आविष्कृ 8 U, निर्णी 1 P, ज्ञा 9 U or c. (ज्ञापयति). **-ation**, *s.* निष्कर्षणं, निर्गमनं, &c.

Elide, *v. t.* लुप् 6 P or c. **-Elision**, *s.* लोपः.

Eligible, *a.* वरणीय, नियोज्य, ग्राह्य, आदेय.

Eliminate, *v. t.* नश् c., निष्कस् c., विलुप् 6 P or c., निराकृ 8 U. **-ion**, *s.* लोपः, नाशः, आहरणं, अपनयनं.

Elixir, *s.* रसायनं, तेजोवर्धनं.

Ellipse, *s.* अंडवृत्तं, उपवृत्तं-मंडलं. **-Elliptic**, *a.* अंडाकार, अंडाकृति.

Ellipsis, *s.* न्यूनपदं, अध्याहारः, समर्थपदलोपः. **2** पद-वाक्य-आकांक्षा; 'supplying an e.' आकांक्षा-पूरणं. **-Elliptical**, *a.* न्यूनपदः अध्याहार्य, अभ्यूहनीय.

Elocution, *s.* वाक्शक्ति *f.*, वक्तृत्वं, वाक्पटुता, वाग्मिता. **2** व्याहारः, वाणी.

Elongate, *v. t.* दीर्घीकृ 8 U, आयम् 1 P; वितन् 8 U. **-ed**, *a.* आयत, आयामवत्, लंबाकृति, वितत. **-ion**, *s.* दीर्घीकरणं, प्रतानं, वितति *f.*, आयति *f.*

Elope, *v. i.* अलक्षितं पलाय् 1 A or व्यपसृप् 1 P. **-ment**, *s.* गूढव्यपसर्पणं, पलायनं

Eloquent, *a.* वाग्मिन्, वाग्मीश, वाग्विदग्ध, वक्तृ, वाक्पटु, शब्दचतुर. **-ly**, *adv.* वाग्विभवेन, शब्दचातुर्येण, वाक्पटुतया. **-Eloquence**, *s.* वाक्पाटवं-शक्ति *f.*, वाग्मिता, वाग्विभवः, वक्तृत्वं.

Else, *a.* अन्य-इतर-अपर-*pron. a.*, भिन्न, व्यतिरिक्त; 'what e.' किमन्यत्, अथ किं; 'who e.' कोऽपरः. **-***conj.* न(नो)चेत्, अन्यथा, इतरथा; एतद्विना, एतद्व्यतिरेकेण; 'e. where' अन्य-इतर-पर-त्र, स्थानांतरे, भिन्न-अन्य स्थाने.

Elucidate, *v. t.* व्याख्या 2 P, व्याकृ 8 U, वि-वृ 5 U, स्पष्टी-विशदी-कृ; *See* Explain. **-ion**, *s.* व्याख्यानं, स्पष्टीकरणं, विवरणं. **-or**, *s.* व्याख्यातृ *m.*, प्रकाशकः, विवरणकृत् *m.*

Elude, *v. t.* कौशलेन परिह 1 P; वृज् 10, छलेन अपसृप्-निर्गह् 1 P or पलाय् 1 A (with abl.); 'e. ing the senses' इंद्रियागोचरः; 'it e. s grasp' ग्रहीतुं न शक्यते. **-Elusion**, *s.* छलेन परिहरणं; अलक्षितं अपसरणं or निर्गमः. **-Elusive**, *a.* निर्गमपर, परिहारिन्. **-Elusory**, *a.* छलिन्, मायिन्.

Elysium, *s.* वैकुंठं, स्वर्गः, नंदनं, आनंदस्थानं. **-Elysian**, *a.* परमानंदप्रद, स्वर्गीय.

Emaciate, *v. t.* कृशीकृ 8 U, क्षै c. (क्षपयति), क्लिश् 9 P, ग्लै c. (ग्ल-ग्ला-पयति), शुष् c., क्षीण *a.* कृ. **-***v. i.* क्षै-ग्लै 1 P, शुष् 4 P, विशु-क्षि-pass., कृशी-भू. **-ed**, *a.* क्षीण, क्षीणशरीर-शक्ति, कृश, क्षाम, ग्लान, क्षीण-शुष्क-मांस; अपचित; 'e. by hunger' क्षुत्क्षामकंठ. **-ion**, *s.* कृशता, क्षामता, क्षीणता, कार्श्यं, शरीरशोषणं, मांसक्षयः, अपचयः.

Emanate, *v. i.* उत्पद् 4 A, निर्गम् 1 P, निःसृ 1 P, उत-प्र-भू 1 P, जन् 4 A, निःस्रु 1 P, प्रवृत् 1 A. **-ion**, *s.* उत्पत्ति *f.*, उद्भवः, प्रभवः, उद्गमः, निर्गमः, प्रवृत्ति *f.* **-ive**, **-Emanant**, *a.* उद्भूत, उत्पन्न, जात, ज, जन्य, प्रभव in comp.

Emancipate, *v. t.* मुच् 6 P or c., वि-निर्°; मोक्ष् 10, उद्धृ 1 P, निस्तृ c., विसृज् 6 P. **-ion**, *s.* विमोचनं, मोक्षः, मुक्ति *f.*, उद्धारः, निस्तारः. **2** मुक्ति *f.*, मोक्षः; *See* Beatitude. **-or**, *s.* मोचकः, मोक्षकः.

Emasculate, *v. t.* वृषणौ छिद् 7 P or कृत् 6 P, पुंस्त्वं ह 1 P, षंढी-क्लीबी-कृ 8 U. **-ed**, *a.* हतवीर्यः, हतपुंस्त्वः, छिन्नवृषणः, मुष्कशून्यः, षंडः-ढः, क्लीबः, नपुंसकः. **-ion**, *s.* वृषणच्छेदः, पुंस्त्वहरणं.

Embale, *v. t.* भांडं कृ 8 U, एकत्र कृ.

Embalm, *v. t.* रक्ष् 1 P; तैले निक्षिप् 6 P, क्षयाद्-रक्ष. **2** सुरभीकृ 8 U, आमोदेन पूर् 10, वास् 10.

Embank, *v. t.* सेतुना-वप्रेण-बंध् 9 P. **-ment**, *s.* सेतु-वप्र-बंधः, मृत्तिकाचयः, वप्रः.

Embar, *v. t.* निरुध् 7 U, निषिध् 1 P.

Embargo, *s.* निषेधः, वाणिज्यकर्मनिषेधः, अवरोधः.

Embark, *v. t.* नौकायां नि-प्र-विश् c. or निधा 3 U. **-***v. i.* नावं or पोतं आ-अधि-रुह् 1 P or प्रविश् 6 P. **2** व्या-वृ 6 A, अभियुज् pass. (with loc.); प्रारभ् 1 A (with acc.). **-ation**, *s.* नौकारोहणं-रोपणं-प्रवेशनं. **2** व्यापारः, अभियोगः, प्रारंभः, उपक्रमः.

Embarrass, *v. t.* आकुलयति (D.), वि-व्या-मुह् c., व्यग्रीकृ 8 U, संभ्रम c. (भ्रमयति), आकुलीकृ; 'I am really e. ed' सत्यमाकुलीभूतोस्मि (S. 2). **2** बाध् 1 A, क्लिश् 9 P, उपरुध् 7 U, अभिभू. **-ed**, *a.* आ-व्या-कुल, व्यग्र, मोहित, संभ्रांत, मूढ. **2** बाधित, उपरुद्ध; क्लिष्ट, अभिभूत; 'in e. circumstances' आपन्न, दुःस्थ, कृच्छ्रगत, दुर्गत; 'e. smile' विलक्षस्मित. **-ment**, *s.* व्याकुलता, व्यग्रता, संभ्रमः, व्यामोहः, आकुलत्वं, क्लेशः, बाधः-धा, दुःखं, उपरोधः.

Embassy, *s.* दौत्यं, दूतधर्मः-क्रिया; 'sent on an e.' दूतः, दौत्येन प्रस्थापितः.

Embattle, *v. t.* व्यूह् 1 U or c., व्यूहेन रच् 10 or सज्जीकृ 8 U or व्यव-स्था c. (स्थापयति), व्यूह-रचनां कृ. **-ed**, *a.* सन्नद्ध, सज्जीकृत, व्यूहेन रचित.

Embedded, *a.* निहित, निविष्ट, न्यस्त.

Embellish, *v. t.* भूष् 10, अलंकृ 8 U, मंड् 10, शुभ् c., भाज् c., परिष्कृ, प्रसाध् c. **-ment**, *s.* प्रसा-

धनं, भूषणं; *See* ORNAMENT. **2** नेपथ्यं, आहार्यं, वेशः, आकल्पः.

EMBERS, *s.* भसितं, भस्मन् *n.*; अंगारशेषं; अंगारोच्छिष्टं.

EMBEZZLE, *v. t.* छलेन आत्मसात्कृ 8 U, स्वकीयं कृत्वा उप-विनि-युज् 7 A, 10; ग्रस् 1 A. **-MENT**, *s.* छलेन अपहारः or उपयोगः or आत्मसात्करणं, ग्रसनं; अप-नि-ह्नवः.

EMBITTER, *v. t.* तिक्तीकृ 8 U. **2** प्रकुप् c., उद्-दीप् c., कलुषीकृ. **3** क्लिश् 9 P, दु 5 P.

EMBLAZON, *v. t.* विभूष् 10, मंड् 10.

EMBLEM, *s.* लक्षणं, लांछनं, केतनं, केतुः, व्यंजनं, संज्ञा, ध्वजः, चिह्नं, लिंगं, पताका. **-ATIC,-ATICAL**, *a.* लाक्षणिक (की *f.*), व्यंजक, बोधक, लिंगिन्, सूचक, द्योतक.

EMBODY, *v. t.* सशरीरं *a.* कृ 8 U, शरीरेण युज् 10 or सनाथीकृ. **2** संग्रह् 9 P, समाह् 1 P, एकी-एकत्र-कृ. **-ED**, *a.* मूर्त, शरीरबद्ध, देहवत्, मूर्तिमत्, शरीरिन्; 'the e. spirit' शरीराभिमानी आत्मा. **-MENT**, *s.* शरीरिता, देहवत्त्वं, मूर्तिमत्ता. **2** मूर्ति *f.*, करुणस्य मूर्तिरथवा शरीरिणी विरहव्यथा (U. 3) 'the e. of pathetic sentiment &c.' **3** संग्रहः, सन्निपातः, समाहारः, एकीकरणं.

EMBOLDEN, *v. t.* प्रोत्साह c., आश्वस् c., निर्भय-*a.* कृ.

EMBOSS, *v. t.* गंडाकारेण परिष्कृ 8 U or उपशुभ् c.

EMBOW, *v. t.* भुज् 6 P; *See* BEND.

EMBOWEL, *v. t.* अंत्राणि आपनी or निर्हृ 1 P.

EMBOWERED, *a.* कुंजसनाथ, निकुंजित.

EMBRACE, *v. t.* आलिंग् 1 P, आश्लिष् 4 P; परि-, स्वंज् 1 A, उपगुह् 1 U; *See* CLASP. **2** स्वी-अंगीकृ 8 U; ग्रह् 9 P, आदा 3 A, अभ्युपगम् 1 P. **3** परिग्रह्, व्याप् 5 P, प्रतिसंह् 1 P, समाविश् c. **4** परिवृ 5 U, परिवेष्ट् 1 A or c. **-***s.* सं-आ-श्लेषः, आलिंगनं, परिरंभः, उपगूहनं, परिष्वंगः.

EMBRASURE, *s.* प्राकाराच्छिद्रं, जालकं.

EMBROCATE, *v. t.* (औषधीयजलेन) लिप 6 P, भृज् 7 P; मृद् 9 P, घृष् 1 P, संवह् c. **-ION**, *s.* मर्दनं, लेपनं, संवाहनं. **2** विलेपः-पनं, उपदेहद्रव्यं.

EMBROIDER, *v. t.* सूच्या पुष्पादिकं सिव् 4 P or चित्र् 10, कार्मिकवस्त्रं कृ 8 U; 'an e. ed cloth' चित्रित-कार्मिकं-वस्त्रं. **-ER**, *s.* कार्मिकवस्त्रकृत् *m.*, सूचिकर्मोपजीविन् *m.* **-Y**, *s.* सूचिकर्मन् *n.*, शिल्पं.

EMBROIL, *v. t.* संक्षुभ् c., आकुलीकृ 8 U, संकृ 6 P, संकुलीकृ; विरागं उत्पद c. **-MENT**, *s.* संक्षोभः, सांकर्यं, संभ्रमः, आकुलत्वं.

EMBRYO, EMBRYONE, *s.* गर्भः, भ्रूणः; 'in e.' गर्भच्छन्न, गर्भावस्थायां वर्तमान; (fig.) अपरिणत, अपरिपक्व. **2** आ-प्रा-रंभः, उपक्रमः.

EMEND, *See* AMEND. **-ATOR**, *s.* शोधकः, समाधातृ *m.*

EMERALD, *s.* मरकतं, गारुत्मतं, अश्मगर्भः, हरिन्मणिः; 'e.-like' मारकत (ती *f.*), मरकतसदृश (शी *f.*).

EMERGE, *v. i.* (सलिलाद्) उन्मस्ज् 6 P, उत्था 1 P, निर्गम्-निःसृ 1 P; त्यज् 1 P. **2** आविर्भू 1 P, उद्दि 2 P, निर्भा 2 P, दृष्टिगोचर *a.* भू, दृश् pass., प्रकाशतां गम्, &c. **-ENCE,-CY**, *s.* संकटं, विपत्समयः, आपद् *f.*, आकस्मिकसंभवः. **2** अवसरः, प्रस्तावः, प्रयोजनं, आवश्यकत्वं; 'according to e.' यथाप्रयोजनं, यथावसरं, प्रसंगवशात्. **-ENT**, *a.* उन्मज्जत्. **2** आकस्मिक (की *f.*), अकस्मादुद्भूत, अत्यावश्यक (की *f.*), अपरिहार्य. **-EMERSION**, *s.* उत्थानं, उन्मज्जनं; त्यागः. **2** आविर्भावः, उदयः, &c.

EMERY, *s.* उत्तमलोहं.

EMETIC, *s.* वमनं, वांतिकृद् औषधं. **-***a.*, **-AL**, *a.* वांतिकर (री *f.*).

EMINENT, *a.* उत्कृष्ट, विशिष्ट, प्रमुख, उत्तम, परम, श्रेष्ठ, प्रवर, वरेण्य, प्रधान. **2** विश्रुत, लब्धप्रतिष्ठ-वर्ण, महायशस्क, सुविख्यात, प्रख्यात; 'of e. qualities' गुणाढ्य. **3** उच्च, उन्नत, उच्छ्रित. **-LY**, *adv.* अत्यंतं, भृशं, अतिशयेन, अत्यर्थं, अति pr. **-EMINENCE**, *s.* उन्नतभूमि *f.*, उच्छ्रायः, उच्चस्थानं, उन्नेधः, उच्चभूभागः. **2** उत्कर्षः, विशिष्टता, परमपदं, श्रेष्ठत्वं, ख्याति *f.*, प्रतिष्ठा, उन्नति *f.*, प्रकर्षः, गौरवं.

EMISSARY, *s.* दूतः, वार्ताहरः, संदेशहरः. **2** चरः, चारः, गूढदूतः, अपसर्पः, प्रणिधिः, स्पशः.

EMIT, *v. t.* वि-निर्-सृज् 6 P, निःक्षिप् 6 P, उदीर c., निः-सृ c., उत्-वि-सृज् 6 P, उद्-गु 6 P, उद्गम् 1 P, निर्गम् c. (गमयति); निःस्रु c., मोक्ष् 10. **-EMISSION**, *s.* उद्गारः, विमोचनं, उत्सर्गः, स्रावः, उदीरणं, उद्गमनं. **2** (Of semen) रेतः-क्षरणं-स्खलनं, वीर्यनिषेकः, रेतःस्रुति *f.*, निषेकः.

EMMET, *s.* पिपीलिका.

EMMEW, *v. t.* पंजरे निरुध् 7 U.

EMOLLIATE, *See* SOFTEN.

EMOLLIENT, *s.* अभ्यंजनं, विलेपनं, स्नेहनं. **-***a.* स्निग्ध, स्नेहन (नी *f.*), चिक्कण. **2** शांतिद, सुखावह.

EMOLUMENT, *s.* लाभः, फलं, आगमः, प्राप्ति *f.*, आयः, उदयः.

EMOTION, *s.* विकारः, विकृति *f.*, भावः, रागः, चित्तविकारः, विक्रिया, मनोधर्मः-वृत्ति *f.* **2** उत्तापः, चित्तक्षोभः, मनस्तापः, अंतर्वेगः, आकुलता, आवेगः, संक्षोभः; 'under e.' अन्यथावृत्ति *a.*; 'e. of sorrow' शोकावेगः. **3** रसः, भावः; 'e. of love' शृंगाररसः. **-AL**, *a.* भाव-विकार-विशिष्ट, विकारप्रेरित.

EMPALE, *v. t.* Encircle, q. v. **2** शूले आरुह् c. (रोपयति) or निविश् c. **-MENT**, *s.* शूलारोपणं; 'deserving e.' शूल्य.

Emperor, *s.* सम्राज् *m.*, अधिराजः, अधीश्वरः, चक्रवर्तिन् *m.*, सार्वभौमः, मंडलेश्वरः, राजाधिराजः. **-Empress**, *s.* अधि-महा-राजाधि-राज्ञी.

Emphasis, *s.* अवधारणं, गुरूच्चारणं. **-Emphasize**, *v. t.* गौरवेण उच्चर् c., द्रढयति (D.). **-Emphatic**, *a.* दृढ, निश्चित; गौरवेण उच्चारित, अवधारणीय. **-ally**, *adv.* सुदृढं, सनिश्चयं, सावधारणं, सपरिच्छेदं.

Empire, *s.* आधिराज्यं, साम्राज्यं, आधिपत्यं, ऐश्वर्यं, ईशत्वं, प्रभुत्वं. **2** राष्ट्रं, राज्यं, विषयः.

Empiric, *s.* दुश्चिकित्सकः, छद्म-कु-वैद्यः. **2** परीक्षकः. **-a.**, **-al**, *a.* अशास्त्रसिद्ध, आयुर्वेदविरुद्ध, छाद्मिक (की *f.*); प्रयोगैकविषय, प्रयोगसिद्ध. **-ally**, *adv.* आयुर्वेदविरुद्धं, अविधया, अशास्त्रानुसारेण, प्रयोगज्ञानमात्रेण. **-ism**, *s.* दुश्चिकित्सा, &c.

Emplastic, *a.* चिक्कण, सांद्र, लेप्य.

Employ, *v. t.* नियुज् 7 A, 10; अधिकृ 8 U, विधा 3 U, व्यापृ c., प्रवृत c.; 'e. as a messenger' प्रतिशास् 2 P. **2** प्र-उप-युज्, उपभुज् 7 U, सेव् 1 A, व्यवहृ c., अभ्यस् 4 P. **-ee**, *s.* नियोज्यः, अधिकृतः. **-er**, *s.* प्र-नि-योजकः, प्रवर्तकः, व्यापारवित् *m*, अधिकारिन्-स्वामिन् *m.* **-ment**, *s.* नियोगः, व्यापारः, व्यवसायः, उद्योगः, कार्यं, कार्योद्योगः; जीविका, व्यवहारः, वृत्ति *f.*; 'his e. was to chop wood' काष्ठच्छेदनवृत्तिरसौ; 'out of e.' निर्वृत्ति, क्षीणवृत्ति, निर्व्यापार. **2** प्रयोगः, उद्योगः, व्यवहारः. **3** अधिकारपदं, पदं.

Empoison, *v. t.* तीक्ष्णरसं-विषं-दा 3 U, विषप्रयोगेण नश् c. **2** विषेण दिह् 2 U or अंज् 7 P.

Emporium, *s.* वाणिज्यस्थानं, निषद्या.

Empower, *v. t.* अधिकृ 8 U, नियुज् 7 A, 10, क्षमतां-अधिकारं-दा 3 U.

Empty, *a.* शून्य, परिशून्य, शून्यगर्भ, रिक्त. **2** विरस, निःसार, असार, फल्गु, निःसत्त्व; 'e.-headed' मंदधी, अल्पबुद्धि, दुर्मति; 'an e. vessel makes most noise' अर्धो घटो घोषमुपैति नूनं. **-v. t.** रिच् 7 U, शून्यी-रिक्तीकृ 8 U. **2** सारं हृ 1 P, निःसत्त्वीकृ. **3** तोयं पत् c.; अव-तृ 1 P, स्रु 1 P, विश् 6 P; (कुत्र वा सागरं वर्जयित्वा महानद्यवतरति S. 3) 'e. s itself' &c. **-ness**, *s.* रिक्तता, शून्यता; निःसारता, &c.

Empurple, *v. t.* अरुणी-लोहिती-कृ 8 U.

Empyreal, *a.* आग्नेय-तेजोमय (यी *f.*).

Empyrean, *s.* उत्तमस्वर्गः, वैकुंठं, तेजोलोकः.

Emulate, *v. t.* स्पर्ध् 1 A, प्रतिस्पर्ध्, संघृष् 1 P (with instr.); विजि desid. (विजिगीषते), अभिभवितुं यत् 1 A or उद्यम् 1 P, अहमहमिकया यत्; *See* Compete. **-ion**, *s.* स्पर्धा, विजिगीषा, संघर्षः, अहमहमिका. **-ive**, **-Emulous**, *a.* प्रतिस्पर्धिन्, विजिगीषु, जयेच्छु. **-s.** विजिगीषुः, सपत्नः, प्रतिस्पर्धिन् *m.*

Emulsion, *s.* पायसं, पयस्यं.

Emunctory, *s.* शरीरमलपथः, देहमलनिर्गमः.

Enable, *v. t.* Gen. ex. by शक्य; 'this will e. you to go back' अनेन तव परावर्तनं शक्यं; शक्ति-सामर्थ्य-दा 3 P, समर्थ-क्षम-शक्त *a.* कृ 8 U.

Enact, *v. t.* कृ 8 U, विधा 3 U, निष्पद् c. **2** व्यव-स्था c. (स्थापयति), विधि-व्यवस्थां-कृ, प्रशास् 2 P, शासनं कृ; 'it is e. ed as follows' अयं विधिः क्रियते, एवं व्यवस्थाप्यते. **3** नट् 10, अभिनी 1 P, निरूप् 10. **-ment**, *s.* विधिः, शासनं, व्यवस्था, शासनपत्रं.

Enamoured, *a.* सानुराग, आसक्त, अनुरक्त, बद्धभाव, कामासक्त (with loc.); 'the king was e. of her' नृपस्तस्यां बद्धभावः, आसक्तानुरागः, प्रीतिं बबंध; 'to be e.' अनुरंज्-आसंज् pass., आसक्त &c. भू.

Encage, *v. t.* पंजरे निरुध् 7 U or बंध् 9 P.

Encamp, *v. t.* (सैन्यं) निविश् c., समावस् c. **-v. i.** निविश 6 P, समावस 1 P. **-ment**, *s.* निवेशनं, समावासः. **2** शिबिरं, निवेशः.

Encave, *v. t.* कंदरे प्रच्छद् 10 or गुह् 1 U.

Enciente, *See* Pregnant.

Enchafe, *v. t.* संतप्-प्रकुप्-रुष् c.

Enchain, *v. t.* निगडैः बंध् 9 P, निगडयति (D.), खिलीकृ 8 U, अव-नि-रुध् 7 U. **2** आकृष् 1 P, हृ 1 P, निरुध्.

Enchant, *v. t.* मंत्रैर्वशीकृ 8 U or मुह् c., अभिचर् c., अभिमंत्र् 10. **2** (fig.) हृ 1 P, आकृष् 1 P, विलुभ् c.; 'I was quite e.-ed with thy ravishing melody' तवास्मि गीतरागेण हारिणा प्रसभं हृतः (S. 1). **-er**, *s.* वि-, मोहकः, ऐंद्रजालिकः, मायिन् *m.*; 'e. of snakes' व्यालग्राही, अ(आ)हितुंडिकः. **-ing**, *a.* मनोहर, मोहिन्, हारिन्. **-ment**, *s.* माया, योगः, इंद्रजालं, मोहः, कुहकः, अभिचारः. **-Enchantress**, *s.* मायिनी, मोहिनी, योगिनी.

Enchase, *v. t.* प्रणि-धा 3 U, प्रतिबंध् 9 P, अनुव्यध् 4 P, खच् 10 (खचयति).

Encircle, *v. t.* परि-वृ 5 U, परिवेष्ट् 1 A or c., परिगम् 1 P, परि-इ-या- 2 P, वलयति-मंडलयति (D.), वलय-रसना in comp. **2** Embrace, q. v.

Enclose, *v. t.* आ-परि-वृ 5 U, परिवेष्ट् 1 A or c. **2** नि-सं-अव-रुध् 7 U. **3** प्राचीरेण परिवेष्ट् or आवृ or अवरुध्, परिक्षिप 6 P. **4** आवेष्ट्, आ-सं-छद् 10, पि-धा 3 U, कोशे निविश् c., कोशस्थ *a.* कृ 8 U. **-ed**, *a.* परिवृत, परिवेष्टित, परिक्षिप्त. **2** अवरुद्ध, सावरण, प्राकारावृत. **3** कोशस्थ, पिहित, परिच्छन्न, आवेष्टित, कोशांतर्गत. **-ure**, *s.* वृति *f.*, आवरणं, प्राकारः, प्राचीरं, आवेष्टनं, अवरोधकं, वरणः. **2** वाटः-टी. **3** अंतर्गतपत्रं.

Encomium, *s.* [illegible]

वाक्यं, वर्णनं, गुणप्रशंसा. -ENCOMIAST, *s.* गुणप्रशंसकः, स्तुतिपाठकः. -IC,-ICAL, *a.* स्तुतिमय (यी *f.*); श्लाघामय, प्रशंसाकर (री *f.*).

ENCOMPASS, *v. t.* परि-इ 2 P, व्याप् 5 P, परिच्छिद् 10, परिक्षिप् 6 P, संवल् 1 A, सं-वलयति (D.); *See* ENCIRCLE, -MENT, *s.* परिवेष्टनं, परिगमः, परिवृति *f.*

ENCORE, *v. t.* प्रशंसासूचनार्थं पुनः इति उत्क्रुश् 1 P, पुनरुक्तां प्रार्थ् 10 A.

ENCOUNTER, *v. t.* अभि-इ 2 P,-गम् 1 P, समागम्, मिल् 6 P, समा-इ, समासद् c., संमुखं-अभिमुखं-गम्, संमुखीभू. 2 विग्रह् 9 P, प्रतियुध् 4 A, संघट्ट् 1 A, समाहन् 2 P. 3 प्राप् 5 P, अभिभू pass.; 'e. difficulties' आपदं प्राप्नुवंति, आपदाभिभूयंते; 'he e.ed many dangers' तस्य बहूनि संकटान्यापतितानि. -*s.* समागमः, संगः-गमः, संमिलनं, दर्शनं, समासादनं. 2 विग्रहः, संग्रामः, समाघातः, संपरायः, संप्रहारः, संआ-पातः; *See* BATTLE; 'close e.' संघट्टः.

ENCOURAGE, *v. t.* प्रोत्सह् c., आ-समा-श्वस् c., प्रेर् c., प्रवृत् c., उत्तिज् c., आशा वृध् c. -ER, *s.* आश्वासकः, प्रवर्तकः. -ING, *a.* आश्वासिन्, प्रोत्साहक, उत्तेजन (नी *f.*), आश्वासक. -MENT, *s.* प्रोत्साहनं, आश्वासनं, उत्तेजनं, धैर्यवर्धनं. 2 साहाय्यं, अनुग्रहः, उपकारः, आनुकूल्यं, आश्रयः, अभ्युपपत्ति *f.*

ENCROACH, *v. i.* आक्रम् 1 U, 4 P, अन्यायतः ग्रह 9 P, अन्यायेन प्रविश 6 P, अधर्मतः ग्रह् or आत्मसात्कृ. -MENT, *s.* अन्यायेन ग्रहणं, अधर्मतः आक्रमणं-ग्रहणं.

ENCRUST, *v. t.* घनपटलेन आच्छद् 10 or परिवेष्ट् 1 A or c., बहिर्भागे घनीकृ 8 U. -ED, *a.* सपटल, घनीभूत. -ATION, *s.* बाह्यपटलं, बहिरावेष्टनं.

ENCUMBER, *v. t.* प्रतिबंध् 9 P, उप्-नि-रुध् 7 U, भारेण आक्रम् 1 U, 4 P or क्लिश् 9 P, भाराक्रांत *a.* कृ 8 U; 'e. ed with debt' ऋणभारग्रस्त. -ED, *a.* भाराक्रांत, भारग्रस्त. 2 बाधित, उपरुद्ध, प्रतिबद्ध, &c. -ENCUMBRANCE, *s.* भारः, भारभूतः. 2 प्रतिबंधः, उपरोधः, प्रत्यूहः, विघ्नः, अंतरायः. 3 ऋणभारः.

ENCYCLICAL, *a.* वर्तुल, चाक्रेय (यी *f.*); 'e. letter' चक्रं, बहुसाधारणपत्रं.

ENCYCLOPŒDIA, *s.* विद्याचक्रं-कोषः; 'e. of learning' विद्यासागरः, ज्ञानोदधिः.

END, *s.* अंतः, प्रांतः, पर्यंतः-तं, अवधिः, सीमा, अंतरं. 2 अत्ययः, शेषः-षं, क्षयः, अवसादः, अंतः, अवसानं, पर्यवसानं, परिणामः; 'pleasing at the e.' परिणामरमणीय; 'of good e.' सुखोदर्कं. 3 समाप्ति-निष्पत्ति-निवृत्ति-सिद्धि- *f.* 4 विरामः, विच्छेदः, निवृत्ति *f.*, उपशमः. 5 निधनं, मरणं, अत्ययः, विनाशः, देहक्षयः. 6 फलं, परिणामः, उत्तरफलं. 7 आशयः, हेतुः, अभिप्रायः, अर्थः, उद्देशः, कार्यं, तात्पर्यं; 'to no e.' निरर्थकं; 'e. of the world' कल्पांतः, प्रलयः, प्रत्यवहारः, क्षयः, संवर्तः; 'put an e. to' समाप् c., त्यज् 1 P, उत्सृज् 6 P, नश् c.; 'e. of a garment' अंचलः, दशाः pl.; 'hear my speech to the e.' शृणु मे सावशेषं वचः (M. 4). -*v. t.* समाप् c., अवसो 4 P, सं-निः-यद् c., निवृत् c., संपूर् 10; oft. by अंत in comp. -*v. i.* अवसो pass., समाप्-निष्पद् pass.; शम् 4 P, विरम् 1 P, विगम् 1 P, अपया 2 P, निष्क्रम् 1 U, 4 P; oft. by (*s.*) above; 'it will e. in good' कल्याणोदर्कं भविष्यति (U. 4); 'roots e. ing in vowels' अजंतो धातवः; सागरांता मही, &c. -ING, *s.* अंतः, अंत्यं अक्षरं. -*a.* अंत्य. -LESS, *a.* अनंत, अपार, अशेष, निर्मर्याद, निरवधि. 2 निरंतर, अविरत, अविच्छिन्न, सतत, अतिदीर्घ, अनवरत. -LESSLY, *adv.* अत्यंतं, अविरतं, सततं, &c. -LESSNESS, *s.* आनंत्यं, अविरति *f.*, अविच्छेदः, &c.

ENDANGER, *v. t.* संशये पत् c. or क्षिप् 6 P, संशयस्थ-संदेहदोलास्थ *a.* कृ 8 U; *See* DANGER.

ENDEAR, *v. t.* प्रिय *a.* or प्रीतिपात्रं कृ 8 U; 'e. oneself' प्रीतिपात्रं-भाजनं-भू. -ING, *a.* प्रियकर (री *f.*), प्रीतिकर. -MENT, *s.* प्रीति *f.*, प्रणयः, प्रेमन् *m.*, *n.*, प्रेम-स्नेह-कारण-हेतुः; 'a word of e.' प्रियवाक्यं. 2 विलासः, विभ्रमः, हावः, शृंगारचेष्टा.

ENDEAVOUR, *v. i.* प्र-,यत् 1 A, घट् 1 A, उद्यम् 1 P; 'e ing for others' परार्थघटकाः, परार्थमुद्यमभृतः. -*s.* व्यापारः, व्यवसायः, प्रयत्नः, आयासः; *See* ATTEMPT.

ENDORSE, *v. t.* पृष्ठे (स्वनाम) लिख् 6 P; लेखस्य पृष्ठेभिलिखेदत्वा दत्वा धनं ऋणी (Y. II.). 2 दृढयति (D.). दृढीकृ, प्रमाणीकृ 8 U.

ENDOW, *v. t.* वृत्तिं दा 3 U, प्रतिष्ठा c. (प्रतिष्ठापयति). 2 युज् 10; संपन्न *a* कृ 8 U; oft. by 'e. ed'. -ED, *a.* युक्त, संपन्न, विशिष्ट, अन्वित, उपेत, उपपन्न, शालिन्, gen. in comp. or with instr. -MENT, *s.* वृत्ति *f.*, वृत्ति-शुल्क-दानं; प्रतिष्ठा; अग्रहारदानं. 2 निबंधः. 3 गुणः, शक्ति *f.*; 'intellectual e. s' बुद्धिगुणाः, मतिविभवः-प्रकर्षः.

ENDUE, *See* ENDOW.

ENDURE, *v. t.* सह् 1 A, विषह्, क्षम् 1 A, तिज् desid. (तितिक्षते), मृष् 4 P, 10. 2 भुज् 7 A, धृ 10. 3 शक् 5 P, पृ 10, उत्सह्; *See* ABLE. -*v. i.* स्था 1 P, चिरं स्था; 'as long as the sun and the moon e.' यावच्चंद्रदिवाकरौ. -ANCE, *s.* सहिष्णुता, सहनशीलता. 2 क्षमा, तितिक्षा, सहनं, मर्षणं, क्षांति *f.* 3 धैर्यं, उत्साहः; 'e. of austerities' दमः. 4 स्थिति *f.*, स्थायित्वं. -ER, *s.* सोढृ *m.*, क्षंतृ *m.*, सहः in comp. -ING, *a.* स्थायिन्, चिरस्थायिन्, अविसर्गिन्, भावत; 'miseries are of an e. charac-

ter' आयतस्वभावानि दुःखानि (Ka. 175). 2 सहिष्णु, सहनशील, तितिक्षु, सहन, क्षमिन्.

ENEMY, *s.* शत्रुः, अरिः, रिपुः, वैरिन् *m.*, अरातिः, द्विट्, प्रति-वि-पक्षः, परिपंथी, अमित्रः, द्वेष्टा *m.*, अपकर्ता, सपत्नः, दुर्हृद्, परः, प्रत्यर्थी, द्विषन्, द्वेषणः, अहितः, शात्रवः, अभिघाती; 'an e. in the rear' पार्ष्णिग्राहः. —INIMICAL, *a.* विरुद्ध, शात्रव (वी *f.*), द्वेषिन्, वैरिन्, अहित, विपक्ष, विरोधिन्, अननुकूल. —LY, *adv.* रिपुवत्, सवैरं, द्रोहबुद्ध्या. —ENMITY, *s.* वैरं, शत्रुता, शत्रुभावः, विद्वेषः, विपक्षता, सापत्न्यं, द्वंद्वभावः, विरोधः.

ENERGY, *s.* शक्ति *f.*, प्रभावः, वीर्यं, तेजस् *n.*, सत्त्वं, पौरुषं, उत्साहः, उद्योगः, अतंद्रिता, उद्यमः, व्यवसायः, कर्मोद्योगः. —ENERGETIC, *a.* उद्योगिन्, उद्यमिन्, व्यवसायिन्, सोत्साह, कर्मोद्युक्त, सोद्योग, अनलस, अतंद्रित, उत्साहवत्. 2 वीर्यवत्, तेजस्विन. —ALLY, *adv.* सोत्साहं, सोद्योगं, सयत्नं, शक्त्या.

ENERVATE, ENFEEBLE, *v. t.* दुर्बलीकृ 8 U, क्षीणीकृ, तेजः-शक्ति-हृ 1 P. —ED, *a.* क्षीणशक्ति, हतवीर्य, क्षीणबल, दुर्बल, शिथिलबल. —ION, —ING, *s.* वीर्यक्षयः, शक्ति-तेजो-हानि *f.*, क्षीणता, अपचयः, क्षामता.

ENFORCE, *v. t.* बलात् कृ c.; *See* COMPEL; 'e.-ed to pay' दापित. 2 दृढीकृ 8 U, द्रढयति (D.), सबल *a.* कृ, स्थिरीकृ. 3 (Rules &c.) प्रवृत् c., बलेन गणी 1 P or निर्वह् c. —MENT, *s* (बलेन) प्रवर्तनं, प्रणयनं. 2 दृढीकरणं, दृढप्रमाणं.

ENFRANCHISE, *v. t.* बंधनात् मुच् 6 P or c. or मोक्ष् 10. 2 स्वतंत्रीकृ 8 U, स्वतंत्राधिकारं दा 3 U. —MENT, *s.* दास्यविमोचनं, बंधनमोक्षः. 2 पौराधिकारदानं.

ENGAGE, *v. t.* आकृष् 1 P, अनुरंज् c., आराध् c., हृ 1 P. 2 व्या-पृ c., प्रयुज् 10, विनियुज्. 3 नियुज्, अधिकृ 8 U, वृ 10 (वरयति). 4 (A word) प्रतिश्रु 5 P, प्रतिज्ञा 9 U, नियमपत्रेण (आत्मानं) बंध 9 P. 5 सं-प्रति-युध् 4 A आक्रम् 1 U, 4 P, समाहन् 2 P. 6 वाचा दा 3 U or प्रतिश्रु; विवाहसंबंधं-वाग्निश्चयं-कृ. —*v. i.* (To be e. ed in) व्याप् 6 A, निरत-आसक्त *a.* भू 1 P, प्रवृत् 1 A, (with loc.); सेव् 1 A, आस्था 1 A (with acc.). 2 संयुध्, युद्धं कृ. 3 आरभ् 1 A, व्यव-सो 4 P, उपक्रम् 1 A. 4 प्रति-ज्ञा, प्रति-श्रु, परिपण् 1 A, अभ्युपगम् 1 P. —ED, *a.* व्यापृत, सव्यापार, प्रवृत्त, कार्यनिष्ठ, कर्मोद्युक्त, उद्यमासक्त; gen. ex. by पर, निरत, मग्न, आसक्त, तत्पर, परायण, in comp; 'e. in contemplation' ध्यानपर-निरत, &c. 2 प्रति-ज्ञात-श्रुत, संविदित, कृतसंकेत; 'e. to be married' वाग्दत्त, प्रतिज्ञाविवाहित. —ING, *a.* मनोहर, हृदयग्राहिन्, हारिन्, आकर्षक, मोहिन्; चित्ताकर्षिन्. —INGLY, *adv.* मनोहारितया. —MENT, *s.* व्यवसायः, प्रवृत्ति *f.*, व्यवहारः, कर्मन् *n.*, व्यापारः, कार्यं. 2 युद्धं, संविद् *f.*, नियमः, समयः, पणः, व्यवस्था, अभ्युपगमः, प्रतिश्रुतं वचः; 'keep an e.' समयं पा c. (पालयति) or अनुरुध् 4 A or अनुवृत् 1 A; 'let us keep our e.' सामयिका भवामः (M. 1); 'has kept his e.' विहितप्रतिज्ञः; 'marriage e.' वाग्निश्चयः, विवाहप्रतिज्ञा; 'I have many e s to-day' मया बहवः संकेताः-समयाः-अद्य पालनीयाः.

ENGENDER, *v. t.* उत्पद् c., प्रसू 2 A, उद्-भू c., जन् c.; *See* BEGET.

ENGINE, *s.* यंत्रं, उपकरणं, साधनं; 'military e.' युद्धोपकरणं.

ENGINEER, *s.* यंत्रकारः, यंत्रकलाभिज्ञः, वास्तुविद्याविशारदः. —ING, *s.* यंत्रकारस्य व्यापारः. 2 वास्तुविद्या, यंत्रशास्त्रं.

ENGIRD, ENGIRDLE, *See* ENCIRCLE.

ENGRAFT, *v. t.* (अन्यस्थानादानीय) निविश् c., संयुज् 10, संलग्नीकृ 8 U.

ENGRASP, *v. t.* ग्रह् 9 P, धृ 1 P, 10.

ENGRAVE, *v. t.* मुद्र् 10, उत्कृ 6 P, तक्ष् 1, 5 P, त्वक्ष् 1 P; 'with the name e. ed on the ring' मणिबंधनोत्कीर्णेनामधेयं (S. 6). —ER, *s.* तष्टृ-त्वष्टृ *m.*, तक्षन् *m.* —ING, *s.* तक्षणं. 2 मुद्रा.

ENGROSS, *v. t.* अभिभू 1 P, एकाग्र-अनन्यविषय- *a.* कृ, आकुलीकृ 8 U; better by 'e. ed'. 2 सर्वग्रह् 9 P, पूर्वं ग्रह् or क्री 9 U, साकल्येन आत्मसात्कृ. —ED, *a.* निविष्ट, अभिनिविष्ट, आसक्त, अनन्यविषय, एकाग्र; ex. by परायण, निमग्न, पर, in comp.; 'e. in grief' शोकपरायण. —ER, *s.* पूर्वक्रेतृ *m.*

ENGULF, *v. t.* जलावर्ते निक्षिप् 6 P, आवर्तेन ग्रस् 1 A.

ENHANCE, *v. t.* वृध् c., उपचि 5 U, अधिक *a.* कृ 8 U. —MENT, *s.* वृद्धि *f.*, वर्धनं, उपचयः.

ENIGMA, *s.* प्रहेलिका, गूढप्रश्नः, प्रश्नदूती, प्रवह्लिका. —ENIGMATICAL, *a.* गूढार्थ, अस्पष्टार्थ, दुर्ज्ञेय, अभिप्रायार्थ, वक्र, गूढ. —LY, *adv.* गूढं, अस्पष्टं, वक्रोक्त्या, अभिप्रायार्थं.

ENJOIN, *v. t.* शास् 2 P, आदिश् 6 P, विधा 3 U; 'e. ed by Scriptures' शास्त्रविहित. 2 नियुज् 7 A, 10, उपदिश्; प्र-,चुद् 10.

ENJOY, *v. t.* उप-सं-भुज् 7 U, अनुभू 1 P, आस्वाद् 1 A, अश् 5 A; निविश् 6 P, (निविश्यतां सुंदरि यौवनश्रीः R. VI. 50). 2 (Be delighted by) मुद् 1 A, रम् 1 A, नंद् 1 P, (अन्येषामभ्युदयेन मोदस्व, &c.); 'let us e. this festive holiday in playing' अनध्यायमहोत्सवं खेलंतः संनयामः (U. 4). 3 सुखेन उपभुज् or सेव् 1 A. —ABLE, *a.* भोग्य, उपभोग्य. 2 सुभग, रम्य, रमणीय, सुखद, मनोरम, कम-

दनं, निर्देशः, सुखास्वादः; 'objects of e.' विषयाः. 2 सुखं, आनंदः, हर्षः, संतोषः, प्रमोदः, सौख्यं.

ENKINDLE, *See* KINDLE.

ENLARGE, *v. t.* विस्तृ c, वि-प्र-तन् 8 U, प्र-सृ c., प्रथ् 10, विशालीकृ 8 U. 2 वृध् c., एध् c., आप्यै c., वृद्धिं नी 1 P, स्फाय् c. (स्फावयति). —*v. i.* वृध् 1 A, विस्तृ-उपचि-वितन् pass., स्फाय् 1 A, प्यै 1 A, प्ररुह् 1 P, वृद्धिं इ 2 P. 2 (Upon) प्रपंचयति (D.), विस्तरेण-सविस्तरं-वद् 1 P or अभिधा 3 U or वर्णे 10. —MENT, *s.* वृद्धि *f.*, विस्तारः, वर्धनं, स्फीति *f.*, बृहणं. 2 विपुलता, प्रपंचः, वाग्विस्तरः.

ENLIGHTEN, *v. t.* (ज्ञानेन) वि-प्र-काश् c., उद्भास् c., दीप् c., प्रति-प्र-बुध् c., उपदिश् 6 P, विमलीकृ 8 U, संस्कृ, व्युत्पद् c. —ED, *a.* प्रतिबद्ध, संस्कृतचित्त, व्युत्पन्न, प्राप्तज्ञान, ज्ञानोद्दीपितचित्त, प्रतिबोधवत्. —MENT, *s.* ज्ञानोद्दीपनं, प्रबोधः-धनं; संस्कारः, प्रवृत्ति *f.*, ज्ञानागमः, चित्तप्रबोधनं.

ENLIST, *v. t.* नामावलिपत्रे नाम लिख् 6 P or आरुह् c. (रोपयति). 2 (Soldiers) सैन्यमध्ये आरुह् c., युद्धकर्मणि व्या-पृ c. or प्रवृत c., अस्त्राणि ग्रह c. 3 आकृष् 1 P, आत्मसात्कृ 8 U, स्वपक्षे आनी 1 P or कृ; 'having got a certificate e. ing him among Gods' अमरगणनोल्लेखमासाद्य (R. VIII. 95).

ENLIVEN, *v. t.* हृष् c., ह्लाद c., उल्लस c. 2 उत्साहं जन् c. (जनयति), आश्वस् c., प्रोत्सह c., उत्तेज् c. —ING, *a.* उत्साह-हर्ष-जनक.

ENNOBLE, *v. t.* उन्नम् c. (उन्नमयति), उत्कर्षे-उन्नतिं नी 1 P, उत्-चि c., उत्कृष् 1 P or c., प्रतिष्ठां प्राप् c. 2 कुलीनपदे नियुज् 7 A, 10, उच्चपदे आरुह् c. (रोपयति) or आप् c., संमन् c. —MENT, *s.* उत्कर्षः, उन्नति *f*, प्रतिष्ठा, उच्चपदावाप्ति *f.*

ENNUI, *s.* ग्लानि *f.*, क्लांति *f.*, अवसादः, श्रमः.

ENORMOUS, *a.* असाधारण, अतिमात्र, अलौकिक (की *f.*), अपरिमित, अनन्त. 2 महाप्रमाण, अतिबहुल, अतिमहत्; 'e. in body' बृहत्काय, भीम-महा-काय. 3 घोर, दारुण, अतिनिंद्य, सुदुष्ट, पापिष्ठ. —LY, *adv.* अतिमात्रं, सातिशयं, अत्यंतं, भृशं; सु-अति-pr. —ENORMITY, *s.* घोरता, दारुणता, &c. 2 घोर-महा-पातकं, महापराधः, अतिपापं.

ENOUGH, *a.* यथेष्ट, बहुल, प्रचुर, पर्याप्त. 2 समर्थ, क्षम, उचित, उपयुक्त; oft. by अलं with inf. or dat., (तस्यालमेषा क्षुधितस्य तृप्त्यै R. II. 39). —*adv.* अलं, कृते, (with instr.); 'e. of prolixity' अलमतिविस्तरेण. 2 यथेष्टं, प्रचुरं, पर्याप्तं; 'to be e. for' कृप् 1 A (with dat.); 'rich e.' भूयसा वित्तवान्; with adverbs by एव or भूयसा; सम्यगेव, भूयसा युक्त, &c.; 'be good e. to grant my request' मम प्रार्थनामनुमंतुं प्रसीदतु भवान्. —*s.* पर्याप्ति *f.*, प्राचुर्यं, बाहुल्यं, यथेष्टत्वं; having e. for maintenance' अलंजीविक.

ENQUIRE,-Y, *See* INQUIRE,-Y.

ENRAGE, *v. t.* प्रकुप् c. क्रुध् c., रुष् c., संरभ् c. (संरंभयति), कोपं-रोषं-नी 1 P; कोपं उद्दी c. or इध् 7 A. —ED, *a.* कुपित, क्रुद्ध, इद्धमन्यु, प्रकोपित, कोपाकुल, संरब्ध, जातामर्ष; 'to be e.' क्रुध्-कुप्-रुष् 4 P (with dat).

ENRAPTURE, ENRAVISH, *v. t.* अतिहर्षेण मुह् c. or जडीकृ 8 U, अतिमात्रं हृष् c. or उल्लस् c. —ED, *a.* हर्षेजड-मोहित, संप्रहृष्ट, अत्युल्लासित, हर्षोन्मत्त, परमानंदित; 'to be e.' अत्यंतं हृष 4 P, हर्षेण मुह् 4 P or जडीभू. —MENT, *s.* हर्षोन्मादः, परमानंदः, हर्षमोहः.

ENRICH, *v. t.* धनिन्-सधन-आढ्य-द्रव्यसंपन्न-*a.* कृ 8 U; समृध् c., धनं वृध् c. or आप्यै c. or स्फाय् (स्फावयति). 2 Adorn, q. v.

ENROLL, *v. t.* Enlist, q. v. —ER, *s.* नामलेखकः. —MENT, *s.* नामलिखनं, नामारोपणं.

ENROOTED, *a.* रूढ-बद्ध-मूल.

ENSANGUINE, *v. t.* शोणितेन लिप् 6 P.

ENSCONCE, *See* CONCEAL.

ENSHRINE, *v. t.* सुप्रतिष्ठितस्थाने निविश् c. or रक्ष् 1 P.

ENSIFORM, *a.* खड्गाकार.

ENSIGN, *s.* पताका, ध्वजः, केतनं, केतुः, वैजयंती. 2 चिह्नं, लिंगं, लक्षणं. 3 (E.-bearer) ध्वजिन्-पताकिन् *m.*

ENSLAVE, *v. t.* दासीकृ 8 U, (fig. also), वशीकृ; दास्ये नियुज् 7 A, 10 or बंध् 9 P. —MENT, *s.* दास्यं, दासभावः, बंधनं.

ENSNARE, *v. t.* पाशेन-जालेन-बंध् 9 P, पाशे पत् c., जालबद्ध *a.* कृ 8 U, जाले धृ 1 P, 10.

ENSUE, *v. i.* समापद् 4 A, प्रवृत् 1 A, उत्पद् 4 A, जन् 4 A, सं-उत्-प्र-भू 1 P, प्रसंज् pass. 2 अनुसृ 1 P, अनु-इ 2 P, पश्चाद् आगम् 1 P. —ING, *a.* आगामिन्, भाविन्; अनागत, उत्तरकालीन, उत्तर-पर-in comp.; 'on the e. day' परेद्युः, आगामिनि दिवसे.

ENSURE, *v. t.* निश्चित *a.* कृ 8 U, स्थिरा-दृढी-कृ; 'diligence will e. you speedy success' उद्यम योगादद्दूरवर्तिनीं सिद्धिमवगच्छ.

ENTAIL, *v. t.* आवह् 1 P, उत्पद् c., जन् c. (जनयति). 2 (रिक्थं) प्र-दा 3 U. —*s.* क्रमागतरिक्थं. 2 क्रमागमविधिः.

ENTANGLE, *v. t.* संश्लिष् c., संग्रंथ् 9 P, संलग्नीकृ 8 U, आकुली-संकीर्णी-कृ. 2 संबंध् 9 P, संमिश् 10; better by 'e. ed.' —ED, *a.* सक्त, आ-सं-सक्त, लग्न, सं-परिलग्न, आ सं-परि-श्लिष्ट; कुरवकशाखापरिलग्नं च वल्कलं (S.1); शाखास्वसक्तमपि (S. 2), &c. 2 संकीर्ण, संकुल,

ग्रथिल. 3 आकुंचित, व्यावर्तित; 'e. hair' जटा, जटाजूटः; 'having e. hair' जटिल, जटावत्; 'e. in a net' जालबद्ध. -MENT, *s.* संश्लिष्टता, जटिलत्वं, ग्रंथिलत्वं. 2 संकरः, व्यतिकरः, संकुलता.

ENTER, *v.* विश् 6 P, नि-प्र-आ; गाह् 1 A, आगम् 1 P, आया 2 P, पदं कृ 8 U or निधा 3 U; 'a thought e. ed into his head' कश्चित्कल्पस्तस्य चेतसि प्रादुर्बभूव; 'curiosity e. ed his heart' कुतूहलेन तस्य चेतसि पदं कृतं; 'e. into conversation' भाषणनिमग्न *a.* भू 1 P; 'e. into alliance' संधिं कृ; 'e. into another's views' परमतं ग्रह 9 P, अन्यभावमनुप्रविश्, अन्यमतं स्वीकृ or अनुमन् 4 A; 'e. on a course' कार्यं प्रारभ 1 A, कार्यं प्रवृत 1 A. 2 (A name) लिख् 6 P, निविश् c., समारुह् c. (रोपयति). -ENTRANCE, *s.* प्रवेशः-शनं, &c. 2 द्वारं; *See* DOOR. -ENTRY, *s.* द्वारं, गमनागमनमार्गः. 2 लिखनं, पत्रारोपणं.

ENTERPRISE, *s.* साहसं, आश्चर्यकर्मन *n.*, अद्भुतकार्यं, दुष्कर्म. 2 उद्यमः, व्यवसायकार्यं, प्रवृत्ति *f.*, उद्योगः, चेष्टितं, आरंभः, व्यवसायः. 3 उत्साहः, धैर्यं. -*v. t.*, *See* BEGIN. -ING, *a.* उद्योगिन्, व्यवसायिन्, सोद्योग. 2 धीर, उत्साहिन्, सोत्साह. 3 साहसिक (की *f.*), दुष्करकार्यं प्रवर्तक.

ENTERTAIN, *v. t.* पूज 10, संमन c., अर्च् 1 P, 10, संभू c., सत्कृ, आतिथ्यं कृ 8 U; 'e. with food' भोजनदानेन तृप् c. or तुष c. 2 विनुद c., रम् c. (रमयति), अतिवह c. 3 धृ 1 P, 10, ग्रह् 9 P; *See* BEAR; 'e. a hope' आशां आरभ 1 U or अवलंब 1 A; 'do not e. doubts' मा ते संशयोभूत. -ER, *s.* विनोदकः, सत्कारिन् *m*, आतिथेयः. -MENT, *s.* पूजा, सत्कारः, आतिथ्यं, अतिथिसेवा-पूजनं. 2 विनोदः-दनं. 3 उत्सवः; 'musical e.' गानोत्सवः; संभोजनं, &c.

ENTHRAL, *v. t.* दासी-वशी-कृ 8 U.

ENTHRONE, *v. t.* सिंहासने उपविश् c., राज्ये अभिषिच् 6 P.

ENTHUSIASM, *s.* उत्साहः, उत्कटता, औत्सुक्यं, तीक्ष्णता, व्यग्रता, चंडता, उन्मादः. 2 (Religious e.) धर्मोन्मादः, भक्ति-श्रद्धा-उन्मादः, अतिश्रद्धोन्मादः. —ENTHUSIAST, *s.* भक्तिव्यग्रः, श्रद्धोन्मत्तः. 2 उत्साहिन् *m.* -IC, -ICAL, *a.* उत्साहवत्, सोत्साह; अत्यंत, उत्कट, प्रचंड, उत्सुक, व्यग्र, तीक्ष्ण, उद्युक्त; उन्मत्त; 'e. devotion' निरतिशया भक्तिः, निष्ठातिरेकः. -ICALLY, *adv.* अत्यनुरागेन, अत्यंतं.

ENTHYMEME, *s.* लुप्तावयवः पक्षः or हेतुः.

ENTICE, *v. t.* वि-आ-कृष् 1 P, हृ 1 P, मुह् c., प्र-विलुभ् c., दुष्कृतौ प्रवृत् c. -MENT, *s.* आकर्षणं, प्र-विलोभनं, मोहः, वंचनं. -ER, -ING, *See* ALLURE, -ING.

ENTIRE, *a.* कृत्स्न, समग्र, अखंड, सकल, सर्व, अखिल, समस्त, संपूर्ण, निखिल, निःशेष, अशेष, अन्यून, अभिन्न, सायंत. 2 सरल, ऋजु, अभेद्य, अहार्य (धनादिना). -LY, *adv.* अखंडं, साकल्येन, अशेषं, कृत्स्नशः, सर्वतः, निखिलेन. 2 (Solely) एक in comp.; एव, सर्वथा; 'depending e. on water' जलैकायत्ता. -NESS, -TY, *s.* समग्रता, साकल्यं, संपूर्णता, अखंडत्वं, अन्यूनता. 2 अभेद्यता, अहार्यता, आजैर्व.

ENTITLE, *v. t.* नाम कृ 8 U, अभिधा 3 U; *See* CALL. 2 अधिकारं दा 3 P, अधिकृ 8 U; ex. by अर्ह 1 P, or pot. pass. part.; 'he is e. ed to respect' मानमर्हति, मान्यः, पूज्यः; 'persons e. ed to a share' अंशाधिकारिणः, अंशभाजः, अंशार्हाः; 'e. ed to praise' प्रशंसार्हः, प्रशंसापात्रं.

ENTITY, *s.* सत्त्वं, अस्तित्वं, भावः, सत्ता.

ENTOMB, *v. t.* श्मशाने निखन् 1 P or निधा 3 U or स्था c. (स्थापयति), 'e. ed in despair' नैराश्योपहत.

ENTRAILS, *s.* अंत्राणि (pl.), पुरीतत् *n.*

ENTRANCE, *v. t.* (Put in a trance) मुह् c., मूर्च्छां प्राप् c. -ED, *a.* मूढ, मूर्च्छापन्न, प्रलीन. 2 उन्मत्त, हर्षोन्मत्त.

ENTRAP, *See* ENSNARE.

ENTREAT, *v. t.* अभि-प्र-अर्थ् 10 A, अनुनी 1 P, विनयेन-साञ्जलि-याच् 1 A or अर्थ्, प्रसद् c., सविनयं निविद c. -ING, *a.* सानुनय, सविनय, साञ्जलि. -Y, *s.* प्रार्थना, अभ्यर्थना, याचना, विनति *f.*, अर्थिता, अनुनयः; साञ्जलिप्रार्थना.

ENTRUST, *v. t.* निक्षिप 6 P, आ-समा-रुह् c. (रोपयति), निविश् c., न्यस् 4 U, न्यासीकृ 8 U (with loc.); प्रतिपद् c., दा 3 U, ऋ c. (अर्पयति) (with dat.).

ENTWINE, *v. t.* ग्रंथ् 9 P, उद्-ग्रंथ, गु(गुं)फ् 6 P, विरच् 10; *See* ENCIRCLE also.

ENUCLEATE, *v. t.* वि-परि-शुध् c., स्पष्टीकृ 8 U.

ENUMERATE, *v. t.* परि-कृत् 10; परि-,संख्या 2 P, कथ् 10; परि-वि-गण् 10, यथाक्रमं ख्या or निर्दिश् 6 P. -ION, *s.* परि-,संख्यानं, गणनं-ना, परिकीर्तनं, आख्यानं, कथनं, एकैकशः निर्देशः.

ENUNCIATE, *v. t.* लक्षणं-स्वरूपं-कथ् or वर्ण् 10; उच्चर् c., उदीर् c., उदाह् 1 P, कृत् 10, घुष् 10, निविद् c., विज्ञा c. (ज्ञापयति). -ION, *s.* उच्चारणं, उदीरणं, उदाहरणं, परिसंख्यानं, प्रकीर्तनं, विज्ञापनं; स्वरूपवर्णनं-ना. -IVE, *a.* ख्यापक, उदीरक.

ENVELOP, *v. t.* अवगुंठ् 10, आ-परि-वेष्ट् 1 A or c., आ-परि-वृ 5 U or c., आ-परि-सं-छद् 10, पिधा 3 U, 2 कोशे निधा or निविश् c. -*s.* कोशः-षः, आवेष्टनं, पिधानं, पुटः, आच्छादनं, अवगुंठनं. 2 प्रावारः, प्रच्छदपटः.

Envenom, *v. t.* विषेण दिह् 2 U or अंज् 7 P or लिप् 6 P; सविष *a.* कृ 8 U. **-ed**, *a.* सविष, विषदिग्ध, विषाक्त.

Environ, *v. t.* परिवेष्ट् 1 A or c., परिक्षिप् 6 P; *See* Encircle. **-(E. s)** *s.* परिसरः, उपांतः, अभ्यासः, उपपुरं, नगरोपांतः-तं.

Envy, *v. t.* असूयति (D.), ईर्ष्य 1 P (with dat.); परोत्कर्षं न सह् 1 A or मृष् 4 P, 10, परद्रव्यं अभिलष् 1, 4 P or लुभ् 4 P; स्पर्ध 1 A; 'I e. you your prosperity' त्वदुत्कर्षासहिष्णुरहं. **2** (In a good sense) स्पृह् 10 (with dat.) **-s.** असूया, अभ्यसूया, ईर्ष्या, मात्सर्यं, मत्सरः, अक्षांति *f.*, असहिष्णुता; अमर्षणं; परधनाभिलाषः. **-able**, *a.* स्पृहणीय, आकांक्षणीय. **2** ईर्ष्यणीय, लोभ्य. **-ier**, *s.* असूयकः, मत्सरिन् *m.*, ईर्ष्यिन् *m.* **-ous**, *a.* ईर्ष्यिन्, मत्सरिन्, मत्सर, परोत्कर्षासहन, असूयक, मत्सरिन्, साभ्यसूय (with loc.); असहिष्णु in comp.; 'e. of other's happiness' परसुखासहिष्णु; oft. ex. by परोभाग in comp.; 'e. of each other's fame' (प्रायः समानविद्याः) परस्परयशःपरोभागाः (M. 1). **-ously**, *adv.* सेर्ष्यं, साभ्यसूयं, समत्सरं, सासूयं.

Envoy, *s.* दूतः, संदेश-वार्ता-हरः, निसृष्टार्थः; राजप्रतिनिधिः.

Epaulet, *s.* स्कंधाभरणं, अंसालंकारः.

Ephemeral, *a.* क्षणभंगुर, क्षणविध्वंसिन्, क्षणिक (की *f.*). **2** ऐकाहिक (की *f.*).

Epic, *s.* वीरचरितवर्णनं, महाकाव्यं, वीरपुरुषेतिहासः.

Epicene, *a.* स्त्रीपुंलिंग, साधारणलिंग.

Epicure, Epicurean, *a.* उदरपरायण; भोजनचंचु, उदरंभरि, लोलुप; विषयासक्त, इंद्रियसुखानिरत, विषयिन्. **-Epicurism**, *s.* विषयसेवा, विषयासक्ति *f.*, इंद्रियसुखानुरागः.

Epicycle, *s.* प्राकृचक्रं, परिधिः.

Epidemic,-al, *a.* व्यापक, सर्वत्रग, बहुजनसाधारण (णी *f.*); संचारिन्; 'e. disease' मारः-री, महामारी. **-s.** जनपदोद्ध्वंसः.

Epidermis, *s.* बाह्यत्वच *f.*, बाह्यचर्मन् *n.*

Epiglottis, *s.* उप-प्रति-अलि-जिह्वा, घंटिका.

Epigram, *s.* क्षुद्रकविता, लघुकाव्यं.

Epilepsy, *s.* अपस्मारः, भ्रामरं. **-Epileptic**, *a.* अपस्मारिन्, भ्रामरिन्; 'an e. fit' अपस्माराक्रमः.

Epilogue, *s.* उपसंहारः.

Episcopacy, *s.* धर्माध्यक्षता, धर्माध्यक्षाधिकारः.

Episode, *s.* उपाख्यानं, उपकथा, प्रासंगिकवाक्यं, आख्यान-कथा. **-ic,-ical**, *a.* प्रासंगिक (की *f.*), अप्रस्तुत, अप्रकृत.

Epispastic, *a.* स्फोटजनक.

Epistle, *s.* पत्रं, लेखः, लेख्यं; 'epistolary correspondence' पत्रेण संवादः.

Epitaph, *s.* मृत्युलेखः, चैत्योपलिपि *f.*, स्मरणमंडनं.

Epithalamium, *s.* विवाहगीतं.

Epithem, *s.* प्रलेपः, उप-नाहः देह.

Epithet, *s.* विशेषणं, उपाधिः.

Epitome, *s.* संक्षेपः, सारः, संग्रहः, समाहारः, समसनं. **-ize**, *v. t.* संक्षिप् 6 P, समस् 4 U, संग्रह् 9 P, संह 1 P. **-izer,-ist**, *s.* संक्षेप्तृ *m.*, संग्रहकर्तृ *m.*

Epoch, *s.* कालः, युगं, अवधिः, निर्णीतकालः. **2** विशिष्टकालः. **3** शाकः, शकः.

Epode, *s.* उपगीतं-गानं.

Epopee, *See* Epic.

Equable, *a.* समान, निर्विकार, समचित्त-वृत्ति-भाव.

Equal, *a.* सम, समान, तुल्य, सदृश (शी *f.*), प्रतिमसंकाश-in comp.; (with instr. or gen. of person); *See* Like; 'to whom gold and a clod of earth are e.' समलोष्टकांचनः; the point of equality being in the instr. or loc.; समुद्रेण समो गांभीर्येण; 'to consider e.' तुलया धृ 1 P. **2** अनवर. **3** समवृत्ति-चित्त, निर्विकार. **4** पर्याप्त, अलं with inf. or dat.; क्लृप् 1 A (with dat.); 'he is e. to the task' तत्कार्यं साधयितुमलं सः, रक्षणाय कल्पते, &c. **-s.** समानपदस्थः, तुल्यपदभाज् *m.* **2** सवयस्कः, सवयस्यः, तुल्यवयस्; oft. by (*a.*). **-v. t.** तुल् 10 (तुलयति), (प्रासादास्त्वां तुलयितुमलं Me. 65), समीतुल्यी-कृ 8 U; oft. ex. by (*a.*); 'none can e. me in bravery' न कोपि शौर्येण मम समानः. **-ity**, *s.* साम्यं, समानता, तुल्यता, सादृश्यं, &c. **-ize**, *v. t.* समीकृ 8 U, तुल् 10. **-ly**, *adv.* समं, सदृशं, समानं, तुल्यं.

Equanimous, *a.* समचित्त-भाव-वृत्ति, निर्विकार. **-Equanimity**, *s.* समवृत्तिता-चित्तता, समभावः, समानवृत्ति *f.*

Equation, *s.* समीकरणं, साम्यं.

Equator, *s.* भूकक्षा, परिधिः, निरक्षः; 'celestial e.' व्योमकक्षा. **-ial**, *a.* निरक्ष in comp.; 'e. region' निरक्षदेशः.

Equery, *s.* मंदुरा, अश्व-वाजि-शाला. **2** अश्वपालः.

Equiangular, *a.* समकोण, समानाख्य.

Equestrian, *a.* अश्वीय, आश्विक (की *f.*). **-s.** आश्विकः, अश्वारोहः.

Equidistant, *a.* समानांतर.

Equilateral, *a.* समभुज.

Equilibrium, *s.* तुल्यता, समता, साम्यं. **2** तुल्यभारता, समतोलनं, समानभारत्वं; 'to be in e.' तुल्यं *a.* भू, तुलया धृ pass., समानभार *a.* भू.

Equinox, *s.* विषुवं, विषुवत् *n.*; 'the vernal e.' महाविषुवं, हरिपदं; 'the autumnal e.' विषुपदं, जलविषुवं. **-Equinoctial**, *a.* विषुवीय; 'e. line' विषुवद्वृत्तं, विषुमंडलं; 'e. point' अयनं.

Pore, *s.* रो(लो)मरंध्रं-कूपः. **2** (सूक्ष्म) रंध्रं, कूपः. **-***v. i.* अनन्यदृष्ट्या-साभिनिवेशं-अधी 2 A or वच् c. **-ous**, *a.* बहुरंध्र, रंध्रबहुल, रंध्रपूर्ण-विशिष्ट, सरंध्र. **2** रोमकूपमय (यी *f.*), स्वेदमार्गविशिष्ट, विरलावयवक. **-ousness**, **Porosity**, *s.* रंध्रबाहुल्यं, रंध्रविशिष्टता.

Pork, *s.* शूकर-वराह-मांसं. **-er**, *s.* शूकरः, वराहः.

Porpoise, *s.* शिशुकः, शिशुमारः, उलूपिन् *m.*

Porridge, *s.* यूषं, जूषं.

Porringer, *s.* यूषपात्रं-भाजनं.

Port, *s.* नौकाशयः, नौकाश्रयः, उत्तरणस्थानं, आश्रयः, रक्षणस्थानं, आशयः; 'arrived at the wished-for p.' इष्टदेशं जगाम. **2** द्वारं; *See* Door. **-able**, *a.* वहनीय, लघुभार, सुवाह्य, लघु, सुखवाह्य, हस्तवाह्य. **-er**, *s.* द्वाःस्थः, द्वारपालः, प्रतीहारः, दौवारिकः. **2** भारवाहः, भारहरः, वोढृ *m.*, भारिकः. **-erage**, *s.* भारवहनं. **2** वहनमूल्यं. **-Portal**, *s.* द्वारं, मुखं, प्रवेशद्वारं; *See* Door.

Portend, *v. t.* अग्रे (अनिष्टं) सूच् 10 or निविद् c. or शंस् 1 P. **—Portent**, *s.* उत्पातः, दुर्निमित्तं, अशुभलक्षणं, अजन्यं, उपसर्गः, दुर्लक्षणं, दुश्चिह्नं, अपशकुनं, कुलक्षणं; अत्याहितं, उपप्लवः, अरिष्टं, अद्भुतं. **2** पूर्व-चिह्न-लक्षणं. **-ous**, *a.* उत्पात-अनिष्ट-अशुभ-शंसिन्, अद्भुत; अत्याहित, औपसर्गिक-औत्पातिक (की *f.*). **-ously**, *adv.* सोत्पातं, दुर्लक्षणपूर्वं.

Portfolio, *s.* पत्राधारः.

Porthole, *s.* नौपार्श्वमुखं.

Portico, *s.* *See* Porch.

Portion, *s.* अंशः, वि-,भागः, खंडः-ंडं, छेदः, शकलः-लं. **2** अंशः, वंटः, उद्धारः, वि-,भागः; 'p. of an estate' दायः, रिक्थभागः, उद्धारः; 'wife's p.' स्त्रीधनं, यौतकं, औद्वाहिकं. **-***v. t.* विभज् 1 U, वंट् 10, विभागशः क्लृप् c. **2** शुल्कं-वृत्तिं दा 3 U. **-ing**, *s.* विभागः, भागकल्पनं, वंटनं. **-less**, *a.* अनंश, अंशहीन.

Portly, *a.* गौरवगति-वृत्ति, उदात्त, धीर, धीरदर्शन, भंभीराकृति. **2** स्थूल, बृहत्, स्थूलकाय, पृथूदर, पीन, पीवर. **-iness**, *s.* स्थूलकायत्वं, शरीरगौरवं.

Portmanteau, *s.* चर्ममंजूषा-पेटकः.

Portray, *v. t.* आ-,लिख 6 U, चित्र् 10, वर्ण् 10. **2** उप-,वर्ण्, कृत् 10. **-Portrait**, *s.* चित्रं, आलेख्यं, प्रतिकृति *f.*, प्रतिमा; *See* Picture; 'p.-painter' चित्रक(का)रः.

Pose, *v. t.* स्तंभ् 9 P, मुह् c., निरुत्तरीकृ 8 U, कुंठ् 10.

Position, *s.* प्रतिज्ञा, उक्ति *f.*, हेतुः, पक्षः, उपन्यासः; 'wrong p.' पक्षाभासः, हेत्वाभासः. **2** स्थिति *f.*, स्थानं, पदं, आस्पदं, पदवि-वी *f.* **3** प्रतिष्ठा, गौरवं. **4** अवस्था, दशा, आकारः, संस्थानं, भावः, वृत्ति *f.*; 'attain the p. of' पदं या P, (यांत्येवं गृहिणीपदं युवतयः S. 4); 'holding the p. of mistress of the house' गृहिणीपदभाक्, गृहिणीपदे स्थिता; 'give the p. of' पदं ग्रह् c., भावं गम् c., (महिषीपदं ग्राहिता, देवीभावं गमिता); 'p. in life' स्थितिः, निसर्गजातिः, अवस्थानं.

Positive, *a.* स्पष्ट, असंदिग्ध, अगूढ, प्रत्यक्ष, व्यक्त, अवक्र, परिस्फुट, साक्षात् *ind.*; 'reply in the p.' भवतु-वाढं-तथा-इति वद् 1 P. **2** अवश्यक, अवैकल्पिक (की *f.*), अविशंक्य; *See* Peremptory. **3** सु-,नियत, निश्चित, निर्णीत, निर्दिष्ट. **4** सत्य, तथ्य, यथार्थ, वास्तविक-तात्त्विक (की *f.*). **5** विविक्त, केवल, अनन्यसंबद्ध. **6** दृढ-कृत-निश्चय, दृढमति-संकल्प, निर्विकल्प, निःसंदेह; मताभिमानिन्, स्वमताग्रहिन्, दृढोक्ति; 'a p. quantity' धनं (opposed to ऋणं क्षयः, व्ययः, हानिः). **-ly**, *adv.* स्पष्टं, व्यक्तं, असंदिग्धं, साक्षात. **2** अवश्यं, निर्विकल्पं, अविचार्य. **3** सुनिश्चितं, नियतं, नूनं, खलु. **4** वस्तुतः, तत्त्वतः, परमार्थतः, सत्यं, यथार्थतः. **5** सुनिश्चयेन, दृढनिश्चयपूर्वं. **6** मताग्रहेण, मताभिमानेन, दृढोक्त्या. **-ness**, *s.* स्पष्टता, असंदिग्धता, दृढनिश्चयः-निर्णयः, तथ्यता, याथार्थ्यं, मताग्रहः, दृढोक्ति *f.*, &c.

Possess, *v. t.* धृ 1 P, 10, धा 3 U, भृ 3 U. **2** भुज् 7 U, अधि-ष्ठा 1 P, अध्यास् 2 A, सेव् 1 A; better by वत्, मत, इन् &c.; *See* below. **3** आप् 5 P, लभ् 1 A, अधिगम् 1 P; *See* Get. **4** अधिकृ 8 U, प्रभू 1 P, अधि ष्ठा, पदं कृ. **5** आविश् 6 P, आक्रम् 1 U, 4 P, उपसृज् 6 P, बाध् 1 A, उपहन् 2 P, ग्रस् 1 A, व्याप् 5 P, oft. ex. by 'p. ed'. **-ed**, *a.* धृत, भुक्त, अधिष्ठित, अध्यासित, अधीन, हस्तगत. **2** प्राप्त, लब्ध, अधिगत. **3** आविष्ट, आक्रान्त, उपसृष्ट, ग्रस्त, उपहत. **4** (By spirits) भूताविष्ट, भूतोपसृष्ट, वेतालोपहत, भूतग्रस्त. **5** (Having) युक्त, युत, उपेत, संपन्न, उपपन्न, अन्वित, सनाथ, शालिन् in comp.; by वत्, मत, इन्, विन् affixed, or by Bah. comp. **-ion**, *s.* भोगः, भुक्ति *f.*, अधिकारः, आवेशः, आक्रमः-मणं, आत्मसात्करणं; 'to take p. of' आक्रम्, आविश्, स्वायत्तीकृ, आत्मसात्कृ; पदं कृ or वि-धा; *See* Enter; 'to put in p.' अधिकृ c., अधिकारं दा, नियुज् 7 A, 10; 'being in one's p.' स्वाधीन, हस्तगत, वशवर्तिन्. **2** संपन्नता, युक्तत्वं, सनाथता; वत्त्व, शालिता in comp.; 'p. of wealth' धनवत्त्व, सधनता. **3** आवेशः, उपसर्गः, बाधा, पीडा; भूतावेशः, भूतपीडा-बाधा-संचारः. **4** द्रव्यं, स्वं वस्तु, स्वाधीनं द्रव्यं; (p. s) द्रव्यजातं, वस्तुजातं, द्रव्याणि, वस्तूनि, वित्तं, विभवः, द्रविणं, अर्थः; क्षेत्रादि, भूमि *f.*, (landed). **-ive**, *a.* संबंध in comp.; 'p. case

षष्ठी. -OR, *s.* भोक्तृ *m.*, भोगिन् *m.*, स्वामी, अधिकारी, शाली-धारी- in comp.

POSSIBLE, *a.* शक्य, साध्य, संभाव्य; gen. ex. by pot. pass. part.; 'not p. to be united' दुःसंधेय; 'p. to be done' करणीय, संपाद्य, साध्य; oft. by शक् pass.; 'to be p.' संभू 1 P, (सर्वं सौदामिन्यां संभाव्यते Mal. 1), उपपद् 4 A, घट् 1 A; उभयथापि घटते (V. 3) 'it is p. in both ways' (both sides are p.); 'as far as p.' यावच्छक्यं, यथाशक्ति. -POSSIBILITY, *s.* संभवः, शक्यता, संभाव्यता, उपपत्ति *f.*, घटना, संगति *f.* -POSSIBLY, *adv.* Ex. by शक्यं or शक् pass. **2** कदाचित्, कदापि, नाम, by pot. mood ; *See* PERHAPS. **3** (In questions) इव, नाम, वा; 'who p. that is dead, is not born again' मृतः को वा न जायते (P. I. 1).

POST, *s.* स्तंभः, स्थाणुः, स्थूणा, उपस्तंभः; 'p. for securing an elephant' आलानं, बंधस्तंभः; 'p. for tethering cattle' शिवकः, कीलकः, मेधिः-थिः, खलेदारु *n.* **2** पदं, अधिकारः, नियोगः, अधिकारपदं. **3** स्थानं, स्थलं, आस्पदं, अवस्थानं, स्थिति *f.*, पदवी. **4** गुल्म-सैन्य-स्थानं. **5** पत्रवाहः, पत्रवाहनसाधनं; 'p.-boy' जवाश्वपालः ; 'p.-chaise' जवरथः-वाहनं ; 'p.-haste' सवेगं, अतिजवेन, जवाश्ववत्; 'p.-horse' जवाश्वः, जवतुरगः; 'p.-man' पत्र-लेख-वाहः-हारः; 'p.-master' पत्रस्थानाधिकारी, पत्रवाहाध्यक्षः; 'p. office' पत्रस्थानं-गृहं. -*v. t.* स्था c. (स्थापयति), सं-प्रति-°, नियुज् 7 A, 10. **2** स्तंभे बंध् 9 P. **3** पत्रस्थाने निविश c. or क्षिप् 6 P. **4** प्रकाश् c., आसंज् c. -*v. i.* जवेन गम् or व्रज् 1 P; 'p. up' अवबुध् c.; 'p. off' व्याक्षिप् 6 P, विलंब् c. -AGE, *s.* पत्रवाहनमूल्यं. -ER, *s.* जवनः, जवः, जवाश्वः, प्रजवी. -POSTILION, *s.* जवाश्वारूढः.

POST-DATE, *v. t.* पश्चात् तिथिं लिख् 6 P.

POST-DILUVIAN, *a.* प्रलयोत्तरकालीन.

POSTERIOR, *a.* पश्चात्-उत्तर-कालीन, उत्तर, अपर अवर, अर्वाच्. -ITY, *s.* परता, उत्तरता. -LY, *adv.* पश्चात्, उत्तरं-रतः, परतः, परस्तात्. -POSTERIORS, *s.* नितंबः; गुदप्रदेशः.

POSTERITY, *s.* संतति *f.*, अपत्यं, संतानः, वंशः, प्रजा, पुत्रपौत्रादयः.

POSTERN, *s.* पक्षद्वारं, पक्षकः.

POSTHUMOUS, *a.* मरणादनंतरं प्रकाशित, मृत्युत्तरजात.

POST-MERIDIAN, *a.* अपराह्णतन (नी *f.*), पराह्णकालिक (की *f.*).

POST-MORTEM, *a.* मरणोत्तर, मृत्युत्तर.

POST-NATAL, *a.* जन्मोत्तर.

POSTPONE, *v. t.* व्याक्षिप् 6 P, विलंब् c.; (नियतकालं यावत्) न्यज् 1 P, विसृज् 6 P. -MENT, *s.* व्याक्षेपः, विलंबः.

POST-SCRIPT, *s.* अनुलेखः.

POSTULATE, *s.* स्वीकृतपक्षः, गृहीतपदं, परिग्रहः. -*v. t.* परिग्रह् 9 P, स्वीकृ 8 U.

POSTURE, *s.* सं-,स्थिति *f.*, संस्थानं, संस्था, अंगविन्यासः-स्थितिः; आसनं, बंधः; वीरासनं, कमलबंधः &c.; 'in a sitting p.' आसीन, उपविष्ट. **2** Condition, q. v.

POSY, *s.* कुसुमस्तबकः, पुष्पगुच्छः. **2** अंगुलीयकलेखः.

POT, *s.* घटः, कलसः-शः, कंभः, पात्रं, भाजनं, भांडं; 'cooking-p.' स्थाली, उखा, पिष्टपचनं, कजीवं, पिठरः; 'p.-bellied' तुंदिल, लंबोदर, पिचिंडिल, तुंदिन्; 'p.-belly' पिचिंडः, लंबोदरं; 'p.-companion' पानमित्रं-सुहृद्, सहपायी; 'p.-house' शुंडा, पानं; 'p.-sherd' घटशकलं, भिन्नपात्रं. -TER, *s.* कुंभकारः, कुलालः, घटकारः, चक्रिन् *m.* -TERY, *s.* कुंभ-घट-स्थानं. **2** कौलालकं, मार्तिकं, मृद्भांडानि.

POTASH, *s.* सर्जिका, क्षारः; *See* NATRON.

POTATION, *s.* पानं, सपीति *f.*, तुल्यपानं.

POTATO, *s.* गोलालुः.

POTENT, *a.* प्रबल, सप्रभाव, वीर्यवत्, सप्रताप, शक्तिमत्, प्रभविष्णु; *See* STRONG. -ATE, *s.* अधिपतिः, नरेश्वरः, प्रभुः; *See* KING. -LY, *adv.* प्रबलं, सप्रतापं, बलवत्.

POTENTIAL, *a.* शक्य, उपपन्न, संभवनीय; (mood) विधिलिङ्. -ITY, *s.* शक्यता, संभाव्यता.

POTHER, *See* BUSTLE, PERPLEX.

POTHERB, *s.* शाकः, हरितकं, शिग्रुः.

POTION, *s.* अगदः, पानं, पेयौषधं.

POTTAGE, *s.* जूष.

POTULENT, *a.* आमत्त. **2** पानयोग्य.

POUCH, *s.* स्यूतः, प्रसेवः, कोशः-षः. **2** लंबोदरं. **3** पेशि-शी *f*, उपजठर. -*v. t.* कोशे निविश् c. or नि-धा 3 U.

POULTERER, *s.* वैतंसिकः, शौनिकः, पक्षिविक्रयी.

POULTICE, *s.* उपनाहः, प्र-,लेपः. -*v. t.* उपनाहं दा 3 U.

POULTRY, *s.* गृहपक्षिणः; 'p. yard' कुक्कुटादिस्थानं.

POUNCE, *v. i.* अवपत्य ग्रह् 9 P, सहसा अवपत् 1 P or अवस्कंद् 1 P or आक्रम् 1 U, 4 P. -*s.* नखः, नखरः. **2** मसीशोषणचूर्णं.

POUND, *s.* (For cattle) अवरोधः, अवरोधस्थानं, व्रजः, गोष्ठं. -*v. t.* सं-, चूर्ण् 10, मृद् 9 P, पिष् 7 P, क्षुद् 7 P, खंड् 10; 'p. to dust' चूर्णशः कृ, चूर्णपेषं पिष्, चूर्णीकृ 8 U. **2** (व्रजे) नि-अव-रुध् 7 U, or बंध् 9 P. **3** तड् 10, तुद् 6 P, प्रह् 1 P. -AGE, *s.* शुल्कं, राजस्वं. -ER, *s.* पेष्टृ *m.*, पेषणः. **2** मुसलः-लं, अयोग्रं, मुद्गरः. -ING, *s.* चूर्णनं, पेषणं, मर्दनं, खंडनं.

POUR, *v. t.* पत् c., नि-,सिच् 6 P, प्र-,क्षु c.; 'p.

water in ' जलेन पृ 3, 9 U, सिच्. 2 (Out, forth) प्र-निर्-मुच् 6 P, उत्-वि-सृज् 6 P, अवपत् c., अवतृ c., निःसृ c., उत्क्षिप् 6 P, उद्-गृ 6 P, उदीर् c., उद्वम् 1 P, वृष् 1 P, प्र-वि-कृ 6 P; निर्वृष्, निर्गल् c.; ' which has p.ed out its watery contents ' निर्गलितांबुगर्भः, पानीयरिक्तोदरः (घनः); ' p. out the water from the pot ' पात्रं जलरिक्तं कुरु; ' p. ed forth arrows ' शरवृष्टिं मुमोच; ' p. one's soul to another ' अन्यस्मै स्वमनोगतं सर्वात्मना निविद् c. —*v. i.* स्रु 1 P, प्र-पारि-°, प्र-,स्यंद् 1 A, अच्युत् 1 A, जलं स्रु c. or प्रवह् 1 P. 2 वृष्, निर्गल् 1 P. 3 निःसृ 1 P, निर्गम् 1 P, निः-स्रु; ' rain p. ed down in torrents ' धारासारैर्मेहतां वृष्टिर्बभूव (H. 3); ' p. in upon ' समापत् 1 P, अभिद्रु 1 P बहुशः आपत् or आक्रम् 1 U, 4 P. —ER, *s.* स्रावकः, सेचकः, सेक्तृ *m.* —ING, *s.* सेकः, स्रावः, स्रवः, श्योतः

POUT, *v. i.* (क्रोधात्) ओष्ठौ प्रसृ c. or दृश् c. 2 उन्नत-उच्छ्रित -*a.* भू 1 P. —*s.* क्रोधावेशः.

POVERTY, *See* under POOR.

POWDER, *s.* चूर्णं, पिष्टं, क्षोदः; ' gun-p. ' आग्नेयचूर्णं ' perfumed p.' वासयोगः, पिष्टातः-तकः, पटवासकः —*v. t.* ' to reduce to p. ' चूर्णं 10, क्षुद् 7 P, चूर्णीकृ, पिष् 7 P; *See* POUND. 2 चूर्णेन लिप् 6 P or भू c. or मिश्र् 10. —Y, *a.* पांशुल, चूर्णवत्, चूर्णमय (यी *f.*), सचूर्ण, सक्षोद.

POWER, *s.* शक्ति *f.*, सामर्थ्यं, बलं, प्रभावः, वीर्यं ऊर्जः, सहस्-ओजस् *n.*, विभवः (वाग्विभवः); (martial) तेजस् *n.*, वि-परा-क्रमः, शौर्यं. 2 (Ability) शक्तिः, क्षमता, धीशक्तिः; ' p. of thinking ' विचारणाशक्तिः; ' according to one's p. ' यथाशक्ति-बलं, यावच्छक्यं 3 (Influence) प्रभुत्वं, प्रभावः यशः-शं, बलं, गौरवं, अधिकारः; आधिपत्यं, ईशत्वं, सत्ता, ऐश्वर्यं, अधीनता. 4 अधिपः-पतिः, अधीशः प्रभुः. 5 (Legal) अधिकारः, or by अर्ह् 1 P. 6 अधिकारिजनः, अधिकृतः. 7 घातः. 8 सेना, बलं चतुरंगिणी; ' have or exercise p. over ' प्रभू 1 P, ईश् 2 A (with gen.), वशीकृ, आयत्तीकृ, आत्मवशं नी 1 P; ' in (under) the p. of ' वशे अधीन, आयत्त, तंत्र in comp.; ' fallen into another's p. ' परहस्तगत; ' to be in one's p. ' ex. by शक् 5 P or by (*s.*). —FUL, *a.* बलसामर्थ्य-वत्, शक्त, बलिन्, सबल, प्रबल, ऊर्जस्वल, ओजस्विन्, शक्तिमत्, ऊर्जितसत्त्व, बलाढ्य, सप्रभाव, प्रभविष्णु. 2 शूर, वीर, विक्रांत, तेजस्विन्, महाप्रताप, प्रतापवत्, धामवत्, उरुविक्रम. 3 (Medicine) वीर्यवत्, अमोघ, गुणावह, प्रबल, अलंतम. 4 दृढ, प्रतीतिकारिन्, प्रबल. —FULLY, *adv.* बलवत्, प्रबलं, सप्रभावं, अत्यंतं. —FULNESS, *s.* प्राबल्यं, शक्तत्वं. —LESS, *a.* निर्बल, शक्तिहीन, अशक्त, अबल, निष्प्रभाव, असमर्थ, अक्षम. —LESSNESS, *s.* अशक्ति *f.*, असामर्थ्यं.

POX, *s.* Small-pox, q. v. 2 उपदंशः.

PRACTICE, *s.* प्र-आ-चारः, संप्रदायः, व्यवहारः, रीति *f.*, मार्गः, पद्धति *f.*, क्रमः, वृत्तिः *f.* 2 अभ्यासः, क्रिया प्रबंधः-सातत्यं, नित्यवृत्तिः-चर्या-अनुष्ठानं, अनुशीलनं,-निरंतरप्रवृत्तिः, आवृत्तिः; ' does not require p. ' नाभ्यासक्रममीक्षते. 3 क्रिया, आचारः, आचरणं, कर्म, कृति *f.*, व्यापारः, व्यवसायः; करणं, विधानं, अनुष्ठानं; (execution) प्रवृत्तिः, प्रचारः, व्यवहारः; ' bring or put into p. ' प्रवृत् c., व्यवह c.; ' has long been in p. ' चिरप्रवृत्त. 4 (Opp. of theory) प्रयोगः. 5 छलं, व्याजः, कैतवं ; *See* FRAUD; ' ancient p. ' वृद्धाचारः, वृद्धपरंपरा; ' family p. ' कुलसंप्रदायः, कुलधर्मः, कुलाचारः; ' local p. ' देशाचारः ; ' good p. ' सदाचारः ; ' following good p.s' सदाचार, सद्वृत्ति, सद्वृत्त, साधुवृत्त; ' bad p. ' दूराचारः, कुमार्गः, दुर्वृत्तिः; ' following bad p. s ' दुर्वृत्त, दुराचार; 'p. of medicine ' वैद्यक्रिया-उपचारः, चिकित्सा, भेषजप्रयोगः, उपक्रमः; ' p. of arms ' शस्त्राभ्यासः, शस्त्रचर्या; ' p. of law ' व्यवहारः, व्यवहाराभ्यासः; ' p. in archery ' शराभ्यासः, उपासनं. —PRACTISE, *v. t.* अभ्यस 4 U, नित्यं कृ 8 U. &c. 2 आचर् 1 P, अन-प्र 1P, कृ, वि-धा 3U, आ-स्था 1 U. 3 प्र-उप-युज् 7 A, 10, प्रवृत् c., व्यवह c., सेव् 1 A, आप्ति 1 U, आ-अव-लंब् 1 A; ' what profession do you p. ' कां वृत्तिमुपजीवत्यार्यः (Mr. 2). —*v. i* शाठ्येन आचर or व्यवह 1 P, छलं-कपटं-कृ. —ED, *a.* अभ्यस्त, आचरित, अनुष्ठित, कृत, सेवित, &c. 2 अभिज्ञ, परिचयवत्, बहुदृष्ट, व्यवहारज्ञ, दृष्टकर्मन, पक्वबुद्धि, ज्ञानवृद्ध, जाताभ्यास; also ex. by (*s.*). —ING, *a.* अभ्यासिन्, सेविन्, शालिन्, in comp.; आस्थित, आश्रित. —PRACTICABLE, *a.* करणीय, कर्तुं शक्य, साध्य, संभाव्य, शक्य, सुकर, सुखसाध्य, उपपाद्य. —PRACTICAL, *a.* अभ्यासिक-व्यवहारिक (की *f.*), अभ्याससिद्ध-प्राप्त, आचार-व्यवहार in comp.; ' p. knowledge ' व्यवहारज्ञानं, लौकिकज्ञानं. 2 अभ्यासक्षम, व्यवहार्य, प्रयोज्य, प्रवर्तनीय, व्यवहारोचित; ' a p. scheme ' व्यवहारोचित उपायः; ' he is a p. teacher ' स शिक्षणप्रयोगनिपुणः. 3 व्यवहारज्ञ, दृष्टकर्मन्, अभिज्ञ ; *See* PRACTISED. —LY, *adv.* कार्यतः, अर्थतः, वस्तुतः, परमार्थतः, व्यवहारतः, फलापेक्षया. 2 अभ्यासेन, व्यवहारेण. —PRACTITIONER, *s.* सेविन्, व्यवसायी, व्यापारी, वृत्ति, आजीव in comp. 2 वैद्यः, वैद्यवृत्तिः, चिकित्सकः. 3 व्यवहारज्ञः, व्यवहारदर्शिन्-निपुणः.

PRAGMATIC,-AL, *a.* परकार्यचर्चक, अनधिकारव्यापारिन् ; *See* MEDDLE, &c.

PRAISE, *v. t.* प्रशंस् 1 P, श्लाघ् 1 A, ईड् 2 A, नु 2 P, स्तु 2 U, वर्ण 10, गै 1 P, कृत् 10, वि-प्र-°

ख्या 2 P or c. (ख्यापयति), पस् 1 P, नू 6 P. —*s.* प्र-,शंसा, श्लाघा, स्तुति *f.*, स्तवः, वर्णनं-ना, कीर्तनं, नुति *f.*, ईडा, स्तोत्रं. —ER, *s.* प्रशंसकः, स्तावकः, वर्णकः, वंदारुः. —PRAISEWORTHY, *a.* प्रशस्य, प्रशंसार्ह, श्लाघ्य, स्तुत्य.

PRANCE, *v. i.* प्लु 1 A, वल्ग् 1 P, नृत् 4 P. —ING, *s.* प्लुतं, वल्गितं, प्रवनं.

PRANK, *s.* क्रीडा, चेष्टा, चापलं, लीला, छंदः-दस् *n.*; 'idle p.' वानर-मर्कट-चेष्टा-क्रीडा; 'mischievous p.' कु-दुः-चेष्टितं. —*v. t.* दंभार्थं भूष् 10 or अलंकृ 8 U. —ISH, *a.* कुचेष्ट, चपल, क्रीडाशील.

PRATE, PRATTLE, *v. i.* प्र-,लप् 1 P, प्र-,जल्प् 1 P, अनर्थकं वद् 1P or भाष् 1 A. —ER, *s.* वाचाटः, वाचालः, जल्प(ल्पा)कः, वावदूकः, बहुभाषिन्. —ING, *s.* प्रलापः, प्रलपितं, प्र-,जल्पः-ल्पितं-ल्पनं; बालालापः, बालभाषणं-प्रलापः.

PRAVITY, *s.* भ्रष्टता, विक्रिया, विकारः.

PRAY, *v.* (A deity) स्तु 2 U, प्र-आभि-सं-°, नमस्यति (D.), अभिवद् c., आराध् c., प्रणम् 1 P; (मनसा) पूज् 10, उपास् 2 A, ध्यै 1 P, चिंत् 10. 2 आशंस् 1 A. 3 याच् 1 A, प्र-अभि-अर्थ् 10 A; विज्ञा c. (ज्ञापयति); gen. ex. by अर्ह् 1 P with inf.; *See* PLEASE; '1 p. you tell me' मह्यं कथयितुमर्हति भवान्. 4 (Lowly) जप् 1 P. —ER, *s.* स्तवः, स्तोत्रं, प्रार्थना-नं, नमस्या, उपासना, पूजा; (mental) ध्यानं, आवाहनं; (low) जपः, स्वाध्यायः. 2 याचा, प्रार्थना, अभ्यर्थना, विज्ञप्ति *f.*, विज्ञापना. —FUL, *a.* प्रार्थनाशील, भजनपरायण.

PREACH, *v. t.* उदार् c., उद्-घुष् 10, उच्चर् c., प्र-ख्या c. (ख्यापयति), प्रकाश् c., प्रवद् 1 P, कृत 10. —*v. i.* धर्मं प्रवच् 2 P or शास् 2 P or उपदिश् 6 P. —ER, *s.* उपदेशकः, प्रवक्तृ *m.*, प्रचारकः, धर्मशासकः, धर्मोपदेशी. 2 घोषकः, प्रख्यापकः. —ING, *s.* वि-,घोषणं-णा, प्रख्यापनं, धर्मोपदेशः, धर्मशासनं, प्रवचनं, उपदेशः.

PREAMBLE, *s.* उपोद्घातः; *See* INTRODUCTION.

PREBEND, *s. See* CANON.

PRECARICOUS, *a.* संदिग्ध, अनिश्चित, अनिर्णीत, अनियत, अस्थिर, अध्रुव. 2 पराधीन, परायत्त, अस्वतंत्र; *See* DOUBTFUL, DANGEROUS. —LY, *adv.* संदिग्धं, अनियतं. —NESS, *s.* अनियतत्वं, अन्याधीनता.

PRECATIVE, PRECATORY, *a.* याचक, प्रार्थनात्मक; 'p. mood' आशीर्लिङ्.

PRECAUTION, *s.* पूर्वोपायः, निवारणोपायः, पूर्व-समीक्षा-चिंता, पूर्वावधानं, पूर्वप्रबोधः; 'take p. s' पूर्वमेव उपायं समीक्ष् 1 A or चिंत् 10; 'hence I give you this p.' अतस्त्वामेवं प्रबोधयामि. —ARY, *a.* पूर्वोपायरूप; by (*s.*).

PRECEDE, *v. t.* पूर्वं-अग्रे-पुरतः गम्-सृ-चर् 1 P or इ-या 2 P or वृत् 1 A or स्था 1 P; oft. ex. by पूर्वं, प्राक्, प्रथमं, ततः, अनंतरं; 'the flower p. s the fruit' उदेति पूर्वं कुसुमं ततः फलं, so घनोदयः प्राक् तदनंतरं पयः (S. 7.); 'visarga p. ed by अ' अपूर्वः विसर्गः; 'many kings p. ed Râma' रामात् पूर्वं बहवो नृपाः समजायंत. 2 (In rank) अग्रपदे वृत्, अग्रमानं अर्ह् 1 P. —ENCE, *s.* अग्रगमनं, पुरःसरणं. 2 अग्र-श्रेष्ठ-पदं, पुरस्कारः, उत्कर्षः, प्राधान्यं, अग्रत्वं, अग्रणीत्वं, आग्रमानः-पूजा, मुखरता, श्रेष्ठत्वं, प्राथम्यं. —ENT, *s.* (पूर्वं) निदर्शनं, उदाहरणं, आदर्शः, प्रतिमा, प्रमाणं, दृष्टांतः; 'having no p.' अप्रतिम. —*a.*, —ING, *a.* पूर्व-अग्र-गामिन्, अग्रग, पूर्वग, पूर्व, अग्र, प्रथम, अग्रे-पुरः-सर. —ENTED, *a.* भूत-दृष्ट-पूर्व, दृष्टप्रतिम; 'un-p.' अप्रतिरूप, निरुपम, अतुल.

PRECENTOR, *s.* मुख्यगायकः, गायकाग्रणीः.

PRECEPT, *s.* नियोगः, आ-नि-देशः, अनु-,शासनं, अनुज्ञा, विधिः, नियमः, प्र-,चोदनं-ना, कल्पः, आज्ञा, स्थिति *f.*, मर्यादा. 2 वचनं, उपदेशः; 'moral p. s' नीतिवचनानि; 'religious p.' धर्मानुज्ञा, धर्मशासनं; 'example is better than p.' शासनात् करणं श्रेयः, वाचः कर्मोतिरिच्यते. —IAL,-IVE, *a.* वैधिक-नैयमिक (की *f.*), विधिरूप, (*s.*) in comp. —OR, *s.* गुरुः, शिक्षकः, उपदेशकः, आचार्यः, अध्यापकः, उपाध्यायः.

PRECESSION, *s.* अग्रगति *f.*; 'p. of the equinoxes' अयनचलनं, क्रांतिपातगति *f.*

PRECINCT, *s.* सीमा, पर्यंतः, मर्यादा, अवधिः, परिसरः, उपांतं, उपकंठं, समंतदेशः.

PRECIOUS, *a.* महार्घ, महा-बहु-मूल्य, अनर्घ्य, अमूल्य, उत्कृष्ट, बहुमत, गुरु, परम; 'p. stone' उपलरत्नं, अमूल्यरत्नं, रत्नं, मणिः. —NESS, *s.* महार्घता, बहुमूल्यं.

PRECIPICE, *s.* प्रपातः, भृगुः, अतटः. —PRECIPITOUS, *a.* पातुक, विषम, प्रवण, अवसर्पिन्. 2 Rash, q. v.

PRECIPITATE, (PRECIPITANT) *a.* अवाङ्मुख (खी *f.*), अधोमुख, अवाक्शिरस्. 2 असमीक्ष्य-क्षिप्र-अविमृश्य-कारिन्, साहसिन्, साहसिक (की *f.*); (act) सरभस, अविमृष्ट, अतिक्षिप्र, साहस in comp. —*v. t.* रभसा अधः क्षिप् 6 P or पत् c. 2 सरभसं प्रवृत् c. or प्रोन्मह् c., त्वर् c. (त्वरयति). —*v. i.* अव-अधः-पत् 1 P, नि-सद् 1 P. 2 (Fig.) अविचार्य-सरभसं-व्याप् 6 A or c. —LY, *adv.* अवाक्, अवाक्शिरसा, अधोमुखेन. 2 अविमृश्य, असमीक्ष्य, सहसा, साहसेन, अतिक्षिप्रं, सरभसं. —ION,-NESS, *s.* अधःपातनं-क्षेपणं, अवपातनं. 2 साहसं, साहसिकता, क्षिप्रकारिता, असमीक्ष्य-अविमृश्य-कारिता. —PRECIPITANCE, *s.* साहसं; *See* above.

PRECIS, *s.* सारः, संक्षेपः, संग्रहः.

PRECISE, *a.* नियत, निर्दिष्ट, निश्चित, परिच्छिन्न, यथार्थ, विशेष in comp.; *See* EXACT. 2 व्यक्त, स्फुट,

सूक्ष्म. 3 (Of persons) सामयिक (की *f.*), समयानुवर्तिन्, संकेतानुरोधिन्, सूक्ष्मनियमनिष्ठ. -LY, *adv.* नियतं, यथार्थं, सूक्ष्मतया ; oft. by एव ; 'at noon p.' मध्याह्नसमये एव ; 'p. so' एवमेव. -ION, -NESS, *s.* नियतत्वं, निर्देशः, सूक्ष्मता, सुनिश्चितता, याथार्थ्यं, व्यक्तता, &c.

PRECLUDE, *v. t.* निरु c., नि-प्रति-षिध् 1 P, नि-प्रति-रुध् 7 U, बाध् 1 A, प्रतिबंध् 9 P; *See* OBSTRUCT. -PRECLUSION, *s.* प्रतिबंधः, निवारणं, नि-प्रति-षेधः, निरोधः. -PRECLUSIVE, *a.* निवारक, प्रतिबंधक, निरोधक.

PRECOCIOUS, *a.* अकालपक्व-परिणत-प्रौढ. 2 बाल-प्रौढ-पक्व. -NESS,-PRECOCITY, *s.* अकालपरिणति *f.* -प्रौढता, बालप्रौढि. *f.*

PRECOGITATE, *v. i.* पूर्वं-अग्रे चिंत् 10 or विचर् c. or विमृश् 6 P.

PRECOGNITION, *s.* पूर्वज्ञानं-बोधः.

PRECONCEIVE, PRECONCERT, *v. t.* पूर्वं चिंत् 10 or क्लृप् c. or वि-भू c. -ED, *a.* पूर्वकल्पित-निर्धारित, पूर्वघटित-निर्णीत. -ION, *s.* अग्र-पूर्व-कल्पना-बोधः-ज्ञानं ; पूर्वघटनं-संकेतः.

PRECURSOR, *s.* पूर्वगः, अग्रेसरः, अग्रयायी, पुरःसरः; *See* HARBINGER. 2 पूर्वलक्षणं-चिह्नं-लिंगं. -Y, *a.* पूर्वग, पुरःसर, अग्रवर्तिन्.

PREDATORY, *a.* दस्युवृत्ति, अपहारक, उपद्रविन्, लुंठक, चौर in comp.

PREDECESSOR, *s.* पूर्वगः, पूर्वाधिकारिन् *m.*

PREDESTINATE, PREDESTINE, *v. t.* पूर्वं-अग्रे-निरूप् 10 or प्ररूप् c. or निर्दिश् 6 P. -ED, *a.* अग्र-पूर्वं-निर्दिष्ट-निरूपित, भाविन्, दैवाधीन, दैवायत्त, दैष्टिक (की *f.*). -ION, *s.* अग्रनिरूपणं-निर्देशः. 2 दैववादः, दैवपरता, अदृष्टप्रारब्ध-वादः, दैष्टिकता. -PREDESTINARIAN, *s.* दैवपरः, दैव-अदृष्ट-वादी, यदृच्छिकः, दैवायत्तः, दैष्टिकः.

PREDETERMINE, *v. t.* पूर्वं-अग्रे-निश्चि 5 U or निर्णी 1 P. -ATE,-ED, *a.* पूर्वनिश्चित-निर्णीत. -ATION, *s.* पूर्वं-अग्र-निश्चयः-संकल्पः-निर्णयः.

PREDIAL, *a.* क्षेत्र, भूमि in comp.

PREDICAMENT, *s.* पदार्थः ; वर्गः, जाति *f.* 2 अवस्था, दशा, वृत्ति *f.*, भावः, स्थिति *f.* ; कष्टावस्था, दुःस्थितिः, कृच्छ्रं.

PREDICATE, *v. t.* उद्दिश्य वद् 1 P or वच् 2 P or कथ् 10 or अभि-धा 3 U ; विशिष् 7 P or c., वि-धा, निर्दिश् 6 P. -*s.* विधेयं, वाच्यं, विशेषणं. -ION, *s.* विधानं, विशेषणं, निर्देशः, अभिधानं. -PREDICABLE, *a.* वाच्य, अभिधेय.

PREDICT, *v. t.* पूर्वं-अग्रे-कथ् 10 or वच् 2 P or निरूप् 10, आ-समा-दिश् 6 P; कथ्, वद् 1 P, with words for 'Future,' q. v.; 'p. ed that she would be the sole wife of Hara' तां समादिदेशैकवधूं भविनीं...हरस्य (K. I. 51); कथयत्यागामिनमर्थं (Ka. 46) 'p. s (unforeseen) events'. -ION, *s.* अनागतकथनं, भाविकथनं, आ-समा-देशः, भविष्यद्वादः. -OR, *s.* पूर्वंवदिन् *m.*, अग्रनिरूपकः, सिद्धः आदेष्टा.

PREDILECTION, *s.* पक्षपातः, पूर्वस्नेहः, अनुरागः; *See* PARTIALITY.

PREDISPOSE, *v. t.* पूर्वं प्रवृत् c. or प्र-उद्-युज् 7 A, 10, प्रवणीकृ 8 U; ex. by प्रवण, उद्यत, उन्मुख, शील in comp.; 'p. ed to anger' क्रोधप्रवणशील. -ITION, *s.* प्रावण्य, प्रवृत्ति *f.*, शीलं.

PREDOMINATE, *v. i.* प्र-भू 1 P, प्रबल-अधिक-वरीयस्-*a.* भू 1 P, अतिरिच्-विशिष्-pass.; *See* EXCEL. -PREDOMINANT, *a.* प्रबल, अतिरिक्त, प्रधान, विशिष्ट, अधिक, प्रभविष्णु. -LY, *adv.* प्राधान्येन, प्रबलं, विशिष्टतया. -PREDOMINANCE, *a.* प्राबल्यं, प्राधान्यं, आधिक्यं, अतिरेकः.

PRE-EMINENT, *a.* सर्वप्रधान, श्रेष्ठ, सर्वोत्कृष्ट, अग्रगण्य, परम, उत्तम, विशिष्ट, प्रमुख, अग्रगी, अग्रीय, वरेण्य; oft. by व्याघ्रः, शार्दूलः, पुंगवः, ऋषभः, प्रकाण्डः, &c. in comp.; *See* EXCELLENT. -LY, *adv.* परमं, प्रधानतः, विशिष्टं, सातिशयं, अत्यंतं, सविशेषं. -PRE-EMINENCE, *s.* उत्कर्षः, प्राधान्यं, प्रमुखता, श्रेष्ठता, उत्तमता, अग्रगण्यत्वं, वैशिष्ट्यं.

PRE-EMPTION, *s* पूर्वक्रयः, पूर्वक्रयाधिकारः.

PRE-ENGAGE, *v. t.* पूर्वं प्रतिज्ञा 9 A, पूर्वं संक्लृप् c. -MENT, *s.* पूर्वसंकेतः-प्रतिज्ञा.

PRE-EXIST, *v. i.* पूर्वं भू 1 P ('Be.' q. v.). -ENCE, *s.* प्राग्भावः-जन्मन् *n.* -जीवनं. -ENT, *a.* पूर्वभव-भूत.

PREFACE, *s.* आमुखं, प्रस्तावना, मुखबंधः, उपोद्घातः, वाङ्मुखं, उपन्यासः, प्रारंभः. -*v. t.* प्रस्तु 2 U, प्रस्तावनां लिख 6 P or कृ 8 U. -PREFATORY, *a.* प्रस्तावना-उपोद्घात-रूप.

PREFER, *v. t.* उन्नम् c. (नमयति), उत्कर्षं नी 1 P or प्राप् c., पुरस्कृ 8 U, उत्कृष्टपदे नियुज् 7 A, 10, प्रतिपत्तिं प्राप् c. 2 अधिकं रुच् 1 A or मन् 4 A or c. or प्रशंस् 1 P; वृ 5 U or 10 (वरयति); gen. ex. by वरं-न with पुनः, च, तथापि; 'I p. death to disgrace' वरं मृत्युः न पुनरपमानः; वरं वंध्या भार्या न चाविद्वान् तनयः &c. 3 सम्-ऋ c. (अर्पयति), निविद् c., उपह 1 P; *See* OFFER. -ABLE, *a.* वरीयस्, श्रेयस्, गरीयस्; better ex. by (*v.*). -ENCE, *s.* अभिरुचि *f.*, अधिकानुरागः. 2 आदराधिक्यं, अधिकमानः; 'in p. to' विहाय, अतीत्य, अपेक्षया in comp. -MENT, *s.* उन्नति *f.*, पदोत्कर्षः, प्रतिपत्ति *f.*, उत्कर्षः; स्थानोन्नतिः, प्रतिष्ठापदं, गौरवास्पदं.

PREFIGURE, *v. t.* प्रतिबिंबं दृश् c. -ATION, *s.*

पूर्वलक्षणं-दर्शनं.

PREFIX, *s.* उपसर्गः.—*v. t.* पूर्वं आ-प्र-युज् 7 A, 10, पूर्वं-अग्रे-विन्यस् 4 U or नि-आ-धा 3 U or लिख् 6 P.

PREGNANT, *a.* गर्भिणी, गर्भवती, सगर्भा, अंतर्वत्नी, आपन्नसत्त्वा, ससत्त्वा, धृत-रूढ-गृहीत-गर्भा, गर्भधारिणी; 'to be p.' गर्भ-आधा 3 U or धृ 1 P, 10, भू 1 P with (*a.*); 'a p. woman longing for things' श्रद्धालुः, दौहृदवती. **2** अर्थयुक्त-गर्भ. **3** सं-परि-पूर्ण, आढ्य-गर्भ in comp. —PREGNANCY, *s.* गर्भः, दौहृदं, गर्भधारणं-ग्रहणं, गर्भिणीभावः; 'showed signs of p.' दौहृदलक्षणं दधौ (R. III. 1); 'advanced in p.' कठोरगर्भा.

PREJUDGE, *v.* पूर्वं निर्णी 1 P or विचर् c. or निश्चि 5 U. —MENT, *s.* पूर्वनिर्णयः-निश्चयः.

PREJUDICE, *s.* दुराग्रहः, आ-,ग्रहः, चेतोविकारः-विक्रिया, वक्रीभावः; अविचारमति *f.*, अविचारपूर्वः निर्णयः. **2** पक्षपातः, संगः. **3** नाशः, क्षति *f.*, हानि *f.*, अपायः, अपकारः; *See* HARM. —*v. t.* विकृ 8 U, साचीकृ, आवृज् 10, पूर्वं प्रवृत् c. **2** अपकृ, नश् c., क्षण् 8 P; *See* INJURE. —IAL, *a.* हानि-क्षय-कर (री *f.*), अहित, अननुकूल, अपकारक. —IALLY, *adv.* सापायं, सापकारं.

PRE-KNOWLEDGE, *s.* पूर्वज्ञानं-बोधः.

PRELATE, *s.* *See* BISHOP.

PRELECTION, *s.* *See* LECTURE.

PRELIBATION, *s.* पूर्वास्वादः, पूर्वभुक्ति *f.*

PRELIMINARY, *a.* पूर्व-आदि-प्रथम in comp.; प्राथमिक (की *f.*). **2** पारिभाषिक (की *f.*), प्रस्तावनारूप. —*s.* (pl.) पूर्वकार्याणि, पूर्वविषयः. **2** Preface, Introduction, q. v.

PRELUDE, *s.* प्रस्तावना, आमुखं, पूर्वरंगः. **2** आ-प्रारंभः, उपक्रमः. —*v. t.* प्रस्तु 2 U, प्रारभ् 1 A, उपक्रम् 1 A.

PREMATURE, *a.* अकालपरिणत-पक्व, अपूर्णकाल, अपूर्णकालज, असामयिक-अ(आ)कालिक-(की *f.*), अकाल-असमय in comp.: 'p. death' अकालमृत्युः. **2** साहसिन्, अकालसह; *See* RASH. —LY, *adv.* अपूर्णकालं, अकाले, असमये; 'p. born' अपूर्णकाल; 'p. bald' युवखलतिः. —NESS, *s.* अकालिकत्वं.

PREMEDITATE, *v. i.* पूर्वं संकृप् c. or विचर् c. or चिन्त् 10. —ED, *a.* पूर्वसंकल्पित-चिंतित, मति-बुद्धि-पूर्व, सांकल्पिक-सांकेतिक (की *f.*), बुद्धिकृत. —ION, *s.* पूर्वसंकल्पः-विचारः-घटना.

PREMIER, *s.* प्रधानामात्यः, मुख्यमंत्रिन् *m.*, प्रधानसचिवः. —*a.* प्रधान, मुख्य, प्रमुख. —SHIP, *s.* प्रधानमंत्रिपदं.

PREMISE, *v. t.* उपन्यस् 4 U, उपक्षिप् 6 P, पूर्वं कथ् 10 or ब्रू 2 U or वद् 1 P, प्रस्तु 2 U or c., प्रस्तावनारूपेण कथ् or ख्या 2 P, प्र-उप-क्रम् 1 A. —*s.*, —PREMISS, *s.* पक्षः, प्रतिज्ञा; 'major p.' उदाहरणं; 'minor p.' उपनयः. —PREMISES, *s.* गृहक्षेत्रादि, गृहपरिसरः.

PREMIUM, *s.* लाभः, फलं, अधिकमूल्यं, पारितोषिकं.

PREMONISH, *v. t.* पूर्वं सूच् 10 or उपदिश् 6 P, प्रबुध् c. —PREMONITION, *s.* पूर्वबोधः, प्रबोधनं. —PREMONITORY, *a.* पूर्वबोधक, प्रबोधक.

PREOCCUPY, *v. t.* पूर्वं ग्रह् 9 P or भुज् 7 A or आक्रम् 1 U, 4 P. —ATION, *s.* पूर्वभोगः-आक्रमः.

PREORDAIN, *v. t.* पूर्वं प्रकृप् c. or निर्दिश् 6 P.

PREPARE, *v. t.* प्र-उप-परि-कृप् c., सज्जीकृ 8 U, सं-,विधा 3 U, निर्मा 3 A, 2 P, घट् c. (घटयति), उप-प्र-युज् 7 A, 10 (medicines); संभृ 1, 3 U, उपकरणद्रव्यैः संयुज्; oft. by कृ; (food) प्रसाध् c., सिध् c. (साधयति), संस्कृ, पच् 1 P, निष्पद् c.; (army) सन्नह् 4 P or c., आयुधैः उपक्रप् c.; (a book &c.) प्रणी 1 P, निर्मा, प्र-नि-बंध् 9 P, वि-,रच् 10; (lesson) शिक्ष् 1 A, पठ् 1 P, अधि-इ 2 A, पारं गम् 1 P; तॄ 1 P (p. well). —*v. i.* उपकरणानि-द्रव्याणि-संभृ or कृप् c. **2** सज्जीभू 1 P, उद्यत-उद्युक्त-सज्ज-सिद्ध-*a.* भू. —ATION, *s.* उपकल्पनं, योजनं, साधनं, विधानं, सज्जीकरणं, वि-,रचनं-ना, करणं. **2** संभारः, संविधा, संविधानं, सिद्धि *f.*, सिद्धता, सामग्री; 'marriage-p. s' विवाहसंभाराः; 'war-p. s' युद्धसामग्री; तदुत्तिष्ठ गच्छावो गमनसंविधानाय वत्सस्य (Ka. 294) 'come, let us go to make p. s' &c. **3** योगः. **4** संस्कारः, निष्पत्ति *f.*, सिद्धि *f.* —ATIVE,-ATORY, *a.* उपक्रमोपकारिन्, उपक्रमानुकूल; उपकल्पक, प्रथम, आद्य. —*s.* उपक्रमसाधनं, सिद्धिसाधनं; better ex. by (*v. t.*). —ED, *a.* कृत, निर्मित, घटित, रचित, उपकृप्त, कल्पित, निष्पन्न, &c. **2** सिद्ध, सन्नद्ध, सज्ज, उद्यत, उद्युक्त. —EDNESS, *s.* सिद्धता, सज्जता. —ER, *s.* उपकल्पकः, साधकः, रचकः, संस्कर्तृ *m.*

PRE-PAYMENT, *s.* पूर्वदानं-शोधनं.

PREPENSE, *a.* चिंतितपूर्व, मतिपूर्व; *See* PREMEDITATED; 'malice p.' द्रोहचिंता.

PREPONDERATE, *v. i.* अतिरिच्-विशिष्-pass., भारेण-गौरवेण-अतिरिच् or वृध् 1 A, प्र-भू 1 P, अधिक-गुरुतर- *a.* भू. —PREPONDERANCE, *s.* आधिक्यं, अतिरेकः, प्राबल्यं, प्राधान्यं, प्रभावः, गौरवं. **2** अधिकभारः, भाराधिक्यं.

PREPOSITION, *s.* उपसर्गः. —AL, *a.* औपसर्गिक (की *f.*).

PREPOSSESS, *v. t.* (चित्तं) आवृज् 10, ग्रहीकृ 8 U, आकृष् 1 P, साचीकृ. **2** पूर्वं अधि-ष्ठा 1 P or भुज् 7 A. —ED, *a.* (सद्यः) आकृष्टचित्त, ससंग, जातानुराग. —ING, *a.* (सद्यः) हृदयग्राहिन्, चित्ताकर्षिन्. —ION,

s. पक्षपातः, संगः, ग्रहः, प्रावण्यं, चित्ताकर्षणं. 2 पूर्वभोगः.

PREPOSTEROUS, *a.* विपरीतक्रम, विपर्यस्त. 2 (अतीव) अयुक्त, असंगत, अनुपपन्न, असंबद्ध, अनर्थक. -LY, *adv.* अयुक्तं, असंगतं. -NESS, *s.* वैपरीत्यं, क्रमविपर्यासः, अयुक्तता, असंगति *f.*, असंबंधः.

PREPUCE, *s.* शिश्नाग्रत्वच् *f.*

PRE-REQUISITE, *a.* पूर्वोकांक्षित. -*s.* पूर्वोकांक्षा.

PREROGATIVE, *s.* असाधारणाधिकारः, विशेषाधिकारः, विशेषशक्ति *f.*, सत्ता.

PRESAGE, *v. t.* पूर्वं सूच् 10 or आदिश् 6 P ; *See* FOREBODE, PREDICT. -*s.* पूर्वसूचनं-ना, पूर्वलक्षणं-चिह्नं ; *See* OMEN.

PRESCIENCE, *s.* पूर्वज्ञानं, भविष्यद्विज्ञानं, भावि-अनागत-ज्ञानं, समवेक्षणं. -PRESCIENT, *a.* भाविज्ञानिन्, अनागतवेदिन् ; gen. ex. by पूर्वं ज्ञा 9 U or बुध् 1 P.

PRESCRIBE, *v. t.* निर्दिश् 6 P, वि-धा 3 U, प्रक्लृप् c., प्र-चुद 10, शास् 2 P, आ-ज्ञा c. (ज्ञापयति), नियम् 1 P. -ED, *a.* निर्दिष्ट, विहित, प्र-,चोदित, विध्यनुरूप, वैधिक (की *f.*). -ER, *s.* निर्देशकः, शास्तृ *m.* —PRESCRIPT, *s.* आदेशः, विधिः, आज्ञा, चोदनं-ना. -*a.* निर्दिष्ट, प्रकल्पित. -ION, *s.* कल्पः, योगः, अगदनिर्देशः, उपचार-औषध-विधिः. 2 विधिः, निर्देशः, आज्ञा, प्र-,चोदनं-ना, शासनं, वचनं. 3 चिर-बहुकाल-भोगः-भुक्ति *f.*, अनादिपरंपरा, अस्मार्तभोगः -IVE, *a.* चिरकालभुक्त, अनादिपरंपराप्राप्त, चिरव्यवहारसिद्ध.

PRESENT, *v. t.* उपह 1 P, उपहारं दा 3 U, प्र-उपदा 3 U, कृ c. (अर्पयति), वितृ 1 P, वि-श्रण् 10, उपढौक् c., प्रति-पद् c.; (oblation) निर्वप 1 P, निविद् c., उत्सृज् 1 P; *See* OFFER. 2 उपन्यस् 4 P, उपक्षिप् 6 P, पुरो निधा 3 U. 3 (Oneself) आविर्भू 1 P, उप-स्था 1 P, प्रादुर्भू, दृश्-लक्ष्- pass., प्रविश् 6 P, आत्मानं दृश् c. 4 दर्शनं कृ c., प्रविश् c.; दृश् c., पुरस्कृ 8 U, समक्षं नी 1 P; सकाशं नी, 'p. me to the king' मां राजदर्शनं कारय. 5 प्रदृश् c., आविष्कृ, व्यंज् 7 P or c., प्रकटयति (D.), प्रकटीकृ, सूच् 10; oft. ex. by 'Appear' q. v.; 'the court p. ed a gay scene' अधिकरणमंडपः सुतरां रमणीयो बभौ, रम्यालोक आसीत्; 'what a charming sight do these girls p.' अहो मधुरमासां (कन्यकानां) दर्शनं (S. 1), अहो मनोज्ञदर्शनः कन्यकाजनः; 'p. an appearance of' विडंब् 10, अनुकृ (with gen.). -*a.* प्रस्तुत, प्रकृत. 2 (Mind) सावधान, अभ्रांत, अव्यग्र, अशून्य, समाहित, अव्याकुल, निराकुल, असंभ्रम; प्रत्युत्पन्न. 3 विद्यमान, वर्तमान, आधुनिक-सांप्रतिक (की *f.*), अधुनातन-इदानींतन (नी *f.*). 4 सद्यस्क, तात्कालिक (की *f.*); अविलंबित ; 'in the p. state' अस्यामवस्थायां; 'at p.', 'for the p. time' अधुना, सांप्रतं, इदानीं; *See* Now. 5 उपस्थित, सन्निहित, प्रत्यक्ष, सं-अभि-मुख (खी *f.*), समीपवर्तिन्; *See* NEAR; 'to be p.' उप-स्था 1 P, सन्निधा- pass., समीपं वृत् 1 A; 'you should be p.' त्वयोपस्थातव्यं, सन्निहितेन भाव्यं; 'to be p. in one's thoughts' हृदये-चित्ते-वस् 1 P. -*s.* भवत् *n.*; समतीतं च भवच्च भावि च (R. VIII. 78) 'the past, p. and future.' 2 वर्तमान-प्रस्तुत-कालः, तत्कालः, तत्क्षणः, आपातः. 3 (In grammar) लट्. 4 उपायनं, उपहारः, उपदा, प्र-,दानं, वितरणं, पारितोषिकं, उपग्राह्यं, प्राभृतं, प्रदेशनं, प्रीतिदानं; 'p. of money' दक्षिणा; *See* GIFT. -ABLE, *a.* उपहार्य, देय, दर्शनीय, प्रवेश्य. 2 पांक्तेय, पांक्त्य, सभ्य. -ATION, *s.* उपहरणं, अर्पणं, प्रतिपादनं, दानं ; 'p. of an oblation' बलिदानं, निर्वपणं. -LY, *adv.* अधुना, संप्रति, सांप्रतं. 2 सपदि, अनंतरं, द्राक्, तत्क्षणं-णे, तत्काले, सद्यः, अचिरात्, शीघ्रं, आशु, झटिति. -PRESENCE, *s.* सन्निधिः, समुपस्थिति *f.*, उपस्थानं, सांनिध्यं, सन्निधानं, प्रत्यक्षता, समक्षता, आभिमुख्यं; 'in the p. of' समक्षं, प्रत्यक्षं, संमुखं, साक्षात्, in comp. or with gen.; in the p. of fire' अग्निसाक्ष्ये आधाय (R. VII. 20); 'into the p. of' सकाशं-शे, समीपं-पे, अंतिकं, in comp. or with gen. 2 आकारः, आकृति *f.*, रूपं, शरीरसंस्था. 3 (Of mind) प्रत्युत्पन्नमति *f.*, प्रतिभा, प्रतिभानं, प्रतिभानवत्त्वं, समाहितत्वं, अव्यग्रता, असंभ्रमः, निराकुलत्वं; 'p.-chamber' दर्शनशाला, आस्थानं-नी.

PRESENTIMENT, *s.* पूर्वज्ञानं-बोधः-कल्पना; 'my mind has a p. of evil' मम मनः किमप्यशुभमाशंकते.

PRESERVE, *v. t.* रक्ष् 1 P, त्रै 1 A, पा c. (पालयति), उद्-धृ 1 P, 10, गुप् 1 P, पा 2 P, तॄ c., अव् 1 P, परि-आप् desid. (ईप्सति), (इमां परांसु: दुर्जातेः M. 5). 2 सं-,भृ 3 U, पुष् c., संवृध् c., पा c. (पालयति). 3 सं-धा 3 U, उपस्कृ 8 U. -*s.* संधितं, उपस्करः, मिष्टसंधित-फलं-द्रव्यं. 2 वि(वी)तंसः, विहगस्थानं. -ATION, *s.* सं-,रक्षा-क्षणं, त्राणं, स्थितिपालनं, गोपनं, तारणं. -ATIVE, *s.* रक्षा, रक्षणं, रक्षण-त्राण-साधनं, त्रं-त्राणं in comp. -*a.* रक्षक, पालक, तारक.

PRESIDE, *v. i.* (Over) अधि-ष्ठा 1 P, अध्यास् 2 A (with acc.); अधीश् 2 A, प्र-भू 1 P (with gen.); अवेक्ष् 1 A. अध्यक्षः-अधिपतिः-भू, अभिमन् 4 A; अग्न्याद्यभिमानिनीर्भिर्देवताभिः (S. B. 725) 'p.-ing over fire &c.' -ENCY, *s.* अध्यक्षता, अधिष्ठानं, अधिकारः. 2 आधिपत्यं, अधिष्ठातृत्वं, अध्यक्षपदं, अधीशत्वं, better by (*v.*); 'during his p.' तस्मिन्नधितिष्ठति. 3 मंडलं, भोगः, देशविभागः. -ING, *a.* अध्यक्ष, अधिष्ठातृ, अभिमानिन्, अधि pr.; 'the p. deity' अधिदेवता, अधिष्ठात्री देवता; 'the soul p. over the body' शरीराभिमानी आत्मा. —PRESI-

DENT, *s.* अध्यक्षः, अधिष्ठाता, अधीशः, अधि-,पतिः, अध्यासीनः, अधिकारी, प्रभुः, नायकः. -SHIP, *s.* आधिपत्यं, अध्यक्षता; *See* PRESIDENCY.

PRESS, *v. t.* पीड् 10, निः-आ-°, निष्कृष् 1 P, निर्हे 1 P, निर्दुह् 2 U; (together) संपीड्, संहन् 2 P, संह्, संकुच् 1 P, संपिंड् 10, संघट्ट c. **2** Clasp, q. v.; 'p. ing him to the bosom' तं वक्षसा परिरभ्य; भुजाभ्यां आपीड्य 'p. ing in the arms' &c. **3** प्रेर् c., प्रचुद् 10, प्रणुद् 6 P or c., आकृष् 1 P, आकृ c. **4** निबंध् 9 P, अनु-अनुनिर-बंध्, साग्रहं-निर्बंधेन-प्रच्छ् 6 P or याच् 1 A or अर्थे 10 A, पुनः पुनः प्रच्छ्; *See* IMPORTUNE. **5** बलेन प्रवृत् c. or नियुज् 7 A, 10 or व्याप् c. **6** बाध् 1 A, पीड्, क्लिश् 9 P, उद्विज् c., सं-परि-तप् c., व्यथ् c. (व्यथयति). **7** मुहुर्मुहुः-पुनःपुनः-उपदिश् 6 P or कथ् 10 or अनुशास् 2 P. -*v. i.* समापत् 1 P, आ-अधि-क्रम् 1 U, 4 P, अभिद्रु 1 P; (against) संघट्ट 1 A, प्रतिहन् 2 P, अभ्याहन्; संघट्टयन्नंगदमंगदेन (R. VI. 73); 'making his Angada ornament p. against Indra's.' **2** सवेगं प्रगम् or प्रसृ 1 P, सरभसं उपसृप् 1 P or संगम् 1 A; 'p.-ing close to the rock' शिलायामात्मानं निबिडं-निरंतरं-संसंजयन्. **3** प्र-,बाध् 1 A; 'my time p. es' कालातिपातो मया नैव कर्तुं शक्यते; 'p. through' अतीत्य-अतिक्रम्य-गम्, उल्लंघ् 1 A, 10, निस्तृ 1 P. -*s.* पीडनं, निष्कर्षः. **2** मुद्रण-मुद्रा-यंत्रं. **3** पीडन-पेषण-यंत्रं. **4** जनसंकुल-संमर्दः, लोकनिवहः. **5** निर्बंधः, पीडा, अतिभारः. -ER, *s.* पीडकः, बाधकः. -ING, *a.* अतिनिर्बंधक, बाधक, अत्यवश्यक, अविलंब्य, अव्याक्षेप्य, विलंबाक्षम, अनतिपात्य; 'p. business of state' आशुसंपादनीयं-विलंबाक्षमं-राजकार्यं. -INGLY, *adv.* निर्बंधेन, सनिर्बंधं, साग्रहं. -URE, *s.* पीडनं. **2** बलं, शक्ति *f.*, प्रभावः, वेगः, प्रवर्तनं, प्रेरणा, प्रणोदः, प्रोत्साहः. **3** भारः, पीडा, बाधा, क्लेशः; 'p. of business' कार्यभारः; 'having much p. of work' कार्यसमाकुल.

PRESTIGE, *s.* दीर्घरूढा प्रतिष्ठा, चिरप्रतिष्ठितं गौरवं. **2** माया, इंद्रजालं.

PRESTO, *adv.* *See* QUICKLY.

PRESUME, *v. t.* (अविचार्य-अनिश्चित्य) तर्क् 10, सं-भू c., अनु-मा 3 A, 2 P. **2** धृष् 5 P, धर्षेण आक्रम् 1 U, 4 P, उत्सह् 1 A, प्र-भू 1 P; प्रगल्भ् 1 A, दृप् 4 P, साहसं कृ 8 U; कः पतिदेवतामन्यः परिमार्ष्टुमुत्सहेत (S. 6) 'p to lay hands on &c.'; तद्दोषनिरूपणरूपं साहसं मा कुरु 'do not p. to find fault with him'. -PRESUMPTION, *s.* तर्कः, कल्पना, भावना, अनुमानं, ग्रहणं. **2** साहसं, धाष्टर्यं, प्रागल्भ्यं. **3** अवलेपः, दर्पः, अभिमानः, अहंकारः, गर्वः. **4** संभाव्यता, संभवः. -PRESUMPTIVE, *a.* आनुमानिक (की *f.*), अनुमानसिद्ध, संभावित; 'p. proof' अनुमाननिर्णयः. —PRESUMPTUOUS, *a.* साहसिक (की *f.*), धृष्ट, धृष्णु, प्रगल्भ. **2** अवलिप्त, अत्यभिमानिन्; 'a p. statement' साहसोक्ति *f.*, साहसं. -LY, *adv.* साहसेन, धृष्टवत्, प्रगल्भं, सावलेपं, सगर्वं. -NESS, *s.* धृष्टता, प्रागल्भ्यं; प्रतिभा, प्रतिभानं.

PRESUPPOSE, *v. t.* पूर्वं कृप् c. or भू c. -ITION, *s.* पूर्वकल्पना-भावना.

PRETEND, *v.* अप-व्यप-दिश् 6 P, छलं-कपटं-व्याजंकृ 8 U, ध्वजीकृ; gen. ex. by मिथ्या, कृतक, कपट, व्याज, छद्म in comp. or by भू c., दृश् c.; 'p. ing to be asleep' सुप्तमिव आत्मानं संदर्श्य, व्याजसुप्त, सुप्तलक्षण, मिथ्यासुप्त; 'p. ing to be affected by poison' भावितविषवेगः; 'p. s not to hear' अश्रुतिमभिनयति; 'p. ing to be just' आर्यध्वजिन्-लिंगिन्; 'p. ed weeping' कपट-व्याज-रोदनं. **2** अभिमन् 4 A, मिथ्या मन्; 'he p. s to know everything' अहं सर्वज्ञोऽस्मीति तस्याभिमानः (अवलेपः). **3** मिथ्याहेतुं दृश् c. or वद् 1 P. -ED, *a.* छाद्मिक-कौटिक (की *f.*), व्याज-कपट-छद्म-कूट-मिथ्या in comp.; 'p. ascetic' छद्मतापसः, तापसध्वजी-लिंगी; *See* HYPOCRITE; *See* (*v.*) also. -EDLY, *adv.* सकपटं, सव्याजं, छलेन, मिथ्या. -ING, *a.* -ER, *s.* छाद्मिकः, कापटिकः, अभिमानी-ध्वजी-लिंगी-मन्यः-अभियोगी in comp.; 'p. in learning' पंडितंमन्यः, विद्याभिमानी; 'p. in religion' धर्मध्वजी, आर्यलिंगी, धार्मिकवेशधारी, कपटधर्मी; 'p. to the throne' राज्याभियोगी. -PRETENCE, PRETEXT, *s.* व्याजः, अप-व्यप-देशः, छद्मन् *n.*, उपधिः, कपटं, छलं, उपधा, कूटः-टं, कैतवं, मिषं, मिथ्याहेतुः, निमित्तं. **3** अभिमानः, अभियोगः. -PRETENSION, *s.* अभिमानः, अभियोगः, स्वत्वप्रतिपादनं; 'lay p. s to' *See* CLAIM. **2** महात्त्वाकांक्षा, यशोलिप्सा, लोभः; 'p. s to the throne' राज्यं मदीयमिति प्रतिपादनं, राज्याभियोगः.

PRETERITE, *a.* भूत, परोक्ष; 'p. tense' लङ्.

PRETERITION, *s.* अतिक्रमः-मणं, अत्ययः.

PRETERMIT, *v. t.* *See* OMIT.

PRETERNATURAL, *a.* अद्भुत, विलक्षण, निसर्ग-प्रकृति-बाह्य. -LY, *adv.* अद्भुतं, वैलक्षण्येन.

PRETTY, *a.* सु in comp., चारु, शोभन, कमनीय, वाम, सुंदर; *See* BEAUTIFUL, LOVELY. -*adv.* ईषत्, स्तोकं, अल्पं; आ, कल्प, देश्य, देशीय in comp.; 'p. warm' मंदोष्ण, कोष्ण, कदुष्ण; 'p. clear' शुद्धकल्प-प्राय; 'p. ripe' आपक्व, पक्वप्राय. **2** (P. nearly) प्रायेण, प्रायशः, बहुशः, कल्प-भूयिष्ठ-प्राय in comp.; 'p. nearly furnished' समाप्तभूयिष्ठ &c. -LY, *adv.* चारु, सुंदरं, चारु-सु in comp. -NESS, *s.* चारुता, सौंदर्यं, लावण्यं.

Prevail, *v. i.* अभिभू 1 P, प्र-भू, पराभू, पराजि 1 A, आक्रम् 1 U, 4 P; अति-शी 2 A, अतिरिच् pass., प्रबल-क्षम-*a.* भू; *See* Excel. **2** (In) प्रचलित-प्रवृत्त-*a.* भू, प्र-चल्-र् 1 P, प्रवृत् 1 A; 'darkness p. ed everywhere' सर्वं तमोवृतं आसीत्. **3** सिध् 4 P, निष्पद् 4 A; 'p. with, on, or upon' अनुनी 1 P, प्रवृत् c., प्रोत्सह् c.; *See* Persuade; 'p. against' मुच्छ् 1 P, (मारुतस्य रंहः शिलोच्चये न मूर्च्छति R. II. 34). -ing,-Prevalent, *a.* प्रचलित, साधारणी-बहुली-भूत, प्रसिद्ध, प्रचल, प्रवृत्त, साधारण (णी *f.*); 'universally p.' सर्वत्र प्रचालित, सर्वप्रवृत्त; 'long since p.' चिरप्रवृत्त. **2** प्रबल, प्रधान, अतिरिक्त, अधिकबल, प्रभविष्णु, सप्रभाव. -ingly, *adv.* प्राबल्येन, सप्रभावं. —Prevalence, *s.* प्रचारः, प्रवृत्ति *f.*, प्रचलनं, प्रसिद्धि *f.*, साधारण्यं. **2** प्राबल्यं, प्राधान्यं, आधिक्यं, अतिरेकः.

Prevaricate, *v. i.* सापह्नवं मिथ्योत्तरं दा 3 U, अप-व्यप-दिश् 6 P, छलं कृ 8 U, अपलप् 1 P, अपनि-ह्नु 2 A, वाक्छलं कृ; 'when he p. ed' यदा वाक्यभेदान् बहूनकथयत् (Mu. 2). -ing, *a.* अपलापिन्, निह्नवकारिन्, व्यपदेशिन्. -ion, *s.* वाक्छलं, अपलापः, अप-नि-ह्नवः, व्यप-अप-देशः, वक्रोक्ति *f.*, छद्मवादः, उत्तराभासः.

Prevent, *v. t.* वृ c., नि-विनि-°, रुध् 7 U, प्रति-अवनि°, प्रति-नि-षिध् 1 P, प्रतिकृ 8 U, बाध् 1 A, प्रतिबंध् 9 P, प्रतिष्टंभ् 9 P, प्रति-व्या-हन् 2 P, प्रत्या-ख्या 2 P, निवृत् c., अंतरायः-भू- परिपंथीभू 1 P; 'do not p. me from fighting' युध्यमानं मां मा रुद्धि, युध्यमानस्य मेऽंतरायो मा भूः. -ion, *s.* प्रति-,रोधः, नि-,वारणं, प्रतिबंधः, प्रतिकारः, व्याघातः, प्रतिषेधः; 'p. is better than cure' प्रक्षालनाद्धि पंकस्य दूरादस्पर्शनं वरं. -ive, *a.* हर (री *f.*), घ्न (घ्नी *f.*) in comp., निवारक, प्रतिबंधक, निरोधक. -*s.* वारणं, प्रतिबंधकं.

Previous, *a.* पूर्व, प्राग्भूत, भूत, गत, अतीत, पूर्ववृत्तगत, प्राक् in comp. -ly, *adv.* पूर्वं, प्राक्, पुरस्तात्, पूर्वं in comp.

Prevision, *s.* अग्रनिरूपणं-दृष्टि *f.*

Prey, *s.* आमिषं (fig. also); मांसं, भक्ष्यं, अन्नं, खाद्यं, भोज्यं; 'fell a p. to enemies' द्विषामामिषतां ययौ (R. XII. 11). -*v. i.* भक्ष्यं आ-अप-ह 1 P. **2** (Upon) भक्ष् 10; संतप् c., बाध् 1 A. क्रमशः नश् c.

Price, *s.* मूल्यं, अर्घः, पण्यं, अवक्रयः, वल्लं; 'high p.' महार्घः, बहुमूल्यं. -*v. t.* मूल्यं स्था c. (स्थापयति) or संक्रप् c. -ed, *a.* कृतमूल्य; 'high-p.' महार्घ-र्घ, बहुमूल्य, दुर्मूल्य; 'low-p.' अल्पमूल्य. -less, *a.* अनर्घ-र्घ्य, अमूल्य.

Prick, *v. t.* व्यध् 4 P, निर्-,भिद् 7 P, तुद् 6 P, पीड् 10; व्यथ् c. (व्यथयति), क्लिश् 9 P or c. **2** प्रेर् c., उत्तिज् c., प्रोत्सह् c., प्रणुद् 6 P or c. **3** (Ears) उन्नम् c. (नमयति), उच्छ्रि 1 U, स्तब्धीकृ 8 U; 'with ears p. ed' स्तब्धकर्ण. -*s.*, -ing, *s.* प्रतोदः, तोत्रं, तोदनं; सूचि *f.*, शल्यं, कंटकः. **2** वेधः-धनं, तोदनं. **3** यातना, तीव्रव्यथा, आतंकः, शूलः-लं. -ed, *a.* विद्ध, भिन्न, शल्य-सूचि-विद्ध-भिन्न; 'p. at heart' भिन्न-विद्ध-मर्मन्. -er, *s.* वेधकः. **2** तोत्रं; *See* (*s.*).

Prickle, *s.* कंटकः, सूचि-ची *f.*, शल्यं, शूकं. -y, *a.* सकंटक, सशूक, बहुकंटक-शूक.

Pride, *s.* (Good) अभिमानः. **2** अहंकारः, गर्वः, उत्सेकः, अवलेपः, दर्पः, औद्धत्यं, मदः, मादः, आटोपः, अहंमानः, मानः, चित्तसमुन्नति *f.*, अवष्टंभः, चित्तोद्रेकः, स्मयः; (impudent) प्रागल्भ्यं, धृष्टता, प्रतिभा-भानं. **3** अलंकारः, अवतंसः, ललामं, अभिमानास्पदं-भूमिः. -*v. t.* (Oneself upon) आत्मानं श्लाघ् 1 A or विकत्थ् 1 A, अभिमन् 4 A, or ex. by (*s.*); 'p.ing himself on his learning' पंडितमानी, पंडितंमन्यः, विद्याभिमानी, ज्ञातज्ञानावलेपः; 'p. ing herself upon her beauty' रूपगर्विता. —Proud, *a.* (In a good sense) अभिमानिन्. **2** दृप्त, गर्वित, अवलिप्त, सगर्व, सदर्प, उत्सिक्त, उद्धत, उत्सेकिन्, अभिमानिन्, साटोप, साहंकार; अहंमानिन्, उत्-,मत्त, समुन्नद्ध; प्रगल्भ, धृष्ट, प्रतिभावत्, गर्वितचित्त, मदोद्धत; दर्पोन्मत्त, स्मयाकुल. **3** (Building &c.) उत्तुंग, प्रोच्छ्रित, विशाल, सप्रताप; 'p. of one's birth' कुलाभिमानिन्; रूपगर्वित, यौवनोन्मत्त, &c.; 'to be p.' दृप् 4 P, गर्व् 1 P, प्रगल्भ् 1 A. -ly, *adv.* सदर्पं, सगर्वं, सावलेपं, साटोपं, साहंकारं, उद्धतं.

Priest, *s.* (Family) पुरोहितः, पुरोधस् *m.*, कुलाचार्यः. **2** (Sacrificial) ऋत्विज् *m.*, याजकः, अध्वर्युः, होता, याज्ञिकः. **3** (Vedic) श्रोत्रियः, मंत्रविद् *m.*, ब्राह्मणः, द्विजः, विप्रः. **4** आचार्यः, गुरुः, उपाध्यायः, पुरोहितः, धर्माचार्यः, धर्माध्यक्षः. **5** (Of a deity) पूजकः, उपासकः, अर्चकः; 'p.-craft' उपाध्यायछलं-कैतवं; 'p.-ridden' पुरोहिताधीन. -ess, *s.* होत्री, याजिका. -hood, *s.* पौरोहित्यं, उपाध्यायपदं-वृत्ति *f.* **2** पुरोहिताः, पुरोहित-याज्ञिक-गणः-वर्गः, पौरोहित्यं. -ly, *a.* याजकीय, पौरोहित्यसंबंधिन्, (*s.*) in comp.

Prig, *s.* दांभिकः, दंभिन् *m.*, रूपगर्वितः. -gish, *a.* दांभिक (की *f.*), आत्माभिमानिन्.

Prim, *a.* अतिविनीत, अतिसूक्ष्म.

Prime, *s.* आदिः, आरंभः, पूर्व-प्रथम-भागः. **2** उत्तमदशा, प्रौढता, उत्तमभागः-अंशः; 'in the p. of youth' प्रथमे वयसि; 'the p. of youth' प्रथमं वयः, नव-अक्षत-यावनं, यौवनश्रीः; 'being in the p. of youth' अक्षत-नव-यौवन. -*a.* प्रथम, आद्य. **2** मुख्य, प्रधान, प्रमुख, अग्र्य; 'p. minister' मुख्यमंत्री, प्रधानामात्यः, महामंत्री. **3** उत्कृष्ट, श्रेष्ठ, परम,

उत्तम, विशिष्ट ; *See* PRINCIPAL. -LY, *adv.* प्रथमं, श्रेष्ठं. -NESS, *s.* उत्तमता, विशिष्टता. —PRIMARY, *a.* प्रथम, आद्य, आदिम, पूर्व, मौल (लीं *f.*), मूल-आदि in comp. ; 'p. cause' आदिकारणं-बीजं, निदानं, मूलहेतुः ; 'p. sense' मूलार्थः. 2 प्रधान, मुख्य, प्रमुख, अग्र्य; *See* PRIME. -ILY, *adv.* प्रथमं-मतः, आदौ, पूर्वं, मुख्यशः, प्राधान्येन. -INESS, *s.* प्रथमता, प्राधान्यं. -PRIMATE, *s.* प्राधानोपाध्यायः. -PRIMER, *s.* प्रथम-आरंभ-पुस्तकं. -PRIMEVAL, *a.* आद्य, आदिम, प्राक्कालीन, पूर्वकालीन, प्राक्तन (नी *f.*), मौलिक-प्राथमिक- (की *f.*). -PRIMITIVE, *a.* प्राथमिक, प्रथम, आद्य ; *See* PRIMEVAL. 2 मूल in comp., अव्युत्पन्न ; *See* PRIMARY. 3 प्राक्तनमार्गसेविन्. -LY, *adv.* आदौ, आरंभे, प्रथमं-मतः. 2 प्राक्तनव्यवहारानुसारेण.

PRIMOGENIAL, *a.* प्रथम-आदि-जात, मूल in comp.

PRIMOGENITOR, *s.* प्रथम-कुल-पुरुषः. -PRIMOGENITURE, *s.* पूर्वजत्वं, ज्येष्ठत्वं, अग्रजत्वं, वयोज्येष्ठता.

PRIMORDIAL, *a.* आद्य ; बीजभूत, मौल (लीं *f.*); *See* PRIMEVAL.

PRINCE, *s.* कुमारः, राजपुत्रः-सुतः, युवराजः. 2 नृपः, राजन् *m.*, पार्थिवः ; *See* KING. 3 भर्तृदारकः, कुमारः, (in dramas). -DOM, *s.* राज्यं, राष्ट्रं, विषयः. 2 यौवराज्यं. -LIKE,-LY, *a.* राजयोग्य-सदृश (शी *f.*), राजार्हे, नृपोचित; नृपोपम, राजकीय, प्रतापवत्, ऐश्वर्यवत्; प्रताप-वैभव-शालिन्. 2 राजवंश्य, राजकुलज ; 'p. birth' राजवंशप्रसूतिः; 'p. merits' राजोचिता गुणाः -PRINCESS, *s.* कुमारी, राजपुत्री, नृपात्मजा, नृपसुता ; भर्तृदारिका.

PRINCIPAL, *s.* अध्यक्षः, अधि-,पतिः नायकः, मुख्यः ; *See* LEADER. 2 मूलं, मूलधनं, नीवि-वी *f.*, परिपणः. -*a.* मुख्य, परम, प्रधान-वर in comp., प्रमुख, अग्र, अग्र्य, प्रवर, श्रेष्ठ, विशिष्ट, उत्कृष्ट, उत्तम, अनुत्तम, वर्य, वरेण्य, परार्ध्य, अग्रि(ग्री)य, प्राग्रहर ; नायक, अग्रणी, मुखर, धुर्य, धुरीण, धूर्वह, धुरंधर ; oft. ex. by व्याघ्र, पुंगव, ऋषभ, कुंजर, सिंह, शार्दूल, नाग, प्रकांड, in comp.; *See* EXCELLENT ; 'p. door' सिंहद्वारं ; 'p. queen' अग्र-पट्ट-महिषी; 'p. minister' प्रधानामात्यः. -ITY, *s.* राष्ट्रं, प्रदेशः, मंडलं, राज्यं. -LY, *adv.* प्रधानतः, प्राधान्येन, मुख्यशः, विशेषतः, विशेषेण.

PRINCIPLE, *s.* तत्त्वं, मूलतत्त्वं, बीजं, सारः. 2 कारणं, हेतुः, आदिबीजं-हेतुः, मूलं, अंगं, अवयवः, साधनं, मूलांगं-द्रव्यं. 3 नियमः, विधिः, सूत्रं, उत्सर्गः, स्थिति *f.*, व्यवस्था. 4 गुणः, भावः, धर्मः, स्वभावः. 5 क्रमः, रीति *f.*, मार्गः, मर्यादा, धारा, पद्धति *f.* 6 आधारः, आश्रयः, उपष्टंभः, मूलं ; (opp. of practice) आगमः, शास्त्रं ; 'grounded in p. s' आगमिन्, शास्त्रनिपुण ; 'having good p. s' सुनियमनिष्ठ, सुवृत्त; 'of bad p. s' [illegible]

PRINT, *v. t.* मुद्रयति (D.), अंक् 10, मुद्राक्षरैः अंक्. -*s.* चिह्नं, अंकः, मुद्रा ; 'foot-p.' पदं, पदमुद्रा-चिह्नं. 2 मुद्रणयंत्रं. 3 मुद्रणं ; 'in p.' मुद्रमाण. -ED, *a.* मुद्रित, मुद्रांकित, मुद्राक्षरांकित. -ER, *s.* मुद्रकः, मुद्रणकृत् *m.* -ING, *s.* मुद्रणं, मुद्रांकनं ; 'p.-house' मुद्रणयंत्रालयः, मुद्रणशाला ; 'p.-press' मुद्रणयंत्रं.

PRIOR, *a.* प्रधान, गरीयस्, गुरुतर, पूर्व, अग्र्य, आदिम, आद्य, पूर्व-आदि-प्राक् in comp. ; 'p. existence' प्राग्भावः, पूर्वं जन्म ; 'p. and subsequent' पूर्वापर, परापर, परावर. -*s.* मठाध्यक्षः, मठाधिपतिः, विहारपालः. -ITY, *s.* पूर्वता, प्रथमता. 2 (Of rank) अग्रपदमानः, श्रेष्ठपदं, प्राधान्यं. -Y, *s.* मठः, विहारः, आश्रमः.

PRISM, *s.* क्रकचायतं. -PRISMATIC, *a.* क्रकचायत.

PRISON, *s.* कारा, बंदिशाला-गृहं, बंधनालयः, कारागृहं, चारः-रकः, गुप्तिस्थानं; 'escaped from the p.' बंधनं भित्त्वा पलायांचक्रे ; 'keep in p.' बंधने निरुध् 7 U. -ER, *s.* बंदि-दी *f.*, कारागुप्तः, रुद्धः, कारागारस्थः. 2 (Of war) युद्धगृहीतः.

PRISTINE, *a.* प्राक्तन (नी *f.*), पुराण, पूर्व, पूर्वकालिक (की *f.*), प्राचीन, प्राक्कालीन.

PRIVATE, *a.* विजन, विविक्त, निर्जन, एकांत, निभृत, निःशलाक. 2 स्व, आत्मीय, असाधारण (णी *f.*), असामान्य, विविक्त, स्व-आत्म in comp. 3 गुप्त, गूढ, रहस्य, प्र,-छन्न, अप्रकट, अव्यक्त, रहस्-मिथः-अंतः- in comp. 4 अनधिकारिन्, अनधिकारिक (की *f.*); 'p. profit' आत्महितं, स्वलाभः; 'p. road' गूढ-प्रच्छन्नमार्गः; 'p. door' अंतर्द्वारं, गूढद्वारं, प्रच्छन्नं; 'p. apartments' अंतःपुरं, अवरोधगृहं, अंतर्गृहं; 'now is the time to be p.' रहस्यमधुना (Bh. II. 97); 'p. talk' रहःसंकथा, मिथोजल्पः; 'p. parts' गुह्यं, उपस्थः; 'p. room' अंतःशालाकोष्ठः, उपरोधकं. -*s.* सैनिकः. -LY, 'in p.' *adv.* रहः, रहसि, मिथः, रहस्ये, निभृत, विविक्ते, एकांते, विजने, उपांशु, गूढं, प्रच्छन्नं, गुप्तं, अप्रकाशं, अप्रकटं. -NESS, -PRIVACY, *s.* रहस् *n.*, विविक्तं, विजनं, रहोभावः, विविक्त-एकांत-वासः; रहस्यं, गुप्तता, छन्नता, अप्राकाश्यं. 2 रहःस्थानं-स्थलं, विविक्त-निर्जन-स्थानं, निर्जनदेशः.

PRIVATION, *s.* अभावः, विरहः, राहित्यं, हानि *f.* क्षयः, लोपः, नाशः. 2 कष्टं, कृच्छ्रं, आपद्-विपद् *f.* 3 आहारविरहः, आहाराभावः, सुखसाधनलोपः, अन्नवस्त्रहानिः. -PRIVATIVE, *a.* हानि-क्षय-लोप-कर (री *f.*). 2 अभावात्मक, अभावरूप, अभाववाचिन्. -*s.* अभावशब्दः, नञ्पदं. -LY, *adv.* अभावरूपेण.

PRIVILEGE, *s.* विशेषाधिकारः, असामान्याधिकारः, स्वाधिकारः, अधिकारः, स्वत्वं. -*v. t.* विशेषाधिकारं दा 3 U. -ED, *a.* अधिकारविशिष्ट, साधिकार, विशेषा-

Privy, *a.* गूढ, प्रच्छन्न, विविक्त, रहः in comp.; *See* Private. **2** (To) संसर्गिन्, सहाय, सहकारिन्; सहज्ञानिन्, सहवेदिन्; 'p. council' गूढसभा; 'p. councillor' गूढसभासद्. **-s.** शौचस्थानं-कूपः, उच्चारप्रस्रावस्थानं. **-ly**, *adv.* रहसि, गूढं; *See* Privately. **-Privity**, *s.* सहकारिता, सहायता, संसर्गः, सहज्ञानं. **2** गुह्य-गुप्त-स्थानं-इंद्रियं, अर्धांगं.

Prize, *s.* पारितोषिकं, उपायनं, प्रतिफलं. **2** रत्नं, बहुमूल्यं वस्तु, महार्घद्रव्यं. **3** युद्धजितं धनं-द्रव्यं. **4** जय-सिद्धि-फलं-लाभः. **5** स्पर्धा-पण-जेयं, पणः; 'p.-fighter' मल्लः; 'p.-fighting' मल्लयुद्धं, स्पर्धायुद्धं. **-v. t.** बहु मन् 4 A, अवेक्षया पा c. (पालयति), संमन् c. **2** मूल्यं-अर्घ-निरूप् 10 or निर्णी 1 P. **-ed**, *a.* बहुमत, अभीप्सित, इष्ट.

Pro, **Prefix**, प्र, अग्र; 'p. s and cons' विधिनिषेधपक्षौ.

Probable, *a.* संभाव्य, सत्यसंकाश; gen. ex. by सं-भू 1 P, उप-पद् 4 A, युज् pass. or by (*adv.*); 'it is p.' एतत् उपपद्यते, संभवति, युज्यते, स्यान्नाम एवं. **-Probably**, *adv.* प्रायेण, प्रायः, प्रायशः, किल, नाम, स्यात्; by pot. pass. part. of भू; एतेन मम प्रियमित्रेण भाव्यं 'he is p. my dear friend.' **-Probability**, *s.* संभवः, संभाव्यता, अनुमानं, better by (*adv.*).

Probate, *s.* मृतलेखप्रमाण.

Probation, *s.* परीक्षा-क्षणं. **-ary**, *a.* परीक्ष्यमाण. **-er**, *s.* परीक्ष्यमाणः; अंतेवासिन् *m.*, नवशिष्यः, प्राथमकल्पिकः.

Probe, *s.* शलाका, एषणी. **-v. t.** शलाकया परीक्ष् 1 A. **2** निपुण-सूक्ष्म-परीक्ष् or आलोच् 10. **-ator**, *s.* परीक्षकः. **-ing**, *s.* क्षतपरीक्षणं.

Probity, *s. See* Honesty.

Problem, *s.* प्रश्नः, विकल्प-विवाद-प्रश्न-विषयः. **2** कृत्यं, उपायः. **3** (Question) उद्देशकः (in Math.); 'its solution' न्यासः (Lit.) **-atical**, *a.* संदिग्ध, अनिश्चित, वैकल्पिक (की *f.*).

Proboscis, *s.* प्रोथः; करः, शुंडा, हस्तः.

REFUGE, *s.* आश्रयः, संश्रयः, शरणं, गति *f.*; (person) शरण्यः, आश्रयभूतः, पालकः, रक्षकः, त्राता. 2 उपायः, प्र-,युक्ति *f.*, गतिः, साधनं; 'giving r.' शरण्यः &c; 'take r. with' शरणं या 2 P or गम् 1 P or प्रपद् 4 A, उपा-आ-सं-श्रि 1 U, अवलंब् 1 A, शरणार्थं गम् &c; 'seeking r.' शरणार्थिन्; 'come for r.' शरणं प्रपन्न, शरणागत; 'having only one r.' अनन्यगतिक. —REFUGEE, *s.* शरणं प्रपन्नः, शरणागतः, शरणार्थी, आश्रितः, अवलंबितः.

REFULGENT, *a.* देदीप्यमान, विभ्राजमान, भास्वत्, उज्ज्वल, अतितेजस्विन्, प्रद्योतमान; *See* BRIGHT. —REFULGENCE, *s.* अतिप्रभा-तेजस् *n.*, औज्ज्वल्यं.

REFUND, *v. t.* प्रतिदा 3 U, प्रति-कृ c. (अपैयति.)

REFUSE, *v. t.* प्रत्या-ख्या 2 P, नि-प्रति-विध् 1 P, प्रत्याचक्ष् 2 A, निराकृ 8 U, प्रत्यादिश् 6 P, निर्-अप-अस् 4 U, वि-प्रति-हन् 2 P, न संमन् 4 A or ग्रह् 9 P or अंगीकृ or प्रतीष् 6 P, अवधीर् 10; 'pray, do not r. my request' नार्हसि मे प्रणयं विहंतुं (R. 11. 58). 2 (Followed by inf.) Ex. by a sentence with वच्, वद् &c. (Say, q. v.). —*s.* उच्छिष्टं, अवशिष्टं, अवशेषः, शेषः-षं; असारः, मलं. —*a.* उच्छिष्ट, असार, अवशिष्ट.

REFUTE, *v. t.* निराकृ 8 U, निरस् 4 U, प्रतिक्षिप् 6 P, खंड् 10, बाध् 1 A, अधरीकृ, प्रत्या-ख्या 2 P, प्रत्यादिश् 6 P, अपवद् 1 U, निधूं 5, 9 U, 6 P. —ATION, *s.* निरासः, निरसनं, खंडनं, निराकरणं, प्रतिक्षेपः, प्रत्याख्यानं.

REGAIN, *v. t.* पुनः लभ् 1 A or प्राप् 5 P, प्रतिपद् 4 P; *See* RECOVER.

REGAL, *a.* राजकीय, राजार्ह, राजोचित.

REGALE, *v. t.* संतृप् c., संतुष् c., आह्लाद् c., आनंद् c. 2 आश्वस् c., आप्यै c, संवृध् c.; *See* REFRESH; 'r. oneself' उत्तमान्नेन संतुष् 4 P or संतृप् 4 P or आत्मानं संतुष् c., उत्सवं कृ 8 U.

REGALIA, *s.* राजचिह्नानि-लक्षणानि-लिंगानि, राजोपचारः.

REGARD, *v. t.* आद् 6 A, प्रति-अव-ईक्ष् 1 A, सं-,मन् c., पूज् 10, नि-,सेव् 1 A. 2 ईक्ष्, दृश् 1 P, आ-अव-लोक् 1 A, 10, आ-,लक्ष् 10; *See* LOOK. 3 मन् 4 A, वि-,गण् 10. 4 अव-धा 3 U; अवेक्ष्, सावधान- *a.* भू, विगण्, आद्. 5 सेव्, पा c. (पालयति); अनु-ष्ठा 1 P; *See* OBSERVE. 6 उद्दिश् 6 P, अपेक्ष्; संबंध् 9 P. —*s.* आदरः, संमानः, पूजा, अवेक्षा. 2 अवधानं, मनोयोगः, अवेक्षा. 3 दृष्टि *f.*, ईक्षणं; *See* LOOK. 4 स्नेहः, प्रणयः, अनुरागः, प्रीति *f.* 5 विचारः, अवेक्षा, अपेक्षा, अनुसंधानं, गणना, अ-

देशः, संबंधः, अन्वयः, विषयः; 'having r. to the result' फलापेक्षया; 'with r. to' उद्दिश्य, अधिकृत्य, अंतरेण, अपेक्ष्य, (with acc.); अपेक्षया, विषये, गत-*a.* in comp.; 'a scandal with r. to Mâlavikâ' मालविकागतं कौलीनं (M. 3); भर्तृगता-विषया-चिंता &c. -FUL, *a.* अवे(पे)क्षक, अवहित, सावधान, सापेक्ष. -FULLY, *adv.* सापेक्षं, सावधानं. -ING, *a.* सापेक्ष, संबंधिन्, गत-विषय- in comp.; *See* (*s.*). -LESS, *a.* निरपेक्ष, अनपेक्ष, उदासीन, विरक्त, अनुत्सुक, in comp. gen.; oft. by अनादृत्य, अनवेक्ष्य, अगणयित्वा. -LESSLY, *adv.* निरपेक्षं, उपेक्षया. -LESSNESS, *s.* अनपेक्षा, उपेक्षा.

REGATTA, *s.* नौकाक्रीडा.

REGENERATE, *v. t.* पुनर् जन् c. (जनयति) or जीव् c. or उद्-धृ 1 P, 10 or उत्था c. (उत्थापयति). -*a.*,-ED, *a.* पुनर्जात, पुनर्भव, पुनर्जन्मन्, पुनरुज्जीवित. -ION, *s.* पुनरुज्जीवनं, पुनरुत्पत्ति *f.*, पुनर्जन्मन् *n.*; उत्थापनं, उद्धारः.

REGENT, *s.* पालः in comp.; शासकः, अधिपतिः, शास्ता; 'r. s of the eight quarters' अष्ट दिक्पालाः. 2 शून्यपालः; राजप्रतिनिधिः. -REGENCY, *s.* शासनं. 2 राजप्रतिनिधिमंडलं.

REGICIDE, *s.* राजवधः-हत्या-हिंसा-घातः. 2 (Person) राजहन् *m.*, राजघातकः, राजघः.

REGIME, *s.* *See* GOVERNMENT.

REGIMEN, *s.* अन्नपानविधिः, पथ्यापथ्यनियमः; 'one observing r.' पथ्याशिन्.

REGIMENT, *s.* सैन्यदलं-गुल्मं-गणः-व्यूहः. -REGIMENTALS, *s.* सैनिकवेषः.

REGION, *s.* प्र-,देशः, लोकः, भुवनं; विषयः, राष्ट्रं, चक्रं, मंडलं; (of the sky) दिश् *f.*, काष्ठा, आशा; *See* DIRECTION; 'r. of the heart' हृदयदेशः; नाडीचक्रं &c.

REGISTER, *s.* लेख्यं, लेखः, पत्रिका, पंजिका; गणनापत्रं. -*v. t.* पत्रिकायां लिख् 6 P or निविश् c. -REGISTRAR, *s.* लेखकः, पंजिकाधिकृतः. -REGISTRY, REGISTRATION, *s.* नामालिखनं, पत्रिकायां निवेशनं or आरोपणं. 2 लिखनस्थानं.

REGNANT, *a.* शासक, अधिकारिन्, राज्याधिकारिन्.

REGORGE, *v. t.* उद्गम् 1 P, उद्-गृ 6 P, निःसृ c.

REGRESS, *s.* प्रतीपगति *f.*, परावर्तनं. -*v. i.* परावृत् 1 A, प्रत्यावृत्. -ION, *s.* प्रतीपगमनं, प्रत्यावर्तनं.

REGRET, *v. t.* अनुशुच्, 1P, अनुतप् 4 A; *See* LAMENT; 'he died r. ed by all' मृतः सर्वैरनुशोचितश्च; न वाप्यनुशोचिता (U. 3) 'nor was she (her absence) r. ed;' oft. ex. by दुःखित *a.* or दुःखं; 'I r. I cannot go with you' त्वया सह गंतुमसमर्थोऽस्मीति दुःखितोऽहं. 2 Repent, q. v. -*s.* दुःखं, अनुशोकः, अनुतापः, खेदः, मनस्तापः, उद्वेगः; *See* GRIEF. -FUL, *a.* दुःखित, दुःखाकुल, अनुतप्त, अनुशोकार्त, उद्विग्न, खिन्न, सोत्कंठ.

REGULAR, *a.* नियत, नियमानुसारिन्, नैयमिक-वैधिक (की *f.*), विध्यनुरूप, सूत्र-विधि-अनुसारिन्; 'not at r. hours' अनियतवेलं (S. 2). 2 अनुपूर्व, अनुक्रमागत, यथाक्रम, क्रमानुगत, अनुलोम, क्रमानुसारिन्. 3 नियतकालिक (की *f.*) नियतवेल. 4 व्य(व्या)वहारिक-आचारिक (की *f.*), नित्य, यथामार्गं, यथारीति. 5 (Of persons) नियमानुसारिन्, नियमनिष्ठ-पर-शील, विधि-नियम-अनुवर्तिन्; व्यवस्थित, अत्यक्तक्रम, अव्यभिचारिन्, नियतवृत्ति. -ITY, *s.* नियतत्वं, विध्यनुसारः, नियमः, सूत्रानुसारः, नैयमिकत्वं. 2 पर्यायः, अनुक्रमः, परिपाटि-टी *f.*, व्यवस्था, परंपरा, आनुपूर्व्यं, आनुलोम्यं; *See* ORDER. 3 विधि-नियम-निष्ठा, नियमानुसारित्वं, विध्यनुवर्तनं, क्रमात्यागः, व्यवस्थिति *f.*, विधि-नियमपरता. 4 (Of arrangement) विरचनं-ना, व्यूहः-हनं, विन्यासः. -LY, *adv.* यथा-अनु-क्रमं, अनुपूर्वशः, आनुपूर्व्येण, अनुलोमं, आनुलोम्येन, क्रमशः, क्रमेण, पर्यायेण. 2 यथाविधि, विधिवत्, विधितः, यथानियमं, यथासूत्रं, विधिपूर्वकं, विधि-नियम-अनुसारेण. 3 नित्यं, अनुज्झितक्रमं, नियतक्रमेण, नियतवेलायां.

REGULATE, *v. t.* सं-,वि-धा 3 U, परिष्कृप् c., क्रमेण विन्यस् 4 U, विरच् 10, व्यव-स्था c. (स्थापयति). 2 वि-,नियम् 1 P, वि-धा; अनुशास् 2 P, नि-,यंत्र् 10; *See* RULE, CONTROL; ये द्वे कालं विधत्तः (S. 1) 'who r. time.' 3 यथाविधि व्यव-स्था c. or वि-धा, प्रमाणं निरूप् 10. -ION, *s.* विधानं, व्यवस्थापनं, यंत्रणं, शासनं, &c. 2 व्यवस्था, वि-,नियमः, शासनं, विधिः, स्थिति *f.*, मर्यादा, क्रमः. -OR, *s.* शासकः, संविधातृ *m.*, वि-,नियंता, शास्ता.

REHEARSE, *v. t.* पठ् 1 P, अनुवद् 1 P. 2 कथ् 10, वर्ण् 10; *See* NARRATE. 3 प्रयोगात् पूर्वं अभिनी 1 P or नट् 10. -AL, *s.* पठनं, अनुवादः; कथनं, आख्यानं, पूर्वप्रयोगः, पूर्वाभिनयः.

REIGN, *v. i.* प्र-,शास् 2 P, राज्यं-महीं &c. शास् or अव् 1 P or भुज् 7 U. 2 Prevail, q. v. -*s.* शासनं, राज्यपालनं, आधिपत्यं, अधिकारः; better by (*v.*) with loc. abs.; 'during Râma's r.' रामे महीं शासति; 'after a r. of 12 years' द्वादशाब्दान् भुक्तक्षितौ तस्मिन्. 2 राज्यशासनकालः, राज्यकालः. -ING, *a.* राजपदारूढ, शासत्, राज्याधिकारिन्.

REIMBURSE, *v. t.* प्रतिदा 3 U, निष्कृ 8 U, अपाकृ, पूर् 10, शुध् c.

REIN, *s.* अभीशुः-षुः, प्रग्रहः, रश्मिः; 'by drawing in the r. s' रश्मिसंयमनात् (S. 1); 'give the r. s to' वशं या 2 P; आयत्तीभू 1 P, अधीन-*a.* भू; 'r. s of government' राज्यसूत्राणि. -*v. t.* नि-

सं-यम् 1 P, नि-ग्र-ग्रह् 9 P; *See* CONTROL; 'r. in the horses' प्रगृह्णतां वाजिनः (S. 1).

REINS, *s.* कटि-टी *f.*, कटि-श्रोणी-देशः. 2 वृक्कौ.

REINFORCE, *v. t.* Recruit, q. v. -MENT, *s.* सैन्यं, सेनासामग्री.

REINSTATE, *v. t.* प्रति-ष्ठा c. (-ष्ठापयति), पुनः स्था c. or नियुज् 7 A, 10. -MENT, *s.* प्रतिष्ठापनं, पुनर्नियोगः, पुनःस्थापनं.

REITERATE, *v. t.* Repeat, q. v. 2 पुनः पुनः कृ 8 U. -ED, *a.* पुनःपुनरुक्त; पौनःपुनिक (की *f.*). -ION, *s.* पुनर्वचनं, आम्रेडनं, पुनरुक्ति *f.*, पौनःपुन्यं.

REJECT, *v. t.* अवधीर् 10, निराकृ 8 U, प्रत्या-ख्या 2 P, वि-हन् 2 P, प्रत्याचक्ष् 2 A; प्रत्यादिश् 6 P, निर्-अप-अस् 4 U, निर्धू 5, 9 U, प्रति-अप-क्षिप् 6 P, त्यज् 1 P; *See* REFUSE. -ION, *s.* अवधीरणा, निराकरणं, प्रत्यादेशः, प्रत्याख्यानं, निरसनं.

REJOICE, *v. i.* प्री pass., मुद् 1A, आनंद् 1P, सं-परितुष् 4P, हृष् 4P, रम् 1A, उल्लस् 1P; *See* DELIGHT; 'I r. to see you' प्रीतोऽस्मि ते दर्शनात्, त्वद्दर्शनेन मुदितोऽस्मि; 'this is to be r. ed at' एतदभिनंदनीयं ((S. 5). -*v. t.* Causal of roots above. -ING, *a.* आनंदद, हर्षावह, हर्षकर (री *f.*). 2 प्रीयमाण, मुदित, हृष्ट. -*s.* आनंदः, हर्षः, प्रमोदः, उत्सवः.

REJOIN, *v. See* ANSWER. -REJOINDER, *s.* प्रतिवचनं, उत्तरं, प्रत्युक्ति *f.*

RELAPSE, *v. i.* पुनः पत् 1 P or आगम् 1 P or प्राप् 5 P; oft. ex. by पुनः with other words; 'r. ed into a feverish state' ज्वरेण पुनरभ्यभूयत, पुनः ज्वरातुरो बभूव; 'r. ed into vice' पूनर्दुर्मार्गं गंतुं प्रचक्रमे, सत्पथात् भ्रष्टः, सन्मार्गं अत्यजत्; 'r. ed into his natural joviality' सहजामानंदवृत्तिं प्रत्यपद्यत. -*s.* पुनः पतनं, आवृत्ति *f.*, प्रत्यागमनं, पूर्वावस्थाप्राप्ति *f.*

RELATE, *v. i.* (To) उद्दिश् 6 P, अपेक्ष् 1 A, अनुषंज्-संबंध् pass.; by deriv. in ईय, or विषय in comp.; 'r. ing to Sâstras' शास्त्रीय, शास्त्रविषय; 'news r. ing to the king's murder' राजघातविषयकः-संबद्धः-वृत्तांतः; *See* REFER. -*v. t.* कथ् 10, आ-ख्या 2 P, वर्ण् 10, शंस् 1 P, चक्ष् 2 A, आ-नि-विद् c.; *See* TELL. -ED, *a.* कथित, ख्यात, वर्णित, &c. 2 सं-अनु-बद्ध, अनुषक्त, अन्वित, संसक्त, संपृक्त, संबंधिन्, संपर्किन्, in comp. 3 संबंधिन्, सजाति, सजातीय, एक-स-गोत्र, सकुल्य, गोत्रज, एकशरीरान्वय. -ER, *s.* आख्यायकः, कथयितृ *m.* -ING, *a.* (To) संबंधिन्, विषय in comp.; *See* REFER. -ION, *s.* संबंधः, अन्वयः, संदर्भः, संसर्गः, संपर्कः, अनुषंगः, भावः; 'mutual r.' व्यतिषंगः, अन्योन्यसंबंधः, आकांक्षा (between a word and its meaning); 'intimate r.' समवाय-नित्य-संबंधः; 'the r. of the container and the thing contained' आधाराधेयभावः. 2 बंधुता, ज्ञातिभावः, शरीरसंबंधः, शरीरान्वयः, सजातित्वं, सगोत्रता, सपिंडता. 3 बंधुः, बांधवः, ज्ञातिः, गोत्रजः, सगोत्रः, सकुल्यः, संबंधी, सपिंडः (to the 7th degree), समानोदकः (8th to 14th degree); सनाभिः, सोदर्यः, समानोदरः (by blood); 'r. s collectively' बांधवगणः-जनः, बंधु-ज्ञातिवर्गः. 4 आ-उपा-ख्यानं, वर्णनं, कथनं, निरूपणं, कीर्तनं. -IONSHIP, *s.* बंधुता, सनाभिता, ज्ञातिभावः, संबंधः; 'near r.' प्रत्यासन्नता; 'distant r.' व्यवहितता. -IVE, *s.* सगोत्रः, सकुल्यः, बांधवः, बंधुः, ज्ञातिः; *See* RELATION. -*a.* सापेक्ष, अविविक्त, अन्यसापेक्ष, अकेवल; 'r. importance' तारतम्यं. 2 अन्योन्यान्वित. 3 संबंधिन्, विषयक, in comp.; अनुविद्ध, अनुषक्त, संबद्ध, सान्वय, उद्दिष्ट. 4 संबंधवाचिन्. -IVELY, *adv.* अन्यापेक्षया, अन्यसापेक्षं, अपेक्ष्य; *See* COMPARATIVE.

RELAX, *v. t.* शिथिलीकृ 8 U, शिथिलयति (D.), श्रथ्-श्रथ् 1, 9 P, 10, वि-,स्रंस् c., वि-गल् c. 2 मुच् 6 P, or c., विसृज् 6 P. 3 शिथिलीकृ, प्र-शम् c. (शमयति), न्यूनीकृ, लघूकृ, मंदीकृ, (मंदीचकार मरणव्यवसायबुद्धिं K. IV. 45); 'r. ing their efforts' शिथिलितप्रयत्नाः. 4 उद्-ग्रंथ् 9 P, विर्स-धा 3 U; 'r. the bowels' विरिच् 7 P or c.; *See* PURGE; 'r. the mind' मनः विनुद् c., or विश्रम् c. -*v. i.* शिथिलीभू 1 P, स्रथ् 1 P, श्रथ् 1 A, स्रंस् 1 A, शिथिलायते-मंदायते (D.). 2 प्र-उप-शम् 4 P, न्यूनी-भू. -ATION, *s.* शैथिल्यं, विस्रंसः, प्रश्रथः, मुक्ति *f.* 2 प्र-उप-शमः-शांति *f.*, न्यूनीभावः. 3 विनोदः, विश्रामः, उद्योगविरति *f.*-निवृत्ति *f.* -शैथिल्यं. -ED, *a.* शिथिलित, शिथिल, प्र-,स्रथ, मुक्त, स्रस्त, विगलित ; 'having r. his hold' मुक्त-शिथिलित-ग्रहः-हस्तः.

RELAY, *s.* विश्रामदायी जवाश्वगणः or सेवकगणः.

RELEASE, *v. t.* मोक्ष् 10, मुच् 6 P or c., वि-निर्-°, उद्धृ 1 P, निस्तृ c., विसृज् 6 P; *See* FREE. -*s.* वि-मुक्ति *f.*, मोक्षः, मोचनं, उद्धारः, निस्तारः. -ER, *s.* मोचकः, मोक्षकः, उद्धर्ता.

RELENT, *v. i.* करुणामृदु-करुणार्द्र-मृदुचित्त- *a.* भू 1 P ; अनुकंप् 1 A, दयार्द्रीभू, करुणया द्रु 1 P ; 'his heart r. ed' तस्य मनो मार्दवमभजत, कठिनतामजहात् ; 'being appeased, he r. ed' स चानुनीतो मृदुतामगच्छत् (R. v. 54) ; किमपि सानुक्रोशः कृतः (S. 4) 'somewhat r. ed'. -LESS, *a.* निर्दय, निष्करुण, निरनुक्रोश, क्रूर, कठोर, कठिन-पाषाण-हृदय, निर्घृण ; *See* CRUEL. -LESSLY, *adv.* निर्दयं, निष्करुणं, कठोरं.

RELEVANT, *a.* प्रास्ताविक (की *f.*), प्रस्तुत, प्रस्तुतानुषंगिन्, प्रासंगिक (की *f.*), प्रस्तावसदृश (शी *f.*), उचित-अनुरूप, प्रसंगोचित. -LY, *adv.* प्रस्तावसदृशं,

प्रासंगिकं. —RELEVANCE,-CY, *s.* प्रस्तावौचित्यं, प्रस्तावसंगति *f.*, प्रस्तुतानुसारः-अन्वयः, प्रकरणानुसारः, प्रास्ताविकत्वं.

RELIC, *s.* अव-शिष्टं-शेषः-षं, शेषभागः ; शवः-वं, मृतशरीरं.

RELICT, *s.* *See* WIDOW.

RELIEVE, *v. t.* (Persons) (दुःखात् &c.) मुच् 6 P or c., मोक्ष् 10, उद्धृ 1 P ; दुःखं &c. अपनी 1 P or शम् c. (शमयति) or परिह. 2 (Pain &c.) प्र-शम् c., परिह, दूरीकृ ; लघयति (D.), विश्रम् c., लघूकृ ; *See* ALLEVIATE ; 'I feel myself to be r. ed' ममात्मा विशदः जातः (S. 4), निश्चिंतोऽहं. 3 उपकृ, साहाय्यं दा 3 U, अनुग्रह् 9 P. 4 (Guard &c.) विश्रम् c., नियोगात् विश्रामं दा. —ED, *a.* उद्धृत, मुक्त, शांत, शमित &c. ; 'r. of anxiety' वीतचिंत, निश्चिंत, निःशल्य (मनः) ; 'r. of pain' शांतदुःख. —RELIEF, *s.* (दुःखात्) मोचनं, मोक्षः, उद्धारः, शमनं, मुक्ति *f.*, अपहरणं, अपनयनं, परिहारः. 2 सुखं, उप-प्र-शमः, निर्वापणं, चिताप्रशमः-शांति *f.*, स्वास्थ्यं, निर्वृत्तिः, विश्रामः, निश्चिंतता; एकपदे एव दुःखविश्रामं ददाति (U. 6) 'gives r. to my sorrow'; कर्तव्यानि दुःखितैर्दुःखनिर्वापणानि (U. 3). 3 उपकारः, साहाय्यं; 'she brought her lovely limbs into r.' पुपोष लावण्यमयान् विशेषान् (K. I. 25).

RELIGION, *s.* धर्मः. 2 Piety, q. v. —RELIGIOUS, *a.* धर्म्यं, धर्म-देव- in comp.; 'r. rites' धर्मक्रियाः. 2 धर्मात्मन्, पुण्यशील, धर्माचारिन्, व्रतिन्, धर्मनिष्ठ, धार्मिक (की *f.*); *See* PIOUS. —LY, *adv.* धार्मिकवत्, ईश्वरभक्त्या. —NESS, *s.* धार्मिकत्वं, धर्मनिष्ठा, धर्मपरता.

RELINQUISH, *v. t.* त्यज् 1 P, उत्-वि-सृज् 6 P, हा 3 P, मुच् 6 P. —MENT, *s.* त्यागः, उत्सर्गः, मोचनं; *See* ABANDON,-MENT.

RELIQUARY, *s.* अवशिष्टाधारः-भाजनं.

RELISH, *v. t.* स्वाद् c., रस् 10, सुरसीकृ 8 U, स्वादूकृ. 2 आस्वाद् 1 A. 3 अभि-,रुच् 1 A, अभिनंद् 1 P; *See* LIKE, *s.* रसः, आ-,स्वादः-दनं, रुचिः; 'has lost r. for dates' पिंडखर्जूरैरुद्वेजित (S. 2). 2 अभि-,रुचिः, अभिलाषः, इच्छा. 3 अव-उप-दंशः.

RELUCTANT, *a.* अनिच्छन्, विमनस्, अनिच्छु, असंतुष्ट, अकाम, निष्काम, वि-पराङ्-मुख, विमत. —LY, *adv.* बलात्, अनिच्छया, अकामं-मतः-मेन, by (*a.*), 'he went out r.' अनिच्छन्नपि निर्जगाम. —RELUCTANCE, *s.* अनिच्छा, अकामः, असंतोषः, वैमनस्यं, विमुखता, अरुचि *f.*

RELY, *v. i.* (On) विश्वस् 2 P, प्रति-इ 2 P, विश्रभ् 1 A; श्रद्धा 3 U. 2 आ-अव-लंब् 1 A, आ-सं-श्रि 1 U; obl. ex. by आयत्त, अधीन, तंत्र in comp.; 'I r. on you alone' भवानेव ममाश्रयः, शरणं. —IANCE, *s.* विश्वासः, प्रत्ययः, विश्रंभः, श्रद्धा. 2 अवलंबः-बनं, आ-सं-श्रयः, शरणं. —ING, *a.* अवलंबिन्, आश्रित, विश्वासिन्, जातप्रत्यय.

REMAIN, *v. i.* अव-स्था 1 A, स्था 1 P, आस् 2 A, वृत् 1 A; *See* CONTINUE. 2 नि-,वस् 1 P, स्था, अधि-ष्ठा. 3 शिष् pass., अव-परि-उत्°-, उद्-वृत्; 'he r. ed only in memory (his name only r. ed)' स्मर्तव्यशेषं नीतः; 'r. ing after what is eaten' भुक्तावशिष्टं, भुक्तशेषं (अन्नं); 'those who r. ed alive' हतशेषाः. —ING, *a.* अव-,शिष्ट-शेष, उद्वृत्त; 'pass the r. months' शेषान्मासान्गमय; 'during the r. part of his life' आयुःशेषे. —REMAINS, *s.* अस्थ्यादिशेषः, अस्थीनि. —REMAINDER, *s.* अव-,शेषः-षं-शिष्टं, उद्वर्तः, शेषभागः; (in arithmetic) शेषं, अंतरं; (of men) ex. by अन्य, इतर; *See* OTHER; 'subtracting 4 from 10 the r. is 6' दशसु चतुर्भिर्विवर्जितेषु षट् शेषं or षट् अवशिष्यंते.

REMAND, *v. t.* पुनः प्र-हृ 5 P or आह्वे 1 P.

REMARK, *v. t.* लक्ष् 10, अवेक्ष् 1 A, निरूप् 10. 2 अभि-धा 3 U, वच् 2 P, वद् 1 P; *See* OBSERVE. —*s.* उक्ति *f.*, वचनं, अभिधानं, वचस् *n.*, भाषणं; (written) लिखितं, लेखः. 2 अवेक्षणं, निरूपणं. 3 चर्चा, अनुशासनं. —ABLE, *a.* अपूर्व, अद्भुत, आश्चर्यभूत. 2 विख्यात, विश्रुत, अलौकिक (की *f.*), लोकोत्तर, प्रसिद्ध, विशिष्ट, उत्कृष्ट, स्मरणार्ह, विशेष in comp. —ABLY, *adv.* सातिशयं, विशेषेण, विशेषतः, अद्भुतं, विशिष्टप्रकारेण.

REMARRIED, *a.* पुनरूढ, पुनर्भू.

REMEDY, *v. t.* प्रतिकृ 8 U, प्रतिवि-धा 3 U, प्रतिसमा-समा-धा; परिह 1 P; प्र-उप-शम् c. (शमयति), साध् c., कित् desid. (चिकित्सति-ते); उप-चर् 1 P. —*s.* औषधं; भेषजं, अगदः; *See* MEDICINE. 2 प्रतिक्रिया, प्रति(ती)कारः, उपशमः, उपायः, उपचारः, प्रतिविधानं, उपक्रमः, चिकित्सा, प्रतिसमाधानं. —IABLE, *a.* प्रतिकार्य, प्रतिविधेय, चिकित्स्य, शक्यप्रतिकार, शक्योपचार. —IAL, *a.* प्रतिकारक, प्रतिकारिन्, (*s.*) in comp.; 'a r. measure proves effective' प्रतिकारविधानं फलाय कल्पते (R. VIII. 40). —LESS, *a.* अप्रतिकार्य, अप्रतिविधेय, निरुपाय, अप्रतिकार, दुरुपचार.

REMEMBER, *v. t.* स्मृ 1 P, सं-अनु-,° (with gen. when regret is shown), अनुचिंत् 10, अनु-बुध् 1 P, 4 A. 2 (Keep in mind) स्मृ, हृदये-चित्ते नि-उप-धा 3 U, मनसि कृ 8 U, अव-धृ 10; 'please, r. these words well' हृदि एनां (भारतीं) उपधातुमर्हसि (R. VIII. 77); 'r. me to your brother' स्मर्तव्योऽहं तव भ्रातुः. —REMEMBRANCE, *s.* स्मरणं, स्मृति *f.*, अनुचिंतनं, अवधारणं-णा. 2 स्मा-

रकं, स्मारणं, स्मरणवस्तु, अभिज्ञानं; 'r. of love' प्रीत्यभिज्ञानं. -ER, *s.* स्मारकः, उद्बोधकः.

REMIND, *v. t.* स्मृ c., अनु-सं-°, उद्-प्र-अनु-बुध् c.; 'this group of gallants, as if, r. s me to-day of Pàtála' पातालं मामद्य संस्मरयतीव भुजंगलोकः (Rat. 1); 'Oh, I am well r. ed' अये सम्यगनुबोधितोस्मि (S. 1). -ER, *s.* उद्बोधकः, अनुबोधकः.

REMINISCENCE, *s.* स्मृति *f.*, स्मरणं; *See* MEMORY.

REMISS, *a.* अनवधान, असावधान, प्रमत्त, निरपेक्ष, उपेक्षक, मंदादर, शिथिलोद्यम; 'to be r.' प्रमद् 4 P (with abl.). -LY, *adv.* अनवधानेन, उपेक्षया, निरपेक्षं, प्रमादेन. -NESS, *s.* अनवधानं, उपेक्षा, निरपे(वे)क्षा, प्रमादः, शैथिल्यं.

REMIT, *v. t.* प्र-हि 5 P, प्रेष् c., प्रति-कृ c. (अर्पयति); संचर् c., संक्रम् c. 2 शिथिलीकृ 8 U, मुच् 6 P, वि-उत्-सृज् 6 P, त्यज् 1 P; विरम् 1 P, निवृत् 1 A, (with abl.). 3 क्षम् 1 A, निवृत् c., मुच्, अवसृज्, त्यज्. 4 प्र-उप-शम् c. (शमयति), लघूकृ, न्यूनीकृ. -*v. i.* प्र-उप-शम् 4 P, शिथिलीभू 1 P, विरम्. -TANCE, *s.* प्रेषणं, संक्रामणं; प्रेषितधनसंख्या. -TENT, *a.* संतत, अविसर्गिन्. -TING, *a.* विरत, विसर्गिन्, शिथिलित. -REMISSION, *s.* शैथिल्यं, प्र-उप-शमः-शांति *f.*, विरामः. 2 मोचनं, मुक्ति *f.*, निस्तारः, उद्धारः. 3 मार्जनं, क्षमा, विच्छेदः, निवृत्ति *f.*, उत्सर्गः.

REMNANT, *s.* अव-,शेषः-षं; *See* REMAINDER.

REMONSTRATE, *v. i.* (With) निवारणार्थं उपदिश् 6 P, निवारयितुं यत् 1 A, प्रत्यादिश्, प्रत्या-ख्या 2 P; *See* DISSUADE. -REMONSTRANCE, *s.* प्रत्यादेशः, प्रबोधवचनं, निवारणोपदेशः, निवर्तनं.

REMORSE, *s.* अनुतापः, अनुशयः, अनुशोकः, पश्चात्तापः. -FUL, *a.* अनुतप्त, अनुशयार्त; *See* REPENTANCE, &c. -LESS, *a.* कठिन, निर्दय; *See* CRUEL.

REMOTE, *a.* दूर, दूरस्थ, दूरवर्तिन्, असन्निहित, विप्रकृष्ट; *See* DISTANT. -LY, *adv.* दूरं, विप्रकृष्टं; 'he is r. connected with me' स मम विप्रकृष्टः बंधुः. -NESS, *s.* विप्रकर्षः, असन्निकर्षः, दूरता.

REMOVE, *v. t.* स्थानांतरं नी 1 P or गम् c., अप-सृ c., वि-,चल् c. 2 दूरीकृ 8 U, निर्वस् c., निष्कस् c., अप-निः-उत्-सृ c., बहिष्कृ; (from office) प्र-,भ्रंश् c., च्यु c.; *See* DISMISS, DISCHARGE; (of things) अपनी, विनुद् c., अपहृ 1 P, अप-अव-कृष् 1 P, अप-अपा-नुद् 6 P or c., अप-व्यप-ऊह 1 U, निर्-अप-अस् 4 U, निराकृ, अपाकृ, उच्छिद् 7 P, विनश् c., प्रतिकृ, खंड् 10, वि-प्रति-हन् 2 P, भंज् 7 P, निर्-अव-धू 5, 9 U, 6 P. -*v. i.* स्थानांतरं गम् 1 P or या-इ- 2 P; अपसृ 1 P, अपगम्-या. -*s.* पुरुषः (in geneology); 'separated by one r. from the creator' स्रष्टुरेकांतरं (इदं) (S. 7). 2 पदं, पदवी, क्रमः. 3 अपगमः, अपसरणं, &c.; *See* below. -AL, *s.* अपनयनं, उत्सारणं, दूरीकरणं, विचालनं, स्थानांतरीकरणं. 2 अपसरः-रणं, अपयानं, अपगमः-गमनं, स्थानांतरं, स्थलभेदः. 3 निरासः, निष्कारणं, प्रध्वंशनं, अप-परि-हारः-हरणं, उच्छेदः, विनाशः-शनं, अपनोदः, अपोहः, प्रतिघातः, प्रति(ती)कारः, खंडनं, भंगः, &c. -ER, *s.* अपनेतृ *m.*, अपहर्ता, नाशकः, उच्छेत्ता; gen. ex. by हारः, हारी, अपहः, हा, घ्नः, अंतकः in comp., also हन्, नुद् in comp.; 'r. of darkness' तमोनुत्, तमोहन्, तमश्छिद् &c.

REMUNERATE, *v. t.* मूल्यं-वेतनं-प्रतिफलं दा 3 U, *See* RECOMPENSE, REWARD. -ION, *s.* मूल्यं, वेतनं, प्रतिफलं, पारितोषिकं.

RENCOUNTER, *s.* संमर्दः, द्वंद्वं, संघट्टः, अभिघातः; *See* BATTLE, COLLISION.

REND, *v. t.* दृ 9 P or c., भिद् 7 P, छिद् 7 P, व्यध् 4P, विशृ 9P; वि-उद्-दल् c. (दलयति), खंड् 10; *See* TEAR; 'heart-r. ing' हृदयस्रंसन, हृदिस्रंसन, हृदयमर्मच्छिद्. -ER, *s.* विदारकः, भेदकः. -ING, *s.* विदारणं, भिदा, स्फुटनं, भेदः, भंगः. -RENT, *a.* विदीर्ण, स्फुटित, भिन्न, &c. -*s.* छिद्रं, रंध्रं, भेदः, विदरः, स्फुटनं, भिदा, भंगः.

RENDER, *v. t.* प्रति-दा 3 U, प्रति-कृ c. (अर्पयति), प्रति-पद् c., निर्यत् c. 2 दा, कृ 8 U, उपसृप् c. 3 ज्ञप् c., उत्पद् c., कृ; by the causal of roots; 'r. help' साहाय्यं कृ or दा; 'to r. proud' दृप् c.; 'r. unfriendly' विकृ c., विरंज् c., &c. 4 Translate, q. v.

RENDEZVOUS, *s.* समागम-संकेत-स्थानं, संकेतगृहं-स्थलं.

RENEGADE, *s.* धर्मभ्रष्टः, पतितः, पाषंडः, स्वधर्म-स्वपक्ष-त्यागी.

RENEW, *v. t.* नवीकृ 8 U, प्रतिसमा-धा 3 U, उद्धृ 1 P, पूर्वावस्थां नी 1 P or प्राप् c. or गम् c. 2 पुनः कृ; gen. ex. by पुनः आरभ् 1 A with other words; 'r. s studies' पुनः अध्ययनं प्रारभते; 'they r. ed hostilities' पुनः वैरं प्रारेभिरे. -AL, *s.* नवीकरणं, पूर्ववत्करणं, प्रतिसमाधानं, उद्धारः, पुनःकरणं, पुनः प्रारंभः.

RENOUNCE, *v. t.* न स्वीकृ or अंगीकृ 8 U, अप्रत्याख्या 2 P, प्रत्यादिश् 6 P, प्रत्याचक्ष् 2 A; *See* REFUSE. 2 त्यज् 1 P, अपास् 4 U, वि-उत्-सृज् 6 P, हा 3 P; *See* ABANDON; 'to r. the world' संन्यस्, सर्वसंगं परित्यज्. -RENUNCIATION, *s.* प्रत्यादेशः, प्रत्याख्यानं, परित्यागः, उत्सर्गः, परिहारः; 'r. of the world' संन्यासः, सर्वसंगपरित्यागः.

RENOVATE, *v. t.* नवीकृ 8 U, पुनः कृ. -ION, *s.* नवीनता, नूतनावस्था, उद्धारः; *See* REFRESH, RENEW.

RENOWN, -NED, &c.

विश्रुति *f.* -ED, *a.* प्र-वि-ख्यात, विश्रुत, प्रथित, लब्ध-कीर्ति, प्रसिद्ध, लब्धप्रतिष्ठ; *See* FAME,-OUS.

RENT, *s.* करः, बलिः, राजस्वं. -*v. t.* भाटकेन दा 3 U; भट् c., भाटकेन-मूल्यदानेन-ग्रह् 9 P or सेव् 1 A or भुज् 7 A. -AL, *s.* 'r.-bill' करपत्रिका.

REPAIR, *v. t.* नवीकृ 8 U, सं-धा 3 U, प्रतिसमा-समाधा, उद्धृ 1 P, पूर्ववत्कृ, पुनः स्वस्थीकृ, सुस्थित-*a.* कृ. 2 (Loss &c.) पूर् 10, प्रमृज् 2 P, निष्कृ, शुध् c., प्रतिकृ, सं-धा. -*v. i.* आश्रि 1 U, प्रपद् 4 A, गम्-व्रज् 1 P, शरणं प्रपद् or गम् or या 2 P or अभ्युपद् 2 P. -*s.* प्रति-,समाधानं, संस्कारः, संधानं, उद्धारः, नवीकरणं, पूर्वावस्थाप्रापणं. -REPARABLE, *a.* पूरणीय; उद्धार्य, प्रतिसमाधेय; 'loss not r.' अपूरणीया हानिः. -REPARATION, *s.* Repair, q. v. 2 क्षति-हानि-पूरणं-निष्कृति *f.*, शोधनं, प्रतिफलं.

REPARTEE, *s.* क्षिप्रोत्तरं, व्यंगोक्ति *f.*, भंगिभाषणं, सरसोक्तिः.

REPAST, *s.* भोजनं, अन्नं, आहारः, अशनं, अभ्युपहारः.

REPAY, *v. t.* प्रतिदा 3 U, प्रति-कृ c. (अर्पयति), निर्यत् 10, प्रति-पद् c., निवृत् c., प्रतिकृ 8 U. 2 प्रति-फलं-निष्कृतिं-दा, निष्कृ, अपाकृ, शुध् c., अपवृज् 10, oft. by प्रति; 'r. kindness' प्रत्युपकृ; 'r. an injury' प्रत्यपकृ, वैरं साध् c. -MENT, *s.* प्रतिदानं, प्रत्यर्पणं, निर्यातनं, शोधनं, शुद्धि *f.*, प्रतिफलं.

REPEAL, *v. t.* खंड् 10, निरस् 4 U, वि-,लुप् c., निपरा-वृत्-c., उच्छिद् 7 P. -*s.* वि-,लोपः, निवर्तनं, खंडनं, निरसनं, प्रचारलोपः-भंगः. -ER, *s.* निवर्तकः, विलोपकः,

REPEAT, *v. t.* पुनः वद्-गद् 1 P, or उदीर् c. or व्याहृ 1 P, (Say, q. v.); अभ्यस् 4 U, (a letter) आम्रेडयति (D.). 2 आवृत् c., पुनः-मुहुः-कृ 8 U or आचर् 1 P or अनु-ष्ठा 1 P; 'ten r. ed two times' द्विरावृत्ता दश, द्विदशाः. 3 पठ् 1 P, व्याहृ, अनुवद्, उद्गृ 6 P, आ-ख्या 2 P, कथ् 10, उदीर्. -ED, *a.* पुनरुक्त, पुनर्भणित, पुनः पुनः कृत, आवृत्त, आवर्तित; 'with r. exertions' पुनः पुनः कृतैः प्रयत्नैः; 'in r. birth' परिवर्तीनि जन्मानि, जन्मानि जन्मनि. -EDLY, *adv.* वारं वारं, भूयो भूयः, पुनः पुनः, मुहुर्मुहुः, अभीक्ष्णं, असकृत्, बहुशः, अनेकशः. -REPETITION, *s.* पुनरुक्ति *f.*, पुनर्वादः, पुनर्वचनं-कथनं, पौनरुक्त्यं; 'made as a r.' पुनरुक्त, पुनरुक्ततां नीत; *See* SUPERFLUOUS. 2 पठनं, समभिव्याहारः, अनुवादः, अनुलापः. 3 आवृत्ति *f.*, आवर्तनं, पुनः विधानं-अनुष्ठानं-आवृत्तिः, पौनःपुन्यं, अभ्यासः; आम्रेडितं, द्विरुक्तिः (of a word &c.).

REPEL, *v. t.* अपास् 4 U, प्रति-व्या-हन् 2 P, प्रतिसृ c., निरस्, प्रतिक्षिप् 6 P, प्रतिवृ c., अपानुद् 6 P, निपरा-वृत् c., प्रत्यादिश् 6 P; *See* DISPEL, DRIVE. -LENT,-LING, *a.* प्रतिघातिन्, प्रतिकारक, अपानोदिन्. -*s.* प्रति(ती)कारः, प्रतिघातः, प्रतिवारणं.

REPENT, *v. i.* अनु-पश्चात्-तप् 4 A, अनुशी 2 A, अनुशुच् 1 P, अनुतापं वह्-व्रज्-गम् 1 P, पश्चात् पीड्-खिद् pass. -ANCE, *s.* अनु-पश्चात्-तापः, अनुशयः, अनुशोकः, पश्चात्खेदः, मनस्तापः, विप्रतीसारः, पाप-दुष्कृत-खेदः. -ANT, *a.* सानुशय, सानुताप, संजातानुताप, अनुशयविधुर-पीडित, अनुतप्त, जातानुशय, जातखेद, अनुतापार्त.

REPERCUSSION, *s.* प्रतिघातः, प्रतिपतनं.

REPERTORY, *s.* *See* TREASURY.

REPINE, *v. i.* व्यथ् 1 A, शुच् 1 P, अवसद् 1 P, खिद्-पीड्-दु-संतप्-pass.; *See* FRET. -ING, *s.* मनस्तापः, मनोव्यथा, शोकः.

REPLACE, *v. t.* (स्थाने) पुनः आ-नि-धा 3 U or निविश् c. or न्यस् 4 U or स्था c. (स्थापयति); पूर् 10, स्थाने निविश् c., प्रतिनिधिं दा 3 U; 'one servant was r. ed by two' किंकरस्थाने किंकरद्वयं निवेशितं; *See* SUBSTITUTE.

REPLENISH, *v. t.* (पुनः) संपूर् 10 or उपक्लृप् c.

REPLETE, *s.* सं-परि-पूर्ण, सं-आ-कीर्ण, परिपूरित, आ-नि-चित, आढ्य, मय (यी *f.*) in comp. -ION, *s.* पूर्णता, पर्याप्ति *f.*; परि-,पूर्ति *f.*

REPLY, *s.* उत्तरं, प्रतिवचनं-वाक्यं-वाच् *f.*-उक्ति *f.* 2 उत्तरपक्षः, प्रतिवादः; 'leave no room for r.' निरुत्तरीकृ 8 U. -*v. i.* दा 3 U with (*s.*), उत्तरं प्रति-पद् 4 A, प्रतिवच् 2 P, प्रतिवद् 1 P, -भाष् 1 A. 2 Echo, q. v. -REPLICANT, *s.* उत्तरवादिन् *m.*, प्रतिवादी.

REPORT, *v. t.* आ-नि-विद् c., आ-ख्या 2 P or c. (ख्यापयति), विज्ञा c. (ज्ञापयति), बुध् c., वृत्तांतं लिख् 6 P, श्रु c.; 'he is r. ed to be dead' स मृत इति श्रूयते, इति जनश्रुतिः-प्रवादः. -*s.* नि-आ-वेदनं, विज्ञापना, विज्ञप्ति *f.*, कथनं; 'written r.' आवेदनपत्रं, विज्ञप्तिलेखः. 2 ख्याति *f.*, विश्रुति *f.*, कीर्ति *f.*; 'evil or bad r.' कौलीनं, अकीर्तिः. 3 वार्ता, वृत्तांतः, प्रवादः, जन-लोक-वादः-प्रवादः-श्रुतिः-वार्ता, उपश्रुति, जनरवः; किंवदंती; 'there goes a r.' इति जनप्रवादः &c. श्रूयते, इति प्रवादः. 4 ध्वनिः, नादः, शब्दः; *See* NOISE. -ER, *s.* वृत्तांतनिवेदिन् *m.*

REPOSE, *v. i.* विश्रम् 4 P, संविश् 6 P, शी 2 A. 2 विश्वस् 2 P, प्रति-इ 2 P. 3 आ-अव-लंब् 1 A, आ-सं-श्रि 1 U; 'r. ing in confidence' विश्वासप्रतिपन्न, सविश्वासं स्थित. -*v. t.* विश्रम् c., संविश् c. 2 निक्षिप् 6 P, स्था c. (स्थापयति), नि-आ-धा 3 U. -*s.* विश्रा(श्र)मः, विश्रांति *f.*, विरामः, उप-प्र-शमः, प्र-शांति *f.*, श्रमच्छेदः-निवृत्ति *f.*, निर्वृति *f.*

REPOSIT, *v. t.* नि-आ-धा 3 U, न्यस् 4 U, रक्ष् 1 P. -ORY, *s.* निधिः, आगारं, निधानं, पात्रं, भाजनं, आश्रयः, आशयः, आधारः, कोष्ठः, रक्षणस्थानं.

Reprehend, *v. t.* भर्त्स् 10 A, परुषं निंद् 1 P or उपालभ् 1 A; *See* Censure. **-Reprehensible**, *a.* निंद्य, उपालभ्य, गर्हित, गर्हणीय, दूषणीय. **-Reprehension**, *s.* निंदा, गर्हा, भर्त्सनं-ना, दूषणं, उपालंभः.

Represent, *v. t.* वर्ण् 10, वि-वृ 5 U, निरूप् 10; oft. ex. by स्था c.; 'r. even vices as virtues' दोषानपि गुणपक्षमध्यारोपयंति, गुणपक्षे स्थापयंति (Ka. 108); 'r. in writing' अभि-,लिख् 6 P, लेख्ये निविश् c. or आरुह् c. 2 प्र-,दृश् c., सूच् 10, आविष्कृ 8 U, निरूप्. 3 नि-आ-विद् c., वि-ज्ञा c. (ज्ञापयति); *See* Inform. 4 भूमौ-स्थाने-स्था 1 P or वृत् 1 A; प्रतिनिधिः भू; 'you r. the queen' भवान् राज्ञीस्थाने वर्तते, राज्ञीप्रतिनिधिः. 5 रूपं-वेषं-ग्रह् 9 P or धृ 1 P, 10; *See* Personate; (a play &c.) प्रयुज् 10; 'have not seen it r. ed' न प्रयोगतो दृष्टं (Rat. 1); नाटकं प्रयोगेणाधिक्रियतां (S. 1) 'let it be r. ed on the stage'; 'r. a character' भूमिकायां वृत्; 'Urvasî r. ing Lakshmî' उर्वशी लक्ष्मीभूमिकायां वर्तमाना (V. 3). **-ation**, *s.* वर्णनं, निवेदनं, विज्ञापना, प्रदर्शनं, निरूपणं, विज्ञप्ति *f.* 2 प्रयोगः, अभिनयः. 3 प्रतिकृति *f.*, प्रतिरूपं, आलेख्यं, प्रतिच्छंदः, प्रतिमा, प्रतिमूर्ति *f.*; *See* Picture. **-ative**, *s.* प्रतिनिधिः, प्रतिभूः, प्रतिपुरुषः. *-a.* प्रतिनिधीभूत; आदर्शभूत.

Repress, *v. t.* प्रति-नि-रुध् 7 U, सं-नि-यम् 1 P, नियंत्र् 10, नि-ग्रह् 9 P, प्रशम् c.; *See* Check. **-ion**, *s.* निरोधः, नियमः, निग्रहः, नियंत्रणं. **-ive**, *a.* निरोधिन्, निग्रहकारिन्.

Reprieve, *s.* विश्रामः, विरति *f.* 2 दंडव्याक्षेपः-विलंबः. *-v. t.* दंडं व्याक्षिप् 6 P or विलंब् c., व्यवहारदर्शनं व्याक्षिप्.

Reprimand, *v. t.* निंद् 1 P, भर्त्स् 10 A, उपालभ् 1 A, वाचा दंड् 10, अव-अधि-क्षिप् 6 P. *-s.* निंदा, भर्त्सना-नं, उपालंभः, वाग्दंडः, वाक्ताडनं; *See* Censure.

Reprisal, *s.* प्रत्यपहरणं, प्रतिपीडनं.

Reproach, *v. t.* (परुषं) निंद् 1 P, गर्ह् 1, 10 A, उपालभ् 1 A, आक्रुश् 1 P, अप-परि-वद् 1 A, निर्-, भर्त्स् 10 A, आ-अधि-क्षिप् 6 P, दुष् c. (दूषयति), कुत्स् 10; सावज्ञं निंद्, तिरस्कृ 8 U, धिक्कृ, अवमन् 4 A. *-s.* धिक्कारः, निंदा, गर्हा, तिरस्कारः, आ-अधिक्षेपः, परि(री)वादः, उपालंभः, आक्रोशः, भर्त्सनं-ना, परुषोक्ति *f.*, वाक्पारुष्यं, दुरुक्तं, वाग्दंडः, निंदा-भर्त्सना-वाक्यं. 2 दूषणं, कलंकः, अ-अप-कीर्ति *f.*; लज्जास्पदं. **-ful**, *a.* निंदागर्भ; निंदात्मक, परिवादक; better by (*s.*) in comp.; 'r. words' निंदावचनानि. 2 गर्हित, निंद्य, गर्हणीय, लज्जाप्रद. **-fully**, *adv.* साधिक्षेपं, सोपालंभं.

Reprobate, *v. t.* धिक्कृ 8 U, न्यक्कृ, दुष् c. (दूषयति), गर्ह् 1, 10 A; *See* Reproach. *-a., s.* दुर्वृत्त, दुराचार, पाप-खंडित-वृत्त, दुष्ट, पापात्मन्, दुःशील, दुरात्मन्; (of acts) दुष्ट, निंद्य, गर्ह्य. **-ion**, *s.* गर्हा, गर्हणं, अतिदुष्टता.

Reproduce, *v. t.* पुनः कृ 8 U or उत्पद् c. or जन् c.; 'he r. ed the whole speech' समग्रमेव भाषणं स यथातथमुदीरयामास. **-Reproduction**, *s.* प्रत्युत्पत्ति *f.*, पुनर्जननं.

Reprove, **Reproof**, *See* Reproach.

Reptile, *s.* सरीसृपः, सर्पणशीलः, डरगः, उरोगः-गामी, डरंगमः, सर्पः. *-a.* सर्पिन्, सर्पणशील.

Republic, *s.* प्रजासत्ताकं-प्रजातंत्रं-राज्यं, लोक-प्रजा-प्रभुत्वं. **-an**, *a.* प्रजाप्रभुत्वविशिष्ट, लोकप्रभुत्वसंबंधिन्, (*s.*) in comp. *-s.* प्रजाप्रभुत्ववादी, प्रजापक्षवादी. **-anism**, *s.* प्रजाप्रभुत्ववादः, प्रजातंत्रपक्षः.

Repudiate, *v. t.* प्रत्यादिश् 6 P, निराकृ 8 U, निर्-अप-अस् 4 U, निः-सृ c., परित्यज् 1 P, प्रत्या-ख्या 2 P, अपध्वंस् c., अव-निर्-धू 5, 9 U, 6 P; *See* Reject also. **-ion**, *s.* प्रत्यादेशः, निराकरणं, प्रत्याख्यानं, परित्यागः, अपासनं. 2 विवाहसंबंधत्यागः, दांपत्यक्षेपः.

Repugnant, *a.* प्रतीप, विरुद्ध, प्रतिकूल, विपरीत, अत्यंतविमुख-विरक्त. **-Repugnance**, *s.* विरोधः, प्रातिकूल्यं, वैपरीत्यं, विरागः, विद्वेषः, अनिच्छा, वैमुख्यं, विमति *f.*, विरक्ति *f.*

Repulse, *v. t.* निराकृ 8 U, निः-प्रति-सृ c., अवधीर् 10; प्रत्यादिश् 6 P, प्रत्या-ख्या 2 P, परा-प्रति-हन् 2 P, भंज् 7 P, वि-द्रु c. (army). **-ion**, *s.* निराकरणं, निःसारणं, प्रत्यादेशः, अवधीरणं-णा, प्रतिघातः, प्रतिहननं; विद्रावणं, पराजयः, भंगः. **-ive**, *a.* अप्रिय, द्विष्ट, निंद्य, बीभत्स, बीभत्सावह; *See* Hideous. 2 प्रतिघातिन्, प्रतिसारिन्.

Repute, *v. t.* मन् 4 A, अभि-सं-°,गण् 10; *See* Consider; 'r. ed as authors' कर्तृत्वेनाभिमताः. *-s.*,**-ation**, *s.* कीर्ति *f.*, ख्याति *f.*, प्र-वि-°, यशस् *n.*, प्रतिष्ठा, प्रथा, प्रतिपत्ति *f.*, गौरवं, प्रसिद्धि *f.*; 'of established r.' लब्धप्रतिष्ठ; 'good r.' सुख्यातिः; 'bad r.' दुष्कीर्तिः, अप-अ-कीर्तिः, वाच्यता, कौलीनं, दुर्नाम. **-able**, *a.* सं-,माध्य, प्रशस्य, माननीय, आदरणीय. 2 यशः-कीर्ति-कर (री *f.*), कीर्ति-मान-प्रद. **-ed**, *a.* अभिमत, जन-लोक-विश्रुत, सर्वज्ञात, जनप्रसिद्ध.

Request, *v. t.* याच् 1 A, अर्थ् 10 A, प्र-अभि-,° वि-ज्ञा c. (ज्ञापयति), सविनयं नि-आ-विद् c. *-s.* प्रार्थना, अभ्यर्थना, याचना, विज्ञापना, विज्ञप्ति *f.*, नि-आ-वेदनं, याच्ञा. 2 आकांक्षा, इच्छा, अभिलाषः, अपेक्षा; 'in general r.' सर्वाभीप्सित, बहुशः दृष्ट.

Require, *v. t.* प्रार्थ् 10 A, मृग्य् 6 P, याच् 1 A.

2 (Need) वि-,अपेक्ष् 1 A, आकांक्ष् 1 P; oft. ex. by उपयोगः, प्रयोजनं, कार्यं, with instr.; or अर्ह् 1 P; or by pot. pass. part.; 'that it is affection and should r. a cause is a contradiction' स्नेहश्च निमित्तसव्यपेक्ष इति विप्रतिषिद्धमेतत् (Mal. 1); 'I do not r. his help' न मम तस्य साहाय्येन प्रयोजनं; 'r. s a careful consideration' निपुणमवेक्षणीयः, निपुणावेक्षणमर्हति. -MENT, s. Ex. by (v.); 'all the r. s of man' यत्र नरैरपेक्ष्यते or इष्यते. -REQUISITE, a. आवश्यक (की f.), अवश्यक, आकांक्षित, अपेक्षित. -s. अवश्यकवस्तु-द्रव्यं, अपेक्षितं. -REQUISITION, s. प्रार्थना-नं, अपेक्षा, आकांक्षा.

REQUITE, v. t. प्रति-दा 3 U, प्रतिफलं दा, प्रत्युपकृ 8 U, निस्तृ c.; See RECOMPENSE, REPAY; (grudge &c.) प्रतिकृ, निर्यत् 10, शुध् c., साध् c. -AL, s. प्रतिदानं, प्रतिफलं, निस्तारः, निष्कृति f., प्रत्युपकारः, पारितोषिकं, निर्यातनं. 2 प्रति(ती)कारः, प्रतिक्रिया, शुद्धि f.; साधनं.

RESCIND, v. t. विलुप् c., खंड् 10, निरस् 4 U, निवृत् c. -RESCISSION, s. वि-,लोपः, खंडनं, निरसनं; See REPEAL.

RESCRIPT, s. See COUNTERPART.

RESCUE, v. t. मुच् 6 P or c., मोक्ष् 10, वि-निर्-°, निस्तृ c., उद्-हृ 1 P or धृ 10; परि-त्रै 1 A, रक्ष् 1 P; See PROTECT. -s. वि-,मुक्ति f., मोचनं, मोक्षः-क्षणं, उद्धारः; परि-,त्राणं, रक्षणं, निस्तारः, तारणं; 'on, on, to the r.' सत्वरं परित्रायध्वं. -ER, s. उद्धर्तृ m., त्राता, रक्षकः, मोक्षकः.

RESEARCH, s. अन्वेषण-णा, निरूपणं, अनुसंधानं, जिज्ञासा, मार्गणं, विचारणा.

RESEMBLE, v. t. सं-वद् 1 P (with instr.), अनुकृ 8 U (with gen.), अनुहृ 1 P (with acc.); 'the characters r. each other' संवदन्त्यक्षराणि (Mu. 5); gen. by तुल्य, सदृश, समान, उपम, अनुरूप in comp., ('Like', q. v.); भव पितुरनुरूपो गुणैः (V. 5) 'r. your father in qualities'; देहबंधेन स्वरेण च रामभद्रमनुहरति, अस्य मुखं बध्वा मुखचंद्रेण संवदत्येव (U. 4). 2 उप-प्रति-मा 3 A, 2 P, समीकृ. -ANCE, s. सादृश्यं; सारूप्यं, तुल्यत्वं, संवादः, साम्यं, औपम्यं, उपमा, अनुकारः, अनुहारः, तुला; साधर्म्यं (in qualities); 'to bear r.' सादृश्यं-तुलां-अधिरुह् or समारुह् 1 P; See (v.); (तुलां यदारोहति दंतवाससा K. v. 34). 2 प्रतिकृति f., प्रतिरूपं, आलेख्यं; See PICTURE. -ING, a. संवादिन्, (न केवलमस्मदंगसंवादिनी आकृतिः U. 6); अनुरूप, तुल्य, सम, समान, अनुकारिन्, अनुहारिन्;

RESENT, v. i. अभि-प्रति-क्रुध् 4 P (with acc.), क्रुध्-कुप्-रुष् 4 P, अपकारापेक्षया कुप्. -FUL, a. क्रोधिल, क्रोधशील, समन्यु, सासूय, प्रत्यपकारबुद्धि. -MENT, s. कोपः, क्रोधः, रोषः, अमर्षः, मन्युः; See INDIGNANT, &c.

RESERVE, v. t. सं-प्रतिसं-हृ 1 P, निग्रह् 9 P. 2 (आकालांतरात्) सं-चि 5 U, नि-धा 3 U, संग्रह्, रक्ष् 1 P, अवशिष् 7 P or c., त्यज् 1 P (temporarily); आपदर्थे धनं रक्षेत् 'should r. his money for times of want.' 3 गुप् 1 P, सं-वृ 5 U, अपह्नु 2 A, न स्पष्टीकृ, न विशदीकृ. -s. संवरणं, संवृति f., नि-अप-ह्नवः, मनोगुप्ति f. 2 नि-,यंत्रण-णा, निग्रहः, निरोधः; 'without any r.' विवृतं, निर्व्याजं, अनियंत्रणं, नियंत्रणं. 3 (Of disposition) वाग्यंत्रणं, कथा-आलाप-विरक्ति f.-पराङ्मुखता, अल्पभाषणं, वाग्यतत्वं. 4 संचयः, संग्रहः. 5 (Of an army) प्रति-परिग्रहः, प्रत्यासा(स)रः, पार्ष्णिग्रं सैन्यं. -ATION, s. गोपनं, निग्रहः, संहारः, गुप्तिः, अपवारणं. 2 नि-अप-ह्नवः, मनोगुप्तिः, संतरणं, संवृतिः. 3 परिवर्जनं, अपवादः, व्यावृत्ति f.; 'with this r. only' अयमेव तस्यापवादः. 4 संग्रहः-हणं, संचयः. -ED, a. रक्षित, गुप्त, अवशेषित. 2 संवृतिमत्, गूढभाव, गुप्तांतःकरण, अनुत्तानहृदय, संवरणशील; वाग्यत, यंत्रितवाक्, कथा-आलाप-विरक्त-विमुख, अल्पभाषिन्, अल्पालापिन्. -EDLY, adv. गूढभावेन, संवृतचेतसा. -RESERVOIR, s. जलाशयः, तडागः-गं, जलाधारः, तोयाधारः, वापी.

RESIDE, v. i. वस् 1 P, नि-प्रति-°; अधि-ष्ठा 1P, अधिवस् (with acc.); निली 4 A; आश्रि 1 U, वृत् 1 A; See DWELL. 2 सद् 1 P; अवशिष् pass. -ENCE, s. स्थिति f., वसति f., वर्तनं, अधिष्ठानं, वासः; 'r. abroad' प्रवासः. 2 वसतिः, वासस्थानं, नि-,वासः, गृहं, आ-नि-लयः, आश्रयः, अधिष्ठानं, स्थानं, निकेतनं; See HOUSE; 'change of r.' स्थलांतरगमनं. -ENT, s. नि-,वासिन्, or by deriv.; 'r. of this or that place' अत्रत्यः; तत्रत्यः; आयोध्यिकः, कौशांबीयः, &c. -a. नि-,वासिन्, स्थ, वर्तिन् in comp.; आश्रित, कृतालय. -RESIDUE, s. अव-,शेषः-षं-शिष्टं. -AL,-ARY, a. अव-शिष्ट, शेष in comp.

RESIGN, v. t. परि-,त्यज् 1 P, उत्-वि-सृज् 6 P, हा 3 P, प्रत्यादिश् 6 P, पराक्षिप् 6 P; See ABANDON. 2 सं-,ऋ c. (अर्पयति), आयत्तीकृ, आ-निविश् c., समा-धा 3 U, न्यस् 4 U, निक्षिप्, प्रति-पद् c. 3 क्षम् 1 A, सह् 1 A; 'of those who r. themselves to you' त्वय्यावेशितचित्तानां, त्वत्समाहितचेतसां; 'r. one's claims' स्वत्वं निवृत् c., अधिकारं त्यज्; 'r. oneself to his fate' दैवाधीनीभू. -ATION, s. परि-,त्यागः, उत्सर्गः, प्रत्यादेशः, पराक्षेपः; 'r. of one's claim' स्वत्वनिवृत्तिः; 'written r.' त्यागपत्र-लेखः. 2 समर्पणं, निक्षेपणं, न्यसनं, निवेशनं. 3 क्षमा, क्षांति f., संतोषवृत्ति f.; 'r. to God' ईश्वराधीनता; ईश्वरेच्छानुवर्तनं. -ED, a. त्यक्त, अर्पित,

न्यस्त, &c. 2 क्षमावत्, तितिक्षु, शांत, ईश्वरेच्छाधीन, ईश्वरन्यस्तचित्त.

RESIN, *s.* अ-,राल:, सर्जरस:, यक्षधूप:; *See* PITCH.

RESIST, *v. t.* प्रति-बंध् 9 P, प्रति-नि-रुध् 7 U, नि-,वार् 10, प्रत्यव-स्था 1 A; प्रतिकृ 8 U, प्रत्या-व्या-हन् 2 P; बाध् 1 A, निग्रह् 9 P, प्रतिष्टंभ् 9 P, परिपंथी-भू; *See* OPPOSE. -ANCE, *s.* प्रति-वि-रोध:, प्रति-बंध:, प्रति(ती)कार:, प्रतियोग:, पर्यवस्थानं, प्रतिष्टंभ:, प्रतियत्न:, प्रत्याघात:. -ER, *s.* प्रतियोगी, प्रतिबंधक:. -LESS, *a.* अनिवार्य, दुर्निवार, अप्रतिकार, अनवग्रह, दुर्निग्रह.

RESOLVE, *v. i.* निश्चि 5 U, निर्णी 1 P, व्यव-सो 4 P, अध्यव-सो, संकृप् c., मति-बुद्धि-कृ 8 U; *See* DETERMINE. -*v. t.* वि-ली c., वि-द्रु c. (melt); गल् c., क्षर् c.; सागरे नद्यो विलीयंते 'rivers are r. ed into the sea.' 2 वि-युज् 7 A, 10, विश्लिष् c., व्याकृ, वि-भिद् c., पृथक् कृ; *See* SEPARATE. 3 (Doubts) छिद् 7 P, अपाकृ, अपनी 1 P, निरस् 4 U; *See* DISPEL. -*s.* Resolution, q. v. -ED, *a.* विश्लेषित, व्याकृत, &c. 2 कृतनिश्चय-संकल्प-मति-बुद्धि, व्यवसित, निश्चित, निर्णीत, संकल्पित. -ENT, *s.* द्रावणं, शोथहृत्. -ER, *s.* विभेतृ *m.*, छेत्ता, छिद् *m.* in comp. -RESOLUTE, *a.* दृढ-स्थिर-निश्चय-संकल्प, स्थिरधी-मति, धीर, धृतिमत्; *See* RESOLVED also. -LY, *adv.* दृढं, सनिश्चयं, स्थिरचेतसा. -NESS, *s.*; *See* below. -RESOLUTION, *s.* निश्चय:, निर्णय:, संकल्प:, व्यवसाय:, सर्ग:, अध्यवसाय:; स्थिर-दृढ-निश्चय:-संकल्प:, मति *f.*, संप्र-अव-धारणा. 2 स्थिरता, स्थैर्यं, धैर्यं, धृति *f.*, निर्बंध:, स्थिरमतित्वं, अभिनिवेश:. 3 विश्लेषणं, वियोजनं, विभेदनं 4 उपन्यास:, प्रतिज्ञा, उपक्षेप:.

RESONANT, *a.* मुखरित, प्रतिध्वनित, प्रतिनादित, अनुनादिन्, संघुष्ट. -RESONANCE, *s.* अनु-प्रति-नाद:, प्रतिध्वनि:-स्वन:.

RESORT, *v. i.* (To) सेव् 1 A, नि-परि-°, श्रि 1 U, आ-सं-समा-उपा-°, उप-अभि-गम् 1 P or इ-या 2 P, अभि-उप-सृ 1 P; जुष् 6 A (frequently). -*s.* आश्रयणं, सेवनं, गमनं, &c. 2 आश्रय:, शरणं, आयतनं, अभिगमनस्थानं. 3 गति *f.*, उपाय:, शरणं.

RESOUND, *v. i.* प्रति-नद्-स्वन्-ध्वन् 1P, अनु-रस् 1P; *See* ECHO. -*v. t.* प्रतिध्वन् c. &c.; निनादेन पूर् 10; 'r. ing the directions' दिश: प्रतिनिनादेन पूरयन्, दिश: प्रतिध्वानयन्. -ING, *a.* Resonant, q. v.

RESOURCE, *s.* उपाय:, गति *f.*, प्रयुक्ति *f.*, कल्पना, साधनं; 'having no other r.' अनन्यगतिक. 2 (r. s) विभव:, द्रव्यसाधनं, आय:, वित्त-द्रव्य-सामग्री, अर्थ:, धनं; 'of small r. s' अल्पविभव.

RESPECT, *v. t.* पूज् 10, अर्च् 1 P, 10; सं-मन् c., आद् 6 A, सेव् 1 A, भज् 1 U, सं-भू c., सत्कृ 8 U, पुरस्कृ. 2 अपेक्ष् 1 A, उद्दिश् 6 P; *See* REFER, RELATE. -*s.* अपेक्षा, उद्देश:, संबंध:, अनुषंग:, विषय:; 'with r. to the result' फलापेक्षया, फलमुद्दिश्य. 2 सं-,मान:, पूजा, अभि-,अर्चनं, आदर:, संभावना, प्रश्रय:, गौरवं, पुरस्कार:, सत्कार:, अर्हणा, अर्चा, भक्ति *f.* 3 दृष्टि *f.*, अवेक्षा. 4 विषय:, प्रकरणं, वस्तु *n.*, अर्थ:. 5 (r. s) नमस्कार:, प्रणाम:, प्रणति *f.*, अभिवंदनं, प्रणिपात:, सभाजनं; 'in this r.' अत्र विषये; 'in all r. s' सर्वथा; 'pay one's r. s' प्रणम् 1 P, सभाज् 10, प्रणिपत् 1 P. -ABLE, *a.* पूज्य, माननीय, &c.; विशिष्ट, आर्य, सप्रतिष्ठ, गुरु; 'a r. person' आर्य-सु-जन:; 'of a r. family' अभिजात, अभिजनवत्, कुलीन. 2 मध्यम, सामान्य, नातिगुरु. -ABLY, *adv.* आर्य, उदार, in comp.; आर्यवत्, शिष्टवत्, सगौरवं; 'r. dressed' उदारनेपथ्यभृत्, आर्यवेषधारिन्. -FUL, *a.* सादर, सप्रश्रय, सगौरव, सविनय, आदर-मर्यादा-शील, मानपुर:-सर, आदर-मान-पूर्व. -FULLY, *adv.* सादरं, सप्रश्रयं, सविनयं. -ING, *a.* उद्दिश्य, अधिकृत्य, अपेक्ष्य; *See* REGARDING. -IVE, (Own) *a.* Ex. by स्व-स्व, ('Own' q. v.); 'they went to their r. houses' स्वं स्वं गृहं ते जग्मु:; 'in their r. places' स्वेषु स्वेषु स्थानेषु. 2 सापेक्ष, अकेवल, अविविक्त, अन्य-संबद्ध; इतरेतर-अन्योन्य in comp. -IVELY, *adv.* यथाक्रमं, यथानुक्रमं, पौर्वापर्येण, प्रत्येकं प्रत्येकं.

RESPIRE, *v. i.* उत्-नि-श्वस् 2 P, प्र-अन् 2 P. -ATION, *s.* श्वास:, श्वासोच्छ्वास:, प्राण:. -ATORY, *a.* श्वास in comp.; 'r. organ' श्वासेंद्रियं.

RESPITE, *s.* विराम:, विश्राम:, विरति *f.*, अवकाश:, विलंब:, विच्छेद:, प्र-उप-शम:. -*v. t.* विश्रामं-अवकाशं-दा 3 U.

RESPLENDENT, *a.* देदीप्यमान, विभ्राजमान, अतितेजस्; *See* BRIGHT, SPLENDID.

RESPOND, *v. i.* प्रति-वच् 2 P, प्रति-वद् 1 P, उत्तरं दा 3 U; *See* REPLY. -ENT, *s.* प्रतिवादिन् *m.*, प्रत्यर्थिन्, उत्तरवादी. -RESPONSE, *s.* उत्तरं, प्रतिवचनं, प्रतिवाक्यं. 2 प्रतिवाद:, उत्तरं. -RESPONSIBLE, *a.* अनुयोगाधीन, अनुयोज्य, आह्वानाधीन, प्रष्टव्य; oft. by उत्तरं दा; 'you are r. for this act' अस्य त्वयैवोत्तरं दातव्यं. 2 धुर्वह, धुर्वोढ, धुरंधर, धुरीण. -RESPONSIBILITY, *s.* भार:, भर:, धुर् *f.*; 'the whole r. of the kingdom' राज्यस्य समस्तो भर:, राज्यधुरा. 2 अनुयोगाधीनता, प्रष्टव्यता. -RESPONSIVE, *a.* उत्तरदायिन्. 2 संवादिन्.

REST, *v. i.* विश्रम् 4 P, वि-आ-रम् 1 P, (कार्यात्) निवृत् 1 A; निश्चलीभू 1 P, स्थिरीभू, निश्चेष्टीभू. 2 (Lean against) आलंब् 1 A, उपा-समा-आ-श्रि 1 U; नि-उप-धा pass.; 'with her face r. ing on her left hand' वामहस्तोपहितवदना (S. 4);

oft. by भरं कृ 8 U (with loc.); 'r. ing on his three hoofs (legs)' खुरत्रये भरं कृत्वा (H. 2); दंडे भारं निधाय, यष्टिमवलंब्य, &c. 3 प्र-उप-शम् 4 P, सुखिन्-निर्वृत-स्वस्थ- *a.* भू. 4 शी 2 A, स्वप् 2 P, सं-विश् 6 P, नि-द्रा 2 P, नि-ली 4 A. 5 स्था 1 P, भू, वृत्; 'r. with' अवलंब्, अपेक्ष् 1 A, अधीन-आयत्त- *a.* भू; *See* DEPEND (on); 'further than this r. s with fate' भाग्यायत्तमतः परं (S. 4). -*v. t.* विश्रम् c., शी c., संविश् c. 2 निविश् c., न्यस् 4 U, अवलंब् c., स्था c., आ-नि-धा 3 U; चापे विजयाशंसां निदधौ 'r. ed his hope of victory on his bow'; सकलरिपुजयाशा यत्र बद्धा सुतैस्ते (Ve. 5) 'on whom your sons had r. ed their hopes of overthrowing all enemies'. -*s.* विश्रा(श्र)मः, विश्रांति *f.*, कार्य-व्यापार-निवृत्तिः. 2 (Of a boby) स्थिरता, निश्चलता, निश्चेष्टता, अचलता. 3 सुखं, सौख्यं, स्वास्थ्यं, निर्वृति *f.*, प्र-उप-शमः-शांति *f.*; *See* EASE. 4 अवलंबनं, आधारः, स्थानं. 5 निद्रा, शयनं, संवेशः-शनं. 6 अव-,शेषः-शिष्टं; अन्य, इतर, अपर (*a.* pl.) (of persons); आदि, प्रभृति, in comp. 7 यति *f.*, अवसानं; 'at r.' निश्चल, निश्चेष्ट, अचल, स्थिर; सुस्थ, प्र-उप-शांत, निर्वृत, विश्रांत; निर्व्यापार, निरुद्योग. -ING, *a.* आलंबित, आश्रित, नि-उप-हित, स्थित; स्थ, वर्तिन् in comp.; 'r.-place' शयन-विश्राम-स्थानं. -LESS, *a.* व्याकुल, पर्या-समाकुल, पारिप्लव, अशांत, विह्वल, अस्वस्थ, व्यग्र, अनिर्वृत, उद्विग्न. 2 चपल, चंचल, चल; सदागति, सास्पंद. 3 उन्निद्र, विनिद्र, निर्णिद्र; 'passes r. nights' उन्निद्रा रजनीं गमयति (Mal. 3). -LESSLY, *adv.* अनिर्वृतं, व्यग्रं; चंचलतया. -LESSNESS, *s.* अनिर्वृतिः, अस्वास्थ्यं, उद्वेगः, व्यग्रता, चापल्यं, चांचल्यं, &c.

RESTITUTION, *s.* प्रतिदानं, प्रत्यर्पणं, प्रत्यानयनं.

RESTIVE, RESTIFF, *a.* दुष्ट, दुर्मार्गप्रस्थित, अदम्य, दुर्दम, प्रतीप, दुर्वृत्त, दुर्विनीत, उद्धत.

RESTORE, *v. t.* पुनर्-प्रति-दा 3 U or ऋ c. (अर्पयति), प्रति-पद् c., नियैत् 10, परावृत् c., प्रत्यानी 1 P; पुनर्लभ् 1 A, प्रति-पद् 4 A, प्राप् 5 P, (when passively used); प्रत्यर्पितस्वांगः 'with his body r. ed to him'; स्मरं वपुषा स्वेन नियोजयिष्यति (K. IV. 42) 'will r. to Cupid his body'; 'r. ed the universe to the rule of Indra' पुनरपि त्रिभुवनमिंद्रवशमगात् or नीतं, इंद्रशासनायत्तं कृतं; 'r. ed to its pristine splendour' पुराणशोभामधिरोपितायां (वसतौ) (R. XVI. 42); 'r. to life' जीव् c., सोच्छ्वास- *a.* कृ 8 U, असून् प्राप् c.; 'r. ed to consciousness' लब्धसंज्ञ, प्राप्तचैतन्य. -ATION, *s.* प्रतिदानं, प्रत्यर्पणं, प्रतिपादनं, नियोतनं, परावर्तनं, प्रत्यानयनं, उद्धारः, पूर्वावस्थाप्रापणं, &c. -ATIVE, *a.* अग्निवर्धन (नी *f.*), सत्त्व-बलवर्धन. -*s.* बलवर्धनं, बल्यं, वाजीकरणं. -ER, *s.* प्रतिदातृ *m.*, प्रत्यर्पयिता.

RESTRAIN, *v. t.* सं-अव-नि-रुध् 7 U, निग्रह् 9 P, नि-सं-यम् 1 P, नि-प्रति-बंध् 9 P, आ-वृ 5 U, संह 1 P, नि-,यंत्र् 10; *See* FORBID, CONTROL also. 2 (Legally) आसिध् 1 P, रुध्. -ER, *s.* नियंता, निग्रहीता, निरोधकः. -RESTRAINT, *s.* निग्रहः, नि-अव-रोधः, सं-नि-यमः, नि-,यंत्रणं-णा, प्रतिबंधः, स्तंभः, प्रतिरोधः, बाधा, यमः, जयः, दमः (of the senses). 2 आसेधः; 'r. of speech' वाग्यमः, वाक्संयमः.

RESTRICT, *v. t.* निरुध् 7 U, नियंत्र् 10, अवधृ 10, नि-सं-यम् 1 P, निबंध् 9 P, परि-मा 3 A, 2 P, निग्रह् 9 P; 'my actions being thus r. ed on all sides' एवं सर्वतो निरुद्धचेष्टाप्रसरस्य मे (Mu. 3); बाध् 1 A, व्यावृत् c. (scope); अपवाद इवोत्सर्गं व्यावर्तयितुमीश्वरः (R. XV. 7) 'can r. the scope of a rule'. -ED, *a.* नियत, समर्याद, सावधिक, परिमित, &c.; *See* LIMITED. -ION, *s.* सीमा, इयत्ता, नियमः, मर्यादा, अवधिः, परिच्छेदः, निबंधः, निरोधः, अवधारणा, व्यावृत्ति *f.*, यंत्रणा; 'without r.' स्वैरं, यथेच्छं, अनियंत्रणं. -IVE, *a.* व्यावर्तक, नियामक, परिच्छेदक, अवधारण; तुशब्दोऽवधारणार्थः, व्यावृत्त्यर्थकः (S. B.) 'has a r. sense.'

RESULT, *v. i.* अव-पर्यव-सो 4 P, वि-,परिणम् 1 U; *See* END. 2 उत्पद्-निष्पद् 4 A, प्र-सं-उद्-भू 1 P, जन् 4 A, प्रवृत् 1 A; *See* PRODUCE; gen. ex. by (*s.*); 'it will r. in nothing' तन्निरर्थकं भवेत्; 'it will r. in his destruction' तस्य नाश एव फलं भवेत्. -*s.* परिणामः, फलं. 2 अर्थः, गुणः, निष्पन्नं, सिद्धि *f.*; अंतः, अवसानं, शेषः, उदर्कः; पाकः; 'good r.' शुभफलं. 3 सिद्धांतः, मथितार्थः, निश्चितार्थः; 'producing no r.' निष्फलं, निर्गुण, व्यर्थ. -ING, *a.* ज, जन्य, उद्भव, फल in comp.; *See* PRODUCED.

RESUME, *v. t.* पुनः-भूयः-आदा 3 A or ग्रह् 9 P or आप् 5 P or लभ् 1 A, प्रत्याह् 1 P; 'let us r. (the thread of) our discourse' प्रकृतं-प्रस्तुत-विषयं-अनुसंदधाम or अनुसराम; oft. by पुनः-भूयः-आरभ् 1 A or कृ, with other words; 'r. ed their fighting' पुनर्योद्धुमारेभिरे; अतः परं पुनः कथयिष्यामि (M. 4) 'I shall r. my story from this point afterwards'; 'he r. ed his discourse' पुनर्वक्तुं प्रचक्रमे. -*s.* सारः, संग्रहः, सारार्थः. -RESUMPTION, *s.* प्रत्यादानं, पुनर्ग्रहणं, प्रत्याहारः.

RESURRECTION, *s.* पुनरुज्जीवनं, मृतोत्थापनं.

RESUSCITATE, *v. t.* पुनर्जीव् c. or उत्था c. (उत्थापयति), उज्जीव् c., प्रत्युद्-जीव् c. -ION, *s.* पुनर्जीवनं, उत्थापनं, उज्जीवनं, प्रत्युज्जीवनं.

Retail, *s.* अल्पशः विक्रयः, पण्यक्रयः. **-v. t.** अल्पशः विक्री 9 A or पण् 1 A. **-er**, 'r.-dealer' *s.* अल्पशः पण्यविक्रयिन्, खंडवणिक्.

Retain, *v. t.* धृ 1 P, 10, रक्ष् 1 P, धा 3 U; ग्रह् 9 P. **2** (Servants) वेतनं दत्वा नियुज् 7 A, 10, व्या-वृ c., उप-नी 1 A, (कर्मकरानुपनयते S. K.); (in memory) चित्ते-मनसि कृ 8 U or नि-धा or निविश् c., अवधृ. **-er**, *s.* अनुयायिन् *m.*, अनुगः, अनुचरः, पार्श्वकः, अनुगामी, अनुजीवी, सेवकः, भृत्यः, किंकरः, आश्रितः; *See* Servant; 'body of r.s' परिवारः, भृत्य-अनुयायि-वर्गः. **-Retention**, *s.* धारणा-णं, ग्रहणं. **2** (Faculty) *See* below; 'r. of urine' मूत्रसंगः. **-Retentive**, *a.* धारणावत्, धारणक्षम; 'r. faculty' धारणाशक्ति *f.*, धारणा, मेधा, धारणावती धीः, ग्रहणसामर्थ्यं. **2** धर, ग्राहिन् in comp., धारक.

Retaliate, *v. t.* प्रति-कृ 8 U, प्रत्यपकृ; (वैरं) निर्यत् 10, शुध् c., साध् c.; प्रति-हिंस् 7 P. **-tion**, *s.* प्रतिक्रिया, प्रति(ती)कारः, प्रत्यपकारः, प्रतिहिंसा, वैरसाधनं-शुद्धिः-निर्यातनं.

Retard, *v. t.* प्रति-नि-रुध् 7 U, स्तंभ् 9 P, प्रतिबंध् 9 P, बाध् 1 A, नि-वृ c.; *See* Obstruct. **2** विलंब् c., व्याक्षिप् 6 P, गतिं अवरुध् or स्तंभ्. **-ation**, *s.* निरोधः, प्रतिबंधः, वेग-गति-रोधः, विलंबः, व्याक्षेपः. **-ed**, *a.* निरुद्ध, विलंबितगति, अवरुद्धवेग.

Reticence, *s.* मौनं, संवृति *f.*, मूकभावः, वाग्यमः. **-Reticent**, *a.* मौनावलंबिन्, संवृतिमत्, यंत्रितवाच्, वाग्यत; *See* Reserved.

Reticular, *a.* जालाकार, जालरूप. **-Reticulation**, *s.* जालकर्म.

Retinue, *s.* परिजनः, परिवारः, परिबर्हः, परिच्छदः, अनुयायि-भृत्य-वर्गः, परिचराः, अनुचराः.

Retire, *v. i.* अपक्रम् 1 U, 4 P, अपगम् 1 P, अप-या-इ 2 P, चल् 1 P, परावृत् 1 A; एकपार्श्वे स्था 1 P. **2** विश्रामार्थं उद्योगाद्-विरम् 1 P or कार्य-अधिकारं-त्यज् 1 P, विविक्तवृत्तिं सेव् 1 A, सेवां त्यज्; 'r. from the world' सर्वसंगं परित्यज्, संन्यस् 4 U, विविक्ते वस्; शांतिमार्गोत्सुकोभत् (R. VII. 71) 'wished to r. from the world'. **-ed**, *a.* विविक्त, गुप्त, विजन, गूढ, प्रच्छन्न, एकांत, निभृत, निर्जन; *See* Lonely; 'a r. spot' रहःस्थानं, विविक्तं. **2** (Disposition) संवृतिमत्, गूढ, अनुत्तान; *See* Reserved. **3** त्यक्तकर्मन्, विविक्तसेविन्, त्यक्ताधिकार; 'a r. person' संन्यासी, मुक्तसंगः. **-ment**, *s.* अपसरणं, अपक्रमणं, अपगमनं, &c. **2** निर्जन-विविक्त-स्थानं, रहःस्थानं. **3** विविक्तवृत्ति *f.*, अधिकार-कार्य-त्यागः; विविक्तसेवनं; संन्यासः. **-ing**, *a.* अपक्रामिन् &c. **2** विविक्त-प्रिय-सेविन्, अधृष्ट; *See* Reserved.

Retort, *v. i.* प्रत्युत्तरं दा 3 U, प्रत्यवस्कंद् 1 P, प्रत्याक्षिप् 6 P, प्रतिकृ 8 U, प्रत्यभि-युज् 7 A, 10. **-s.** प्रत्युत्तरं, प्रत्यवस्कंदनं, प्रत्यपवादः, प्रत्याभियोगः, प्रत्यारोपः. **2** वकयंत्रं.

Retrace, *v. t.* (One's steps) प्रत्यावृत्, निवृत्, 1 A; *See* Return.

Retract, *v. t.* प्रत्या-ख्या 2 P, प्रत्यादिश् 6 P, (word, promise, &c.); निवृत् c., निवृत् 1 A (with abl.); व्यतिक्रम् 1 U, 4 P, अतिचर् 1 P. **-ion**, *s.* प्रत्याख्यानं, प्रत्यादेशः, निवर्तनं, उक्त-त्यागः-व्यतिक्रमः.

Retreat, *v. i.* अप-या 2 P, -गम्-स 1 P, अपक्रम् 1 U, 4 P, प्रतिनि-नि-प्रत्या-वृत् 1 A; *See* Retire. **2** प्र-वि-द्रु 1 P, अपधाव् 1 P, पलाय् 1 A. **-s.** अपसरणं, अपक्रमः-मणं, अपयानं, परावर्तनं, परावृत्ति *f.*, अपगमः, प्रतिनिवृत्तिः. **2** पलायनं, प्र-वि-द्राव. **3** शरणं, आश्रयस्थानं, निलयः, विविक्त-निर्जन-देशः-स्थानं.

Retrench, *v. t.* न्यूनीकृ 8 U, ऱ्हस् c., अल्पीकृ, अवच्छिद् 7 P, अवकृत् 6 P, खंड् 10, अप-चि 5 U. **-ment**, *s.* अवच्छेदः, खंडनं, व्यवच्छेदः, न्यूनव्ययः, व्ययापचयः.

Retribution, *s.* प्रति(ती)कारः, प्रतिफलं; *See* Revenge. **-Retributive**, **-Retributory**, *a.* प्रतिकारिन्, प्रतिकार in comp.

Retrieve, *v. t.* पुनः प्राप् 5 P or लभ् 1 A, प्रत्याह 1 P, उद्ध् 1 P, प्रति-,समा-धा 3 U; *See* Recover; 'irretrievably gone' असन्निवृत्तये गतं.

Retrocede, *v. i.* परावृत् 1 A; *See* Return.

Retrograde, *a.* प्रतीप, प्रतिलोम, वक्र, परावृत्त, विपरीत, प्रतीपगामिन्; 'in a r. direction' वि-,प्रतीपं; 'turn in a r. direction' प्रतीपयति (D.), परावृत् c. **-v. i.** परावृत् 1 A, प्रतीपं गम् 1 P; विपरीतं या-इ 2 P. **3** Decline, Decay, q. v. **-ation**, **Retrogression**, *s.* प्रतीपगमनं, विपरीतगमनं-गतिं *f.*

Retrospect, *s.* अतीतपर्यालोचनं, सिंहावलोकनं, अनुदर्शनं, भूतावलोकनं. **-ive**, *a.* अनुदर्शिन्, गतावलोकिन्. **2** भूतापेक्ष, गतकालसापेक्ष.

Return, *v. i.* नि-प्रत्या-प्रतिनि-वृत् 1 A, प्रति-या 2 P, पुनर्या, पुनर्-इ 2 P, प्रत्यागम्-परापत् 1 P, प्रति with words for 'Come', 'Go', q. v.; 'it is gone never to r.' असन्निवृत्त्यै तदतीतमेव (S. 6); 'r. to life' चेतनां लभ् 1 A or प्रतिपद् 4 A, सोच्छ्वास- *a.* भू. **2** Answer, q. v. **-v. t.** प्रति-दा 1 P, 3 U, प्रति-कृ c. (अर्पयति), निर्यत् 10, प्रति-पद् c. **2** पुनः आनी; 'r. good for good' प्रत्युपकारं कृ 8 U; 'r. an injury' प्रत्यपकृ, प्रतिहिंस् 7 P. **-s.** निवृत्ति *f.*, प्रत्यागमनं, प्रत्यावृत्तिः, परापतनं, पुनरागमनं, निवर्तनं, प्रत्यापानं, &c.; 'on

your r.' प्रतिनिवृत्ते त्वयि. 2 प्रत्यर्पणं, प्रतिदानं, निर्यातनं, प्रतिकारः, प्रत्युपकारः. 3 परिवर्तः, परिवृत्ति f., पर्यायः, आवर्तः. 4 फलं, लाभः, प्राप्ति f., उदयः, उत्पन्नं; 'in r.' प्रति in comp.; 'injury in r.' प्रत्यपकारः; 'benefit in r.' प्रत्युपकारः; 'in r. for' विनिमयेन, परिवर्तनेन.

RE-UNITE, *v. t.* पुनः संयुज् 7 U, 10 or सं-धा 3 U. -RE-UNION, *s.* पुनः संयोगः-समागमः-संसर्गः.

SPRINGE, *s.* पाशः; *See* SNARE.

SPRINKLE, *v. t.* सिच् 6 P, आ-नि-अव-°, सं-प्र-अभि-उक्ष् 1 P; अवक्ष् 6 P. **–ER,** *s.* सेक्तृ *m.*, सेचकः, प्रोक्षकः. **–ING,** *s.* प्रोक्षणं, आ-अव-सेकः; 's. of' ex. by विरल-*a.*, (विरलतुषारकणाः).

SPRITE, *s.* *See* GHOST.

SPROUT, *s.* मंजरी. **2** पल्लवः-वं, किस(श)लयः-यं; अंकुरः, प्ररोहः, उद्भिद्-अभिनवोद्भिद् *m.*, उद्भिज्जः. **–*v. i.*** उद्भिद् pass., प्ररुह् 1 P, स्फुट् 6 P, उत्-,फुल्ल 1 P, विकस् 1 P. **–ED,** *a.* उद्भिन्न, अंकुरित, पल्लवित, स्फुटित. **–ING,** *a.* उद्भिद्-ज्ज-द, प्ररोहिन्, अंकुरित. **–*s.*** उद्भेदः, प्ररोहः.

SPRUCE, *a.* विनीत, विनीतवेश; *See* NEAT.

SPUME,-Y, *See* FROTH,-Y.

SPUR, *s.* कंटकः. **2** नखः-खं (of a cock). **3** प्रोत्साहनं, उत्तेजनं, प्रचोदनं, उत्साहहेतुः-कारणं; *See* INCITEMENT, INCENTIVE; 'on the s. of the moment' पूर्वं अविचार्य or अनालोच्य, अविचारपूर्वं. **–*v. t.*** कंटकेन उत्सह् c., प्रतुद् 6 P. **2** (On) प्रोत्सह् c., प्रचुद् 10; *See* PROMPT.

Spurious, *a.* कृत्रिम, कल्पित, कपट-कूट-मिथ्या in comp.; *See* Counterfeit, False.

Spurn, *v. t.* (Away) लत्ताप्रहारेण प्रत्या-ख्या 2 P or निः-सृ c. or प्रत्यादिश् 6 P. 2 प्रत्या-ख्या, अवधीर् 10, तिरस्कृ 8 U, निर्-अव-धू 5, 9 U, निराकृ, धिक्कृ, सावज्ञं प्रत्यादिश्; *See* Scorn, Contemn.

Spurt, *s.* हठोद्यमः, महाप्रयत्नः. 2 सवेगः जलोत्क्षेपः. —*v. t.* सवेगं उत्क्षिप् 6 P or उदस् 4 U. —*v. i.* सवेगं निःसृ 1 P or निःस्रु 1 P.

Sputter, *v.* अंबूकृ 8 U, सनिष्ठीवं वद् 1 P or उच्चर् c. —*s.*,-ing, *s.* अंबूकृतं, निष्ठीवनं.

Spy, *s.* चारः, चरः, अप(व)सर्पः, स्पशः, प्रणिधिः, गूढ-गुप्त-चरः-गतिः, गूढ-गुप्त-पुरुषः; पिशुनः, सूचकः, कर्णेजपः, रहस्याख्यायी (slanderous); 'see as a s.' अपसृप् 1 P, (स मया पौरजानपदानपसर्पितुं प्रयुक्तः U. 1); 'the king sees by s. es' चारचक्षुर्महीपालः. —*v. t.* दृश् 1 P, ईक्ष् 1 A; *See* See. 2 निरूप् 10, निरीक्ष्, अवेक्ष्, अनुसं-धा 3 U.

Squab, *a.* ह्रस्वस्थूल.

Squabble, *See* Quarrel.

Squad, *s.* नवसैन्यदलं.

Squadron, *s.* (सैन्य-) गणः, गुल्मः-ल्मं, दलं, व्यूहः. 2 पोतावली, नौसमूहः.

Squalid, *a.* मलिन, कुत्सित, अमेध्य, अप-नि-कृष्ट, अधम, जघन्य; *See* Dirty.

Squall, *s.* चीत्कारः, चंडरवः, कलकलः, उत्क्रोशः, उच्चनादः-रवः. 2 (Of wind) चंडवातः, प्रभंजनः, प्रकंपनः. —*v. i.* उत्-व्या-कुश् 1 P, उच्चैः रु 2 P or घुष् 10; *See* Scream.

Squander, *v. t.* अप-व्ययं 10(व्यययति), विक्षिप् 6P, मुधा क्षै c. (क्षपयति) or हृ 1 P, अमितं व्ययं, अतिव्ययं कृ. —er, *s.* अपव्ययकारिन्, अमितव्ययकारी, विक्षेपी. —ing, *s.* अपव्ययः, विक्षेपः; अति-अमित-व्ययः.

Square, *s.* (In Arith.) वर्गः, कृति *f.*, द्विघातः; 's. root' वर्गमूलं, पदं; 'the root of the sum of their s. s' तत्कृत्योर्योगपदं; 'take the s. root' पदीकृ, (Li.). 2 (In geometry) वर्गः, समचतुरस्रः, समचतुर्भुजः. 3 चत्वरं, अंगनं-णं; *See* Courtyard; 's. formed by 4 houses' संजवर्गं, चतुःशालं. —*v. t.* वर्गीकृ 8 U, वर्गयति (D.), द्विः हन् 2 P or गुणयति (D.). 2 समीकृ, शुध् c.; समा-धा 3 U, प्रति-सं-आ-युज् 7 U, 10. —*v. i.* संवद् 1 P, युज्-उपपद्-pass.; *See* Suit. —*a.* समचतुर्भुज, समचतुरस्र. 2 Just, q. v.

Squash, *v. t.* संमृद् 9 P, संपीड् 10, संपिष् 7 P, चूर्ण् 10. —*s.* संमर्दः, संपीडनं, चूर्णनं.

Squat, *v. i.* उत्कटुकासनं कृ 8 U, अवसक्थिकासनं कृ; अवनतसक्थि आस् 2 A or उपविश् 6 P. 2 Cower, q. v.

Squeak, **Squeal**, *v. i.* कर्कशं रु 2 P or नद् 1 P, वाश् 4 A. —*s.* कर्कशरवः-नादः, वाशितं, चीत्कारः.

Squeamish, *a.* विवमिषु, वमनोन्मुख (स्त्री *f.*). 2 Fastidious, q. v. —ness, *s.* विवमिषा.

Squeeze, *v. t.* निः-सं-पीड् 10, संमृद् 9 P, निष्पिष् 7 P; (out) निर्गल् c., निष्कृष् 1 P, निर्दुह् 2 U; *See* Crush, Press. —ing, *s.* संपीडनं, संमर्दः-र्दनं, निर्गालनं, निष्पेषः, निष्कर्षः.

Squib, *s.* *See* Satire.

Squint, *v. i.* तिर्यक् दृश् 1 P or प्रेक्ष् 1A, वक्रं वीक्ष्. —*s.* तिर्यक्-वक्र-दृष्टि *f.*; 's.-eyed' वक्रदृष्टि, वलिर, केकर, केदर; तिर्यग्दृष्टि.

Squire, *s.* महाजनः, आर्यः, श्री pr. 2 साग्रहनिकः.

Squirrel, *s.* काष्ठमार्जारः-बिडालः, वृक्षशायिका, चमरपुच्छः.

Squirt, *s.* धारायंत्रं. —*v. t.* उदस् 4 U, उत्क्षिप् 6 P, बलेन निःसृ c. or निरस्.

Stab, *v. t.* (छुरिकया &c.) व्यध् 4 P, भिद् 7 P, क्षण् 8 P, छुर् 1 P; 's. in the secret' परोक्षे मर्मभेदं कृ 8 U. —*s.* क्षतं, वेधः, त्वग्भेदः.

Stable, *a.* स्थिर, निश्चल, अचल, दृढ, स्थावर; *See* Firm. —*s.* मंदुरा, वाजि-अश्व-शाला; (for elephants) वारी, गजबंधनी; (for cattle) गोशाला, गोष्ठं; 's.-keeper' अश्वपालः, मंदुरापालः. —Stability, *s.* स्थैर्यं, दृढता, सं-,स्थिति *f.*, स्थायित्वं, प्रतिष्ठा; *See* Permanence.

Stack, *s.* राशिः, सं-,चयः, संघः, उल्करः, चिति *f.* —*v. t.* राशीकृ 8 U, समाहृ 1 P, आ-सं-चि 5 U.

Staff, *s.* दंडः, यष्टि *f.*, वेत्रं (cane), लगुडः (wooden). 2 आलंबः-बनं, आधारः, आश्रयः. 3 वर्गः, गणः, अधिकारिगणः &c.; 's. of teachers' शिक्षकवर्गः-समुदायः.

Stag, *s.* हरिणः, मृगः, कुरंगः-गमः, एणः.

Stage, *s.* रंगः,-भूमि *f.*, शाला; नाट्यशाला; नेपथ्यं; 'behind the s.' नेपथ्ये. 2 मंचः-चकः. 3 (On a journey) वसति *f.*, (तिस्रो वसतीरुषित्वा R. VII. 33), प्रयाणकं; विश्रामस्थानं, अवस्थानं. 4 पदं, स्थानं, आस्पदं, वृत्ति *f.*, दशा, अवस्था. 5 (State of existence) आश्रमः, (वानप्रस्थाश्रमः); 'last s.' चरमावस्था; 'first s.' उपक्रमः, प्रथमारंभः; 's.-coach' अध्वगयानं, पथिकयानं; 's.-manager' सूत्रधारः; 's.-player' रंगोपजीविन् *m.*, नटः, नर्तकः.

Stager, *s.* ज्ञानवृद्धः, वृद्धः.

Stagger, *v. i.* प्रस्खल् 1 P, विचल् 1 P, भ्रम् 1, 4 P, घूर्ण् 1 A, 6 P, दोलायते (D.); सभयं-सचकितं-परावृत् 1 A. 2 विशंक् 1 A, विक्लृप् 1 A. —*v. t.* विचल् c., भ्रम् c., शंकां-विकल्पं-उत्पद् c.

Stagnant, *a.* स्थिर, निश्चल, निष्प्रवाह, निश्चेष्ट, गतिप्रवाह-हीन-रहित. —Stagnate, *v. i.* स्थिरीभू 1 P,

ex. by (*a.*) with भू; 'when the stream of knowledge s.s' यदा ज्ञानस्रोतसो गतिरोधः भवति, ज्ञानस्रोतोगतिः कुंठिता भवति. -ION,-STAGNANCY, *s.* अप्रवाहः, निश्चलता, गति-प्रवाह-अभावः, निश्चलता, स्थैर्यं.

STAID, *a.* धीर, ग(गं)भीर, स्थिर ; *See* SERIOUS.

STAIN, *v. t.* (lit. and fig.) दुष् c. (दूषयति), कलंकयति-मलिनयति-आविलयति-कलुषयति (D.), मलिनी-कलुषी-कृ 8 U, लिप् 6 P, लांछ् 1 P, समली-मलीमसी-कृ; 'what is the use of life s. ed by infamy (ignominy)' उपक्रोशमलीमसैः प्राणैः किं (R. II. 53); 's. ed by blood' रक्तमलिन; 'with s. ed hands' लिप्तहस्त. 2 रंज् c. -*s.* कलंकः, अंकः, दूषणं, लांछनं, चिह्नं, कलुषं, मलं, मालिन्यं. 2 निंदा, उपक्रोशः, वाच्यता, वचनीयं, गर्हा. -LESS, *a.* निष्कलंक, निर्मल, अदूषण, अकलुष, कलंक-लांछन-हीन, निर्दोष, निरवद्य.

STAIR, *s.* सोपानं, आरोहणं, पवेन् *n.*, भंगिः-गी *f.*; 'flight of s. s,' 's.-case,' 's.s' सोपानपथः-मार्गः-पद्धति *f.*-परंपरा-पदवी-पंक्ति *f.*, निश्रेणी, अधिरोहिणी.

STAKE, *s.* ग्लहः, पणः 2 कीलः, शंकुः, शूलः-लं; स्थाणुः, स्थूणा, शलाका. 3 संशयः, संदेहः; 'his life was at s.' संशयस्थं जीवितं तस्य, संशयितजीवित आसीत्, जीवितं संशयदोलाधिरूढं. -*v. t.* पण् 1 A, (with gen. of thing staked); शतस्य पणते 's. s a hundred'. 2 शूलेन-कीलेन व्यध् 4 P or बंध् 9 P, कील् 10.

STALE, *a.* वातयाम, परि-,उषित, रात्र्यंतरित; निःसार, नीरस, असत्त्व; दुष्ट (जलं). 2 जीर्ण, पुराण, उच्छिष्ट. -*v. i.* मिह् 1 P, मूत्र् 10.

STALK, *s.* कांडः-डं, नालः-लं-ली; बंधनं, वृंतं, प्रसव-शस्य-बंधनं. 2 साटोपगति *f.*, धीरोद्धता गतिः. -*v. i.* साटोपं परिक्रम् 1 U, 4 P, उद्धतं-सगर्वं-चल् or गम् 1 P, धीरोद्धतं गम्; 's. ing-horse' Pretext, q. v.

STALL, *s.* पण्यवीथिका, पण्यगेहं, आपणः, विपणि *f.*; *See* SHOP. 2 शाला, स्थानं; (for horses) मंदुरा, अश्वस्थानं; (for cattle) गोष्ठं, गो-शाला-स्थानं.

STALLION, *s.* बीजाश्वः, सवृषणः अश्वः.

STAMEN, *s.* केसरः, पुंकेसरः. -STAMINA, *s.* (fig.) सारः, सत्त्वं, तेजस् *n.*, बलसाधनं-हेतुः.

STAMMER, *v. i.* स्खल् 1 P, असमंजसं जल्प् 1 P, स्खलद्वाक्येन--अस्पष्टवर्णैः--अस्फुटस्वरेण-गद्गदवाचा--वद् 1 P, अस्पष्टं-अस्फुटं-वच् 2 P. -ER, *s.* अव्यक्त-अस्पष्ट-वादिन् *m.*, स्खलत्-गद्गद-वादी, स्खलितस्वरः. -ING, *s.* स्खलनं, अस्पष्ट-अव्यक्त-भाषणं.

STAMP, *s.* मुद्रा, मुद्रिका, मुद्रायंत्रं. 2 मुद्रा, चिह्नं, अंकः, न्यासः, पदं. 3 पादप्रहारः,-आघातः-विष्टंभः. 4 स्व-, the common s.' सामान्यप्रकृति, प्राकृत ; 'of high s. 'महाप्रभाव, महानुभाव ; 'of the same s.' समानरूप, तुल्य-स्वभाव-प्रकृति. -*v.* पादेन-पादतलेन-पद 1 P or आ-अभि-हन् 2 U, पादप्रहारं कृ 8 U. 2 अंकृ 10, मुद्रयति-चिह्नयति- (D.), लांछ् 1 P; 's.-ed with infamy' दुष्कीर्तिचिह्नित, उपक्रोशमलीमस, अपयशोंकित. 3 क्लृप् c., रच् 10, संवि-धा 3 U. 4 पादतलेन मृद् 9 P or चूर्ण् 10 or पिष् 7 P. -ED, *a.* अंकित, लांछित, समुद्र, कृतमुद्र, मुद्रांकित.

STANCH, *a.* दृढ, स्थिर, धीर, अचल; 'a s. adherent' बद्धानुरागः सहायः, दृढपक्ष्यः; *See* FIRM. -*v. t.* प्रवाहं-प्रस्रावं स्तंभ् 9 P or रुध् 7 U, शुष् c. -*v. i.* शुष् 4 P, स्तब्धप्रवाह-*a.* भू 1 P.

STANCHION, *s.* क्षुद्रस्तंभः-स्थाणुः.

STAND, *v. i.* स्था 1 P, पद्भ्यां स्था. 2 वृत् 1 A, विद् 4 A, अव-स्था 1 A; *See* REMAIN. 3 भू 1 P, अस् 2 P, वृत्. 4 निवृत्, विरम् 1 P, स्तंभ् pass., स्थिर-रुद्धगति-कुंठित- *a.* भू; 'this will remain a s.-ing stigma (on me)' वचनीयमिदं व्यवस्थितं (K. IV. 21); 'this argument will not s. long' इयं युक्तिर्न चिरं स्थास्यति, अचिरात् खंडयिष्यते. -*v. t.* सह् 1 A, मृष् 4 P, 10; *See* BEAR; 'to s. the test' निकषपरीक्षां तृ 1 P, निकषे परीक्ष् pass. 2 उप-नि-रुध् 7 U; प्रति-वि-रुध्. -against, प्रत्यव-स्था, बाध् 1 A; विरुध्; *See* OPPOSE. -by, -near, साहाय्यं कृ, संरक्ष् 1 P, परि-,त्रै 1 A, उपकृ; अनुग्रह. 2 स्था, अव-स्था, अनुरुध् 4 A, अनुवृत्; 's. by your lord's orders' शासने तिष्ठ भर्तुः (V. 5); *See* OBEY. -for, स्थाने-भूमौ स्था or वृत्. 2 पदं आप् desid. (ईप्सति). -off, अप-सृ 1 P, दूरतः स्था. -on, आ-अव-लंब् 1 A, आस्था (A), आश्रि 1 U. -out, प्रलंब्, उन्नम् 1 P; *See* PROJECT. 2 Persist, q. v. -over, व्याप्तिप् pass. 2 अधि-ष्ठा, अध्यास् 2 A; 'his name s.s over all' स सर्वेषां मूर्ध्नि तिष्ठति. -to, संवद् 1 P; 'does not s. to reason' सयुक्तिकं-सोपपत्तिकं न भाति. -up, उत्था. -*s.* आधारः, भाजनं, पात्रं, उपष्टंभः, आश्रयः ; 'ink-s.' मसीपात्रं-धानी ; 's. of a lamp' दीपाधारः-वृक्षः. 2 मंचः. 3 अव-,स्थानं, पदं, स्थिति *f.*, अव-,स्तंभः; गतिरोधः-स्तंभः, कुंठनं ; 'come to a s.' स्तब्ध-शांत- *a.* भू; 'bring to a s.' स्तंभ् 9 P or c., गतिं रुध् or वृ c.; 'at a s.-still' कुंठित, प्रतिहत-रुद्ध-गति ; 'make a s. against' प्रतिबंध् 9 P, प्रत्यव-स्था (A), प्रति-वि-रुध्. -ING, *s.* अव-,स्थितिः, अवस्थानं, स्थायित्वं; 'of long s.' चिरस्थायिन्, दीर्घकालीन, पुराण; *See* OLD. 2 स्थानं, पदं, आस्पदं, पदवी, प्रतिष्ठा: ; 'high s.' उच्चपदं, महती प्रतिष्ठा ; 'who

र-नित्य-स्थायिन्; *See* LASTING. 2 स्थित, उत्थित, दंडवत् स्थित. 3 स्थ, स्थायिन्, वर्तिन्, अव-,स्थित in comp.; 'with the hair s. on their end' पुलकित, रोमांचित, कंटकित.

STANDARD, *s.* ध्वजः, पताका, केतुः, केतनं, वैजयंती; 's.-bearer' ध्वजिन्, पताकिन्. 2 मानं, प्र-परि-°,सूत्रं, विधिः, नियमः; 'a s. person' प्रमाणपुरुषः, प्रमाणं; 's. authors' प्रमाणभूताः (विशिष्टाः) ग्रंथकृतः.

STANZA, *s.* श्लोकः.

STAPLE, *a.* प्रधान, मुख्य, विशिष्ट. —*s.* Market, q. v. 2 लोहपुटः.

STAR, *s.* तारा, तारका, नक्षत्रं, ज्योतिस् *n.*, उडुः, भं, ऋक्षं; 'the s. s collectively' उडुगणः, भगणः; 'shooting s.' नक्षत्रपतनं, उल्का; 's. under which one is born' जन्मनक्षत्रं; 's.-light' ताराप्रकाश, तारकित; (*s.*) ताराप्रकाशः. —*v. t.* तारासनाथ-*a.* कृ 8 U, तारकयति (D.); 'the breast s. ed with drops of tears' अश्रुबिंदुतारकितपयोधरा; 'the s.-red heaven' तारासनाथं-तारकितं-नभः. —RY, *a.* तारासंकुल-मय (यी *f.*)-आकीर्ण-सनाथ, तारकित. 2 तारानिभ, तारा in comp.; 's. firmament' नभोमंडलं, नक्षत्रमंडलं.

STARBOARD, *s.* नौदक्षिणपार्श्वः.

STARCH, *s.* मंडः-डं. —*v. t.* मंडयति (D.), मंडेन लिप् 6 P.

STARE, *v. i.* सूक्ष्मं-बद्धलक्ष्यं-स्थिरदृष्ट्या-अनिमेषलोचनाभ्यां-प्रेक्ष् 1 A or दृश् 1 P or आलोक् 1 A, 10, अनन्यदृष्ट्या निरीक्ष्, स्निग्धं निर्वर्णे 10. —*s.* स्थिरदृष्टि *f.*, बद्ध-अनिमेष-दृष्टिः, अनन्यदृष्टिः. —ING, *a.* बद्ध-स्थिर-अनन्य-अनिमेष-दृष्टि, बद्धलक्ष्य, विवृत-उत्फुल्ल-नयन-लोचन &c., उन्मीलिताक्ष.

STARK, *a.* समग्र, पूर्ण, केवल, अत्यंत, अशेष. 2 रूक्ष, विषम. —*adv.* केवलं, अत्यंतं.

START, *v. i.* प्र-स्था 1 A, प्र-या 2 P, प्र-,चल् 1 P; यात्राभिमुखं प्रवृत् 1 A 's. on a journey' (Mal. 6). 2 स्फुर् 6 P, सहसा कंप् 1 A or स्पंद् 1 A; 's. back' ससाध्वसं परावृत् or अपसृ 1 P, सचकितं व्यपसृ, चकित-*a.* भू; संत्रस्त-भयचकित- *a.* भू; 's. aside' स्वस्थानात् विचल् or भ्रंश् 1 A, 4 P or च्यु 1 A; अभिमतयः शब्दं सहंते (S. 1) 'not s. ing aside &c.; 's. up' सहसा उत्था; (in sleep) सहसा अवबुध् 4 A.; (an idea) सहसा उद्भू or उत्पद् 4 A. —*v. t.* प्रवृत् c., प्र-स्तु c., संचल् c., प्रचर् c. 2 उद्विज् c., संत्रस् c., चकित-*a.* कृ 8 U, उत्था c. (उत्थापयति), भी c.; अकस्मात् त्रस् c. or कंप् c. 3 Propose, q. v. —*s.* प्रस्थानं, प्रस्थानारंभः. 2 कंपः-पनं, स्फुरणं, साध्वसोत्कंपः, सहसाकर्षः, आकस्मिकप्रकंपः; चकितं; 'gave a sudden s.' (सहसा) ससाध्वसं चकितो बभूव; 'with a s.' चकितं, सचकितं. 2 प्रवर्तनं, आरंभः, प्रचारः; 'to get or have the s. of' पूर्वं (with abl.) प्र-स्था or प्रारभ् 1 A; 'by s. s' सातत्यं विना, मुहुरिव, आकस्मिकयत्नैः.

STARTLE, *v. i.* See START; 's. ing news' उद्वेगकरी वार्ता; 'in a very s. ed manner' चकितचकितं.

STARVE, *v. i.* क्षुधया पीड् or अर्द् pass., आहाराभावात् मृ 6 A or अव-,सद् 1 P or नश् 4 P, क्षुधया अवसद्; (oneself) आहारं-अशनं-त्यज् 1 P, प्रायोपवेशनं कृ 8 U; 'likely to s.' आसन्नमृत्युरिव, अनशनेन मुमूर्षुरिव; (fig.) अव-,सद्. —*v. t.* अनशनेन मृ c. or नश् c.; 'be sure, I shall s. myself (to death)' मया प्रायोपवेशनं कृतं विद्धि (P. IV. 1). —ATION, *s.* अनशनं, अनाहारः, आहाराभावः, क्षुधावसादः, क्षुत्क्षामता. —ED, -ING, *a.* क्षुधापीडित-अर्दित-आर्त, क्षुधावसन्न, निराहार, निरन्न.

STATE, *s.* अवस्था, दशा, भावः, स्थिति *f.*, वृत्ति *f.*, गति *f.*; त्व-ता affixed. 2 राज्यं, राष्ट्रं, राजन् in comp.; 's. affairs' राजकार्याणि; 's.-servant' राजसेवकः. 3 ऐश्वर्यं, आडंबरः, आटोपः, प्रतापः, वैभवं, विभूति *f.*; श्रीः, गौरवं. —*v. t.* कथ् 10, आचक्ष् 2 A, वच् 2 P, वद् 1 P, नि-आ-विद् c., निर्दिश् 6 P, वि-ज्ञा c. (ज्ञापयति), वर्ण् 10, उपन्यस् 4 U; *See* TELL, SAY. —ED, *a.* कथित, उक्त, निर्दिष्ट, वर्णित, &c.; 'as above s.' यथानिर्दिष्ट. 2 नियत, व्यवस्थित. —LY, *a.* सप्रताप, सश्रीक, सवैभव, उज्ज्वल; *See* MAJESTIC, GRAND. 2 साटोप, उद्धत, सखेल; 's. in gait' साटोपगामिन्, खेलगति-गामिन्, हंसगामिन्. —*adv.* साटोपं, उद्धतं, सखेलं, सलीलं, सप्रतापं. —MENT, *s.* कथनं, आ-नि-वेदनं, उक्ति *f.*, वचनं, उपन्यासः, निर्देशः, विज्ञापना; 'clearness of s.' उपन्यासशुद्धिः. —STATESMAN, *s.* नीतिज्ञः-विद् *m.*-विशारदः, राजकार्यकुशलः-धुरंधरः, राजनीतिनिपुणः. —SHIP, *s.* नीतिज्ञता, नीति *f.*

STATION, *s.* स्थानं, अव-,स्थिति *f.*, आस्पदं, स्थलं, पदं, अवस्थानं. 2 दशा, पदं, अवस्था, वृत्ति *f.*, पदवी *f.*; 'high s.' उन्नतपदं, परमस्थानं, उन्नतावस्था; 's. of life' जाति *f.* 3 अधिकारः, नियोगः, पदं, पदवीः-वी. 4 निवेशः. —*v. t.* स्था c. (स्थापयति), अव-सं-प्रति-°, निवेश् c.; 's. in any post' पदे-अधिकारे-नियुज् 7 A, 10. —ARY, *a.* स्थिर, अचल, निश्चल, अचर, स्थावर; अजंगम. 2 अवर्धिष्णु, अवर्धमान.

STATIONER, *s.* लेखनसाधनविक्रयिन् *m.* —Y, *s.* लेखलिपि-साधनं-सज्जा-सामग्री.

STATUE, *s.* प्रतिमा, प्रतिकृति *f.*, मूर्ति *f.*; *See* IMAGE. —STATUARY, *s.* कारः in comp. with (*s.*), तक्षकः. 2 मूर्तिविधानं-करणं.

STATURE, *s.* प्रमाणं, परिमाणं, उच्चता, मूर्ति *f.*, आकृति *f.*, आकारः; 'of low s.' अल्पप्रमाण; 'of dwarfish s.' वामनाकृति, खर्व, ह्रस्व; 'short in s.' ह्रस्व-अल्प-मूर्ति.

STATUTE, *s.* विधिः, नियमः, व्यवस्था; *See* LAW, RULE. —STATUTORY, *a.* विधिप्रोक्त, व्यवस्थाकल्पित, नियत.

STAVE, *s.* काष्ठखंडः-डं, फलकः-कं. —*v. t.* रफुट् c., छिद्रयति (D.).

STAY, *v. i.* वस् 1 P, स्था 1 P, वृत् 1 A, अध्यास् 2 A; *See* DWELL. 2 विरम् 1P; अलं with instr. or gerund. —*v. t.* स्तंभ् 9 P, प्रतिबंध् 9 P, उपनि-रुध् 7 U, विलंब् c., नि-प्रति-वृ c.; नि-प्रति-षिध् 1 P; 's. one's progress' मार्गं निरुध् (Mr. 5.). 2 आ-अव-लंब् 1 A, आश्रि 1 U, आधृ 10, अव-उप-स्तंभ्; *See* PROP. —*s.*,-ING, *s.* नि-,वासः, अवस्थानं, अव-,स्थिति *f.* 2 आलंबः, आधारः, आश्रयः, उपघ्नः, उपअव-ष्टंभः. 3 प्रतिष्टंभः, निरोधः, गतिरोधः, प्रतिबंधः. —STAYS, *s.* अंगिका, चोलः-लं, कूर्पासकः.

STEAD, *s.* स्थानं, भूमि *f.*; *See* INSTEAD (of).

STEADFAST, *a.* स्थिर, दृढ, सतत, अचल; निश्चल, धीर, स्थिरबुद्धि-वृत्ति, अचंचलवृत्ति; 's. in friendship' दृढसौहृद. —LY, *adv.* दृढं, स्थिरं. —NESS, *s.* स्थैर्यं, धैर्यं, धृति *f.*

STEADY, *a.* स्थिर, दृढ, अचल, निश्चल, धीर, अस्खलित, धृतिमत्; सतत, अविश्रांत, अविरत; अविरतोद्योग, सदोद्यमिन्; 'of s. action' स्थिरकर्मा; 's. in resolution' स्थिर-दृढ-निश्चय-संकल्प. 2 अनुद्विग्न, अक्षुब्ध, अनाकुल, प्रशांत. —*v. t.* स्थिरीकृ 8 U, दृढयति (D.), दृढीकृ, व्यव-स्था c. (स्थापयति). —ILY, *adv.* स्थिरं, दृढं, धीरं, अनवरतं, अविरतं, नित्यं, सदा, अविश्रांतं. —INESS, *s.* स्थैर्यं, धैर्यं, अचापल्यं, नित्यता, सातत्यं, अविच्छेदः, अविरति *f.*; 's. of conduct' अव्यभिचारः, आचारमर्यादा.

STEAL, *v. t.* चुर् 10, मुष् 9 P, अपह 1 P, स्तेन् 10. —*v. i.* चुर्, स्तेयं वि-धा 3 U. 2 (Away) अलक्षितं-निभृत-गम् 1 P or अपक्रम् 1 U, 4 P or अपसृ 1 P; निःशब्दं चल् 1 P; 'the night, the quarters of which (gradually) stole away' अविदितगतयामा रात्रिः (U. 1); 's. over,-upon' अलक्षितं समाक्रम् or अभिभू or ग्रस् 1 A; 'sleep gently stole upon my eyes' शनैर्निद्रा निमीलितलोचनं मामकार्षीत्. —ER, *s.* अपहर्तृ *m.*, अपहारकः, स्तेनः, स्तेयकृत्, चो(चौ)रः, मोषकः, तस्करः, हारी in comp.; 's. of hearts' हृदयचौरः. —ING, *s.* स्तेयं, चौरकर्मन् *n.*, स्तेयं, चौर्यं, मोषः, अपहारः. —TH, *s.* अपहारः &c. 2 छलं, गूढं कर्म, चोरिका, निह्नवः, निभृत-प्रच्छन्न-कर्म; 'marriage by s.' चोरिकाविवाहः. —THILY, 'by s.' *adv.* छलेन, निभृतं, प्रच्छन्नं, अलक्षितं, अप्रकाशं, सुगूढं, रहसि. —THY, *a.* निभृत, प्रच्छन्न, गुप्त, गूढ, रहस्य, अलक्षित, अप्रकाश, अव्यक्त.

STEAM, *s.* बाष्पः; 's.-boat', 'steamer' अग्निनौका, बाष्पीयनौः. —*v. i.* बाष्पायते (D.), बाष्पं उत्-सृज् or उत्क्षिप् 6 P or उद्-गृ 6 P. —*v. t.* बाष्पेण व्याप् c., स्विद् c.

STEED, *s.* अश्वः, तुरगः, वाजिन् *m.*; *See* HORSE.

STEEL, *s.* चित्रायसं, सारलोहं, पिंडायसं, तीक्ष्णायसं, शस्त्रकं. 2 शस्त्रं, शस्त्रकं; 's.-yard' तुलादंडः, मापनदंडः. —*a.* तीक्ष्णायस (सी *f.*). —*v. t.* कठिनीकृ 8 U, दृढी-निर्दयी-कृ.

STEEP, *a.* दुरारोह, उत्सर्पिन्, पातुक, प्रवण, अतट. —*s.* प्रपातः, भृगुः, अट्टटः. —*v. t.* नि-,मस्ज् c. (मज्जयति), स्ना c. (स्न-स्ना-पयति), जलेन आप्लु c. or सिच् 6 P. 2 सं-धा 3 U, वास् 10, भू c.; 's.ing indigo' नीलीसंधानं-पाचनं; 's.ed in perfumes' वासित, भावित.

STEEPLE, *s.* शिखरं, शृंगं, (of a palace &c.).

STEER, *s.* वत्सतरः, दम्यः. —*v. t.* चल् c., वह् c., मार्गं उपदिश् 6 P (with gen.); नी 1 P, मार्गं निश्चि 5 U or निर्णी; 's. one's course' स्वमार्गं-कर्तव्यं-निर्णी; 'he who s.s the vessel of state' (निर्बाध) राज्यधूर्वहः, भुवनराज्यभारमौकर्णधारः (Ka. 56). —ER,-STEERSMAN, *s.* कर्णधारः-ग्राहः, कर्णिन् *m.*, नाविकः.

STELLAR, *a.* तारा in comp.; *See* STARRY. —STELLATE,-ED, *a.* तारोपम.

STEM, *s.* बंधनं, वृंतं, प्रसवबंधनं. 2 भ-,कांडः-डं; स्तंभः, नालं-लः. —*v. t.* प्रतिबंध् 9 P, प्रति-वि-रुध् 7 U, प्रतिष्टंभ् 9 P, प्रत्यव-स्था 1 A, प्रतिकूलयति-प्रतीपयति (D.); *See* OPPOSE.

STENCH, *s.* पूति *f.*, पूतिगंधः; दुर्गंधः.

STENTORIAN, *a.* अतितार, अत्युच्च; उरुस्वन.

STEP, *s.* पदं, पद-पाद-न्यासः-विक्षेपः, क्रमः, पद-चरण-पातः, विक्रमः (as in त्रिविक्रमः); 'Vishnu took 3 s.s' विष्णुस्त्रीणि पदानि विचक्रमे. 2 पदं, क्रमः, (distance also); पर्यायः, परिपाटी; 'at every s.', 's. by s.' प्रति-अनु-पदं, पदे पदे, पदात्पदं, क्रमशः, पदशः; 'by s. s' क्रमशः, शनैः शनैः, क्रमेण; 'the first s.' प्रथमारंभः, उपक्रमः, प्रथमचरणः. 3 (Of a ladder) भंगि *f.*, सोपानं, आरोहणं; 'flight of s. s' अधिरोहिणी; *See* LADDER, STAIRCASE. 4 उपायः, प्रतिपत्ति *f.*, क्रिया; वयस्य कात्र प्रतिपत्तिः (Mal. 3); 'not knowing what s. s to take' प्रतिपत्तिमूढः, विषादलुप्तप्रतिपत्ति (R. III. 40); 's.-brother' वैमात्रः-त्रेयः, विमातृजः, अन्योदर्यः; 's.-child' अन्योदर्यं अपत्यं; 's.-daughter' सपत्नीसुता; 's.-father' मातृपतिः; 's.-mother' विमाता, सपत्नीमाता; 's.-sister' वैमात्री-त्रेयी, विमातृजा, अन्योदर्या; 's.-son' सपत्नीसुतः. —*v.* पादं विन्यस् 4 U or निक्षिप् 6 P, पादन्यासं-पदविक्षेपं-कृ 8 U; 's. ing over his body' तच्छरीरे पादन्यासं

कृत्वा. 2 क्रमशः चल् 1 P or गम् 1 P; (over) आक्रम् 1 U, 4 P; व्याप् 5 P; 'as much space as I can s. over in three steps' यावतीं भूमिं त्रिपदेनाहं व्याप्नुयां-आक्रमेयं-तावतीं; 's. in between' अंतरा आगम् or पत् 1 P; 's. towards' प्रतिपद् 4 A -PING, *s.* पादन्यासः &c.; 's.-stone' सोपानशिलाप्रस्तरः.

STEREOTYPED, *a.* स्थिर, अपरिवर्तनीय, दृढसंकल्पित.

STERILE, *a.* वंध्य, अफल, निष्फल. -ITY, *s.* वंध्यता, निष्फलत्वं.

STERLING, *a.* यथार्थ, परमार्थ, वास्तविक (की *f.*); अकृत्रिम, सारभूत.

STERN, *s.* पृष्ठभागः. -*a.* निष्ठुर, रूक्ष, दारुण, परुष, कठिन, कठोर, उग्र; निर्दय, क्रूर; 'in a decisive and s. tone' परिच्छेदनिष्ठुर; 'of s. stuff' अभेद्यसार. -LY, *adv.* निष्ठुरं, कठोरं, दारुणं, उग्रं -NESS, *s.* नैष्ठुर्यं, कठोरता, पारुष्यं.

STERNUM, *s.* उरोस्थि *n.*

STERNUTATION, *s.* *See* SNEEZE. -STERNUTATORY, *s.* नस्यं.

STEWARD, *s.* परिचारकः. 2 अर्थाधिकारी, कार्याधीशः. -SHIP, *s.* कार्याधीशत्वं.

STIBIUM, *s.* सौवीरं, कापोतं, स्रोतोंजनं, यामुनं.

STICK, *s.* दंडः, यष्टि *f.*; वेत्रं, वेत्रयष्टिः (cane); काष्ठं, काष्ठखंडः, लगुडः. -*v. i.* सं-लग् 1 P, संश्लिष् 4 P, संज् pass., आ-सं-अनु-°, आसस्ज् 1 P, अनुबंध् 9 P, संसक्ती-संलग्नी-भू 1 P. 2 मस्ज् 6 P, निरुध्-स्तंभ् pass.; 'the wheels stuck fast into the mire' पंके गाढं निरुद्धानि चक्राणि. 3 विक्रुष् 1 A, विशंक् 1 A; *See* DOUBT; 's. out' प्रलंब् 1 A; *See* PROJECT. -*v. t.* निविश् c., अनुबंध्, आ-सं-संज् c., संलग्नीकृ 8 U. 2 प्रस c. -Y, *a.* स्निग्ध, चिक्कण, श्यान, सांद्र, संलग्नशील.

STICKLE, *v. i.* पक्षं ग्रह् 9 P. 2 Contend, q. v.

STIFF, *a.* कठिन, संहत; दृढ, घन, अनम्य, अशिथिल, स्तब्ध. 2 परुष, रुक्ष, कर्कश. 3 असुगम, दुर्बोध, दुर्जेय, गहन; 's.-hearted,-necked' प्रतिनिविष्ट, स्तब्ध, दृढनिश्चय. -EN, *v. t.* कठिनीकृ 8 U, घनीकृ, स्तंभ् 9 P or c. -*v. i.* कठिनीभू 1 P; 'remain with your body s. ed' स्तंभितगात्रास्तिष्ठ. -LY, *adv.* दृढं, कठिनं. -NESS, *s.* कार्ठिन्यं, दृढता, &c.

STIFLE, *v. t.* श्वासं नि-,रुध् 7 U, श्वासरोधं कृ. 2 स्तंभ् 9 P or c., निग्रह् 9 P, नियम् 1 P, नियंत्र् 10; *See* CHOKE, SUPPRESS; 'with s.ed words' स्तंभितवाक्.

STIGMA, *s.* कलंकः, अंकः, लांछनं, दूषणं. -TIZE, *v. t.* निंद् 1 P, परिवद् 1 A, दुष् c. (दूषयति); कलंकयति (D.), अपकीर्त्या अंक् 10; *See* STAIN.

STILE, *s.* सोपानमार्गः-पद्धति *f.*

STILETTO, *s.* *See* DAGGER..

STILL, *s.* अर्धायंत्रं, बकयंत्रं, संधानपात्रं. -*a.* निःशब्द, नीरव, मूक; *See* SILENT. 2 निष्कंप, निश्चल, अचल, स्थिर, निश्चेष्ट. 3 प्र-उप-शांत, स्तिमित; निर्वात, अक्षुब्ध; *See* QUIET; 'heart, be s.' हृदय मा उत्तास्य (S. 1); 'in the s. midnight' स्तिमितेऽर्धरात्रे; 'to be s.' प्र-उप-शम् 4 P; 's.-born' मृतजात; 'a s.-born child' मूढगर्भः, मृतजातः. -*adv.* तथापि. 2 अद्यापि; अद्य यावत. 3 सदा, सर्वदा. 4 शांतं, तूष्णीं, निःशब्दं. -*v. t.* शम् c. (शमयति), प्र-उप-°, निःशब्दीकृ 8 U. 2 Stop, q. v. -NESS, *s.* निःशब्दता, निश्चलता, शांतता, अक्षोभः.

STILT, *s.* पादयष्टि *f.*

STIMULATE, *v. t.* उत्तिज् c., प्रोत्साह् c., प्रचुद् 10, प्रवृत् c., प्ररुच् c., उद्दीप् c., (शक्ति-तेजः-) वृध् c. -ING,-STIMULANT, *a.* दीपक-न, उत्तेजक, प्ररोचक, तेजोवर्धिन्; प्रवर्तक, प्रोत्साहक. -*s.* दीपनं-कं, प्र-,रोचनं, जीवनीयं, उत्तेजकं, प्रवर्तकं, &c. -ION, *s.* प्र-उद्-दीपनं, प्रोत्साहः-हनं. -STIMULUS, *s.* दीपनं, प्रोत्साहः-हनं, प्रचोदनं, उत्तेजनं, &c.; 'give s. to' वृध् c. &c.

STING, *v. t.* दंश् 1 P. 2 अत्यंतं पीड् 10 or व्यथ् c. (व्यथयति), मर्माणि भिद्-छिद् 7 P or स्पृश् 6 P. -*s.* दंशः; दंशचंचु *f.*, कंटकः, शंकुः; (of a scorpion) अलं. 2 मर्मन् *n.*, रसः. -ING, *a.* कटु, दंशक, मर्मस्पृश्, अरुंतुद.

STINGY, *a.* कृपण, बद्धमुष्टि, दानविरक्त, अमुक्तहस्त, क्षुद्र, कदर्य. -ILY, *adv.* कृपणं, बद्धमुष्ट्या. -INESS, *s.* कार्पण्यं.

STINK, *s.* पूति *f.*,-गंधः, दुर्गंधः. -*v. i.* Ex. by 's. ing' with भू. -ING, *a.* पूतिगंधि, दुर्गंध, कुत्सितगंध, पूति.

STINT, *v. t.* नियम् 1 P, निबंध् 9 P, निग्रह् 9 P, संह 1 P, परि-मा 3 A,2 P, परिच्छिद् 7 P. -*s.* परिमाणं, परिमिति *f.*, नियमः-मनं, इयत्ता, मर्यादा; *See* LIMIT.

STIPEND, *s.* वेतनं, वृत्ति *f.*, वर्तनं, भृति *f.* -STIPENDIARY, *s.* वृत्ति-वेतन-भुज् *m.*, वृत्तिग्राही, वैतनिकः.

STIPULATE, *v. i.* समयं-संविदं-कृ 8 U, नियम् 1 P; प्रतिपद् 4 A, परि-,पण् 1 A, प्रति-ज्ञा 9 A, अभ्युपगम् 1 P, -इ 2 P. -ED, *a.* नियत, नैयमिक-सामयिक- (की *f.*), प्रतिज्ञात, संकेतित, निरूपित, निर्दिष्ट. -ION, *s.* समयः, संविद् *f.*, अभिसंधिः, नियमः, पणः, संकेतः, प्रतिज्ञा.

STIR, *v. t.* चल् c., सं-वि-°; *See* MOVE; 'when the fuel is s.ed, the fire blazes up' ज्वलति चलितेंधनोऽग्निः (S. 6). 2 आ-वि-लुड् c., क्षुभ् c., (of water); मंथ् 9 P or c., आ-धू 5, 9 U; (up) सं-,क्षुभ् c., उत्तिज् c., प्रकुर् c.; उद्दीप् c., प्रवृत् c., प्रचुद् c.; *See* EXCITE, PROMPT. -*v. i.*

क्षुभ् 4 P, 1 A, चल् 1 P, उद्विग्न-संक्षुब्ध- *a.* भू 1 P. **-s.** संक्षोभः, संभ्रमः, चलनं, धूननं, विप्लवः, तुमुलं. **-RING,** *a.* प्रक्षोभिन्, प्रकोपक, उद्दीपक.

STIRRUP, *s.* पादग्रहणी-धारणी.

STITCH, *v. t.* सिव् 4 P; *See* SEW; संश्लिष् c. **-s.** गुणः, सूचिमार्गः-अंकः. **2** शूलः-लं; 'a s. in time saves nine' स्वल्पोपि कालकृतो यत्नः महांतं उत्तरकरणीयं यत्नं व्यावर्तयति. **-ING,** *s.* सी(से)वनं, स्यूति *f.*

STOCK, *s.* मूलं, मूलधनं, परिपणः; नीवि-वी *f.*; 'common s.' गणद्रव्यं. **2** त्सरुः, दंडः, वारंगः, मुष्टि *m. f.* **3** संचयः, राशिः, संभारः, सामग्री; 's. in cattle' गोधनं, पशुसंपत्ति *f.* **4** मूलं, प्रसूति *f.*, वंशः, कुलं, अन्वयः. **5** प्र-,कांडः-डं, स्कंधः. **6** स्तंभः, स्थाणुः. **7** (S.s) निगडः, हडिः; 's.-dove' कपोतः; *See* DOVE; 's.-still' स्थिर, स्थाणुरिव अचल. **-v. t.** सं-भृ 1, 3 U, संचि 5 U, समाहृ 1 P, राशीकृ 8 U, उपक्लृप् c., परि-,पूर् 10. **-a.** मूल in comp., प्रधान, विशिष्ट; 's. instance' मूर्धाभिषिक्तमुदाहरणं. **-STOCKADE,** *s.* स्तंभपंक्ति *f.*, शंकुवरणः.

STOCKING, *s.* चरणच्छदः, पादावरणं, पादत्रं-त्राणं.

STOIC,-AL, *a.* निःस्पृह, जितेंद्रिय, निःसंग, समबुद्धिचित्त, सुखदुःखानधीन, समसुखदुःख, इंद्रियानायत्त. **-ALLY,** *adv.* औदासीन्येन, निःसंगं, वीतस्पृहं. **-ISM,** *s.* निःस्पृहता, औदासीन्यं, आत्मसंयमः, इंद्रियजयः, सुखदुःखसमता.

STOLID, *a. See* STUPID.

STOMACH, *s.* जठरः-रं, पक्वाशयः, कोष्ठः, अन्नाशयः, आमाशयः; उदरं, पिचं(चिं)डः. **2** रुचि *f*, ex. by Like, q. v. **3** औद्धत्यं, दर्पः; *See* HAUGHTINESS. **-v. t.** वि-,सह् 1 A, मृष् 4 P, 10. **-IC,** *a.* अग्निदीपन-वर्धन (नी *f.*), उत्तेजक, अग्निद, दीपक, रुचक, पाचक. **2** जाठर (री *f.*). **-s.** दीपनं, रुचकं, अग्निवर्धनं.

STONE, *s.* शिला, पाषाणः, अश्मन् *m.*, प्रस्तरः, उपलः, ग्रावन् *m.*, दृषद् *f.*, शर्करा. **2** (Of fruits) अस्थि *n.*, अष्ठि *f.*, अष्ठीला. **3** (In the bladder) अश्मरी, मूत्रकृच्छ्रं. **4** Testicle, q. v.; 's.-blind' घनांध; 's.-cutter' औपलिकः, आश्मिकः, पाषाणदारकः; 's.-hearted' पाषाणहृदय, अश्महृदय, निर्दय, कठोर; 's.-horse' बीजाश्वः; 's.-pit,' 's.-quarry' प्रस्तरखनि *f.*-आकरः. **-a.** Stony, q. v. **-v. t.** लोष्टघातं-उपलैः-हन् 2 P or व्या-पद् c. **-Y,** *a.* उपलसंकुल-बहुल-आकीर्ण. **2** औपल (ली *f.*), शिला-प्रस्तरमय (यी *f.*), शार्कर (री *f.*), आश्मिक (की *f.*), सकैरिल, श(शा)कैरिक (की *f.*), (*s.*) in comp.; 's. seat' शिलासनं. **3** प्रस्तरनिभ-तुल्य-समान.

STOOL, *s.* पीठः-ठं, आसनं, पाद-चरण-पीठं. **2** उच्चारः, रेकः, मलोच्चारः, पुरीषोत्सर्गः; 'to pass s. s' उच्चर 1 P, पुरीषं उत्सृज् 6 P.

STOOP, *v. i.* नम्रं नम् c. or आवृज् 10, नम 1 P. अव-आ-प्र-°, प्रह्वीभू 1 P, नम्रीभू, प्रवणीभू. **2** Condescend, q. v. **-v. t.** आवृज्, नम् c., नम्रीकृ 8 U, प्रह्वीकृ. **-s.,-ING,** *s.* नति *f.*, नमनं, आ-अव-प्र-°. **-ING,** *a.* नत, प्रवण, प्रणतिप्रवण; अव-,नम्र, प्रह्व, नतांग; अवनतकाय, प्रणतशिरस्; 'a s. posture' नतिः, वैतसी वृत्तिः.

STOP, *v. t.* वि-,स्तंभ् 9 P or c., अव-स्था c. (स्थापयति), रुध् 7 U, नि-प्रति-अव-सं-°,प्रति-बंध् 9 P; नि-धा 3 U (ears &c.); 's.s the chariot' रथं स्थापयति. **2** निवृ c., बाध् 1 A, प्रति-वि-हन् 2 P, प्रति-नि-षिध् 1 P, विच्छिद् 7 P. **3** निवृत् c., विरम् c., विश्रम् c., प्र-उप-शम् c. **-v. i.** प्र-उप-शम् 4 P, विरम् 1 P, निवृत् 1 A; स्था 1 P, अव-स्था (A), निश्चल-स्थिर-स्तब्ध-रुद्ध-गति-*a.* भू 1 P; *See* CEASE, END. **2** विश्रम् 4 P (rest); 'the evil does not s. here' नैतावता पीडा निष्क्रामति (S. 2). **-s.,-PING,** *s.* स्तंभः, स्तंभनं, प्रतिष्टंभः, प्रतिबंधः, अव-नि-प्रति-रोधः, पिधानं; विष्टंभः, याननिवृत्ति *f.*, विरामः; 'put a s. to' *See* (*v.*), often by विरम् with abl. **2** अव-,स्थिति *f.*, विरामः, प्रशांति *f.*, विश्रांति *f.*, वि-,निवृत्तिः, विच्छेदः, भंगः, विरति *f.* **3** (In music) यति *f.*, अवसानं, विरामः. **4** विरामः,-चिह्नं,-बिंदुः, अवसानचिह्नं. **-PAGE,** *s.* प्रतिबंधः, प्रतिष्टंभः; *See* (*s.*); 's. of any organic function' अव-,रोधः, आ-,नाहः, बंधः. **-PER, -STOPPLE,** *s.* रोधः, अवष्टंभः.

STORAX, *s.* शिलाजं, शिलाकुसुमं-पुष्पं.

STORE, *v. t.* संभृ 1, 3 U, समाहृ 1 P, संचि 5 U, संग्रह् 9 P, संपूर् 10, पृ c. **-s.,-AGE,** *s.* संभारः, संचयः, राशिः, संग्रहः, समाहारः, सामग्री, निधिः, निधानं, कोशः-षः, संघातः. **2** Store-house, q. v.; 's.-house' कोषः, भांडारं; कोष्ठः; 's.-keeper' कोषाध्यक्षः-पालः; 's.-house of corn' कुशूलः, धान्यकोष्ठः.

STORK, *s.* सारसः, बकः, बलाकः, क्रौंचः.

STORM, *s.* वात्या, चंडवातः, प्रभंजनः, महा-अति-वातः, वात्यावेगः, प्रकंपनः, दुर्दिनं, झंझावातः (with showers). **2** संरंभः, संक्षोभः. **3** लंघनं, अवस्कंदः-दनं. **-v. t.** आ-अव-स्कंद् 1 P, लंघ् 1 A, 10, सहसा आपत् 1 P or ग्रह् 9 P or रुध् 7 U. **-v. i.** Rage, q. v. **-Y,** *a.* प्रचंडवात, वात्याकुल, वाताहत, पवनक्षुब्ध, अतिवातविशिष्ट; ex. by (*s.*); 'it is s. weather to-day' अद्य प्रभंजनः सर्वतो वाति, दुर्दिनमद्य; 's. sea' क्षुब्धार्णवः. **2** संरब्ध, संक्षुब्ध, संक्षोभित.

STORY, *s.* कथा, वृत्तांतः, आख्यानं, उपाख्यानं, उप-परि-कथा, आख्यायिका; 'historical s.' इतिहासः, चरित्रं-तं; 'remaining only in s.' कथीकृत, कथावशेषीकृत, कथाशेष. **2** वस्तु *n.*, कथानकं (of dramas &c.). **2** भूमि *f.*; सप्तभूमिकः प्रासादः; 'a palace having 7 s.es'; 'ground s.' तलं; 's.-teller' कथकः.

Stout, *a.* महा-स्थूल-काय, बृहच्छरीर, मांसल, स्थूलशरीर, प्रबल, महाबल, बलवत्. 2 धीर, विक्रांत, शूर, प्रगल्भ (heart). **-ness**, *s.* शरीरस्थूलता, मांसलता.

Stove, *s.* चुल्लि-ल्ली *f.*, अधिश्रयणी, अग्निकुंडं, अग्निमंतं, उद्धानं, अंतिका.

Stow, *v. t.* (कोशे) निविश् c., नि-धा 3 U, स्था c. (स्थापयति); *See* Store also.

Straddle, *v. i.* प्रगतजंघ-*a.* स्था 1 P.

Straggle, *v. i.* व्यभिचर् 1 P, विभ्रम् 1, 4 P, मार्गात् प्र-वि-चल् 1 P or च्यु 1 A or भ्रंश् 1 A, 4 P. **-er**, *s.* भ्रष्ट-भ्रांत-पथः, व्यभिचारिन् *m.*, नष्टपथः.

Straight, *a.* सरल, ऋजु, अभिक्ष, अकुटिल, अभुग्न, अवक्र, समरेख, अनराल, प्रगुण, अंजस; 'the s.-stemmed lotus' अनरालनालनलिनी. **-adv.**, 's.-way' सपदि, अनंतरमेव; सद्यः, तत्कालं, अविलंबितं. 2 सरलं, अवक्रं, ऋजु. **-en**, *v. t.* ऋजूकृ 8 U, सरलीकृ. **-ly**, *adv.* सरलं, अवक्रं, ऋजुतया, &c. **-ness**, *s.* सारल्यं, आर्जवं, अकौटिल्यं.—**Straightforward**, *a.* ऋजु, सरल, शुचि, ऋजु-सरल-प्रकृति; *See* Honest. **-ly**, *adv.* सरलं, अवक्रं, ऋजुतया; स्पष्टं, व्यक्तं. **-ness**, *s.* आर्जवं, सारल्यं, दाक्षिण्यं.

Strain, *v. t.* आयस् c., अत्यंतं आकृष् 1 P; 's. every nerve' सर्वात्मना प्रयत् 1 A. 2 अत्यंतं तन् 8 U, अतितानेन अभिहन् 2 P; *See* Sprain. 3 (Juice) निष्पीड् 10, निर्गल् c., निष्कृष्. 4 (Filter) शुध् c., पू 9 U, विमलीकृ 8 U, स्रु c.; 'should s. through a cloth' स्रावयेत् पटात्. 5 (To the bosom) *See* Clasp; 'this is not the time to s. courtesies' अत्युपचारपूर्वकं-यथाचारं-व्यवहर्तुं नायं समयः.—*v. i.* अत्यंतं प्रयत् or उद्यम् 1A or आयस् 1, 4 P or व्यव-सो 4 P. 2 निर्गल् 1 P, स्रु 1 P. —*s.* आयासः, अतियत्नः-श्रमः. 2 प्रवहणं, अत्यंताकर्षः; *See* Sprain. 3 तानः, संततस्वरः. 4 आ-,कर्षणं, वितति *f.* 5 रीति *f.*, प्रकारः. 6 विषयः. **-ed**, *a.* वितत, आ-,कृष्ट &c. 2 (Meaning) क्लिष्ट, नेयार्थ. **-er**, *s.* गालनी, चालनी, शोधनी.

Strait, *a.* संकट, संबाध, अनायत, संकुचित; *See* Narrow. **-s.** कृच्छ्रं, कष्टं, संकटं, दुर्दशा, कष्टावस्था, संकटावस्था; 'in s. s' कृच्छ्रगत, कष्टापन्न. 2 सामुद्रधुनी, संकटमार्गः. **-en**, *v. t.* पीड् 10, सं-,बाध् 1 A, संकुच् 1 P; 's.ed circumstances' (अर्थ-) कृच्छ्रं, कष्टं, दुर्गति *f.*

Strand, *s.* तीरं, तटं, कूलं. **-v. t.** उत्कूलयति (D.). **-v. i.** तीरं प्राप् 5 P.

Strange, *a.* अपूर्व, वि-,चित्र, अद्भुत, आश्चर्यभूत; 'what is s. in this' किमत्र चित्रं. 2 विदेशीय, परकीय; *See* Foreign. 3 अप-वि-रूप, विलक्षण, असंगत, असंबद्ध, अलौकिक (की *f.*), असंभव. 4 अपरिचित, असंस्तुत, अज्ञातपूर्व. **-interj.** चित्रं, अहो बत चित्रं, आश्चर्यं. **-er**, *s.* आगंतुकः, अभ्यागतः. 2 वैदेशिकः, विदेशीयः, वैदेश्यः. 3 परः, परपुरुषः, पारक्यः, अपरिचितः, अन्यजनः. 4 (*a.*) अपरिचित, अनभ्यस्त, अनभिज्ञ, अज्ञात; 'we are s. s to the use of chariots' वयं अनभ्यस्तरथचर्याः (U.5). **-ly**, *adv.* अद्भुतं, चित्रं. **-ness**, *s.* अपूर्वता, वैचित्र्यं, वैलक्षण्यं,&c.

Strangle, **Strangulate**, *v. t.* कंठं निपीड्य-श्वासं निरुध्य-मृ c. or व्यापद् c., गलहस्तयति (D.); श्वासं अव-नि-रुध् 7 U. **-ing,-ion**, *s.* गलपीडनं, गलहस्तः, श्वासावरोधः.

Strangury, *s.* अश्मरी, मूत्रकृच्छ्रं.

Strap, *s.* चर्मपट्टः-बंधः, वरत्रा, वर्धा, नर्धी. **-v. t.** चर्मपट्टेन ग्रह 1 P or तड् 10.

Stratagem, *s.* उपायः, कल्पना, युक्ति *f.*, अप-व्यपदेशः, छलं, कपटोपायः, छद्मन् *n.*

Strategy, *s.* युद्धकौशलं, समरपाटवं, व्यूहरचनाविद्या-नैपुण्यं.

Stratum, *s.* स्तरः, फलकः-कं, आ-सं-स्तरः.

Straw, *s.* पलः, पलालः-लं, नालः-लं, तृणं (fig. also), शुष्कधान्यं; 'to make s. of', 'not to care a s. for' तृणाय-तृणं-मन् 4 A; 'a man of s.' तृणमूर्ति *f.*; कल्पितपुरुषः.

Stray, *v. i.* (यूथात् &c.) भ्रंश् 1 A, 4 P, व्यभिचर् 1 P, (मार्गात्) प्र-,विचल् 1 P, प्र-,भ्रंश्. 2 प्रमद् 4 P, स्खल् 1 P; *See* Err, Mistake. **-ed**, *a.* प्र-,भ्रष्ट, च्युत, विचलित, भ्रांत, मार्गभ्रष्ट, नष्टपथ, यूथभ्रष्ट. 2 (Thoughts) निरन्वय.

Streak, *s.* रे(ले)खा, राजि *f.*; 's. of lightning' विद्युल्लेखा. **-v. t.** रेखाभिः अंकृ 10, चित्रीकृ 8 U; 's.ed with gold' कनकरेखाभिः सनाथीकृत, हेमरेखांकित. **-ed,-y**, *a.* रेखांकित-चिह्नित, चित्र, चित्रित, शबल.

Stream, *s.* स्रोतस् *n.*, सरित् *f.*, नदी. 2 स्रोतः, प्रवाहः, रयः, ओघः, प्रवृत्ति *f.*, वेला, वेगः, प्रस्रावः, धारा-रः; 's. of rain' पर्जन्यधारा. **-v. i.** वृष् 1 P, सततं प्रवह् 1 P or प्रस्रु 1 P. 2 Radiate, Extend, q. v. **-er**, *s.* पताका, केतुवसनं. **-ing**, *a.* संतत-निरंतर-प्रवाहिन्-स्राविन्. **-let**, *s.* क्षुद्र-क्षु-सरित्; अल्पस्रोतः.

Street, *s.* पथिन् *m.*, मार्गः; वीथि-थी *f.*, रथ्या, प्रतोली, विशिखा; 'royal s.' राजमार्गः-पथः, महापथः, संसरणं.

Strength, *s.* *See* under Strong.

Strenuous, *a.* सोत्साह, सोद्यम, सोद्योग, महोद्यम; अविरत, अविश्रांत, अभिनिविष्ट, संतत. **-ly**, *adv.* सोत्साहं, प्रयत्नैः, अविरतं. **-ness**, *s.* उत्साहः, उद्योगः, उद्यमः, उद्यमसातत्यं; *See* Energy, Industry.

Stress, *s.* भारः, भरः; गुरुत्वं, माहात्म्यं, गौरवं, प्रभावः, बलं; 'I lay s. on this point' इममर्थं गुरुप्रयोजनं-गुरु-मन्ये.

Stretch, *v. t.* विस्तृ-स्तृ c., प्र-वि-तन् 8 U, आयम् 1 P, दीर्घीकृ 8 U; (hand) प्रस् c., लंब् c. -*v. i.* प्र-वि-तन् pass., विस्तृ pass., प्र-सृ 1 P, प्र-,लंब् 1 A; *See* Extend also. 2 Exaggerate, q. v. -*s.* विततिः *f.*, विस्तारः, विस्तृतिः, आयामः, प्रसारः-रणं. 2 प्रयत्नः, प्रयासः, उद्यमः. 3 विषयः, प्रसरः. 4 वागुपचयः, अत्युक्तिः *f.* -er, *s.* शिबिका.

Strew, *v. t.* अव-प्र-वि-कृ 6 P, स्तृ 9 U, सं-आ-परि-°, आच्छद् 10.

Strict, *a.* अशिथिल, दृढ, नियत. 2 अनतिक्रमणीय, अनुल्लंघ्य; *See* Peremptory. 3 परुष, निष्ठुर, कठिन, कठोर, तीक्ष्ण, तीव्र. 4 सूक्ष्म, निपुण; 'on the s.-est search' अतिनिपुणमन्विष्यापि. -ly, *adv.* अशिथिलं, परुषं, सनिश्चयं, परिच्छेदनिष्ठुरं, दृढं; 's. true' सर्वथा सत्य. -ness, *s.* अशैथिल्यं, सूक्ष्मता, काठिन्यं, &c.

Stricture, *s.* निंदा, भर्त्सना, आक्षेपः; *See* Censure. 2 मूत्रावरोधः, मूत्रग्रंथिः.

Stride, *s.* विक्रमः, पादन्यासः, दीर्घविक्रमः. -*v.* वि-परि-क्रम् 1 U, 4 P, लंघ् 1 A, 10, आ-अध्या-रुह् 1 P, आ-अध्या-क्रम्.

Strife, *s.* कलिः, विवादः, कलहः, विप्रतिपत्ति *f.*, विरोधः, द्वंद्वं.

Strike, *v. t.* हन् 2 P, प्र-अभि-उप-°, आहन् 2 U, तुद् 6 P, प्रह 1 P (with loc.), तड् 10; आस्फल् c. (water); 's. on the face' मुखे चपेटां दा 3 U, हस्ततलेन प्रह. 2 विभु c, पीड् 10, अर्द् 1 P or c.; 'famine-s.en' दुर्भिक्ष-पीडित-विभुत. 3 (With wonder &c.) उपहन्, चकित-*a.* कृ; oft. by चकित-सविस्मय; 'was struck with the beauty of his horns' शृंगशोभां दृष्ट्वा विस्मयमापेदे. 4 वद् c., नद् c., ध्वन् c. (lute &c.). 5 जन् c., उत्पद् c.; 's. s fear in the mind' चित्ते भयं जनयति; 's. ing deep root' स्थिरबद्ध-परूढ-मूल; 's. sail' वातवस्त्रं अवपत् c. or अवतृ c, निश्चलीस्तब्धी-भू; 's. blind' अंधीकृ; 's. accounts' गणनां समीकृ; 'it struck me as wonderful' तदद्भुतमिव मां प्रतिबभौ; 'he was struck with wonder' तस्य हृदयं पस्पर्श विस्मयः (Ka. 80), आश्चर्यचकितो बभूव; 'being used in its most general sense, it easily s. s the mind' तद्धि प्रसिद्धतरेण प्रयोगेण शीघ्रं बुद्धिमारोहति, प्रसिद्धिबलेन प्रथमतरं प्रतीयते (S. B. 135, 137). -*v. i.* (Against) संघट्ट 1 A or c., आस्फल् 1 P; *See* Dash. 2 संभूय कर्म परित्यज् 1 P; कार्यनिवृत्तिसंकेतं कृ. -down, नि-अव-पत् c., शद् c. (शातयति), आहत्य भूमौ पत् c. -for, प्र-स्था 1 A, प्र-या 2 P, निर्गम् 1 P; *See* Start. -off, वि-,नश् c., वि-,लुप् c.; अप-व्या-मृज् 2 P or c., उच्छिद् 7 P. -out, (Fire) घर्षणेन-संघट्टनेन जन् c. 2 लुप् 6 P or c., नश् c., उच्छिद्, व्यामृज्; *See* Efface. 3 मृष् c., चित् 10, युज् 7 U, 10, निरूप् 10. 4 मुद्रयति (D.). -through, निर्भिद् 7 P, प्रविश् 6 P, प्रविश्य निर्गम्. -up, आरभ् 1 A, प्रस्तु 2 U; *See* Begin. -*s.* युगपत् or संभूय कार्यनिवृत्तिसंकेतः. -ing, *a.* वि-,चित्र, आश्चर्यजनन (नी *f.*), अद्भुत, विस्मयावह, आश्चर्यभूत, हृदयग्राहिन्, चित्तहारिन्. -ingly, *adv.* मनोहरं, विचित्रतया, अद्भुतं, अतीव, हृदयग्राहितया. -Stroke, *s.* आ-अभि-घातः, आहति *f.*, प्रहारः, ताडनं, पातः; 's. of a thunder-bolt' वज्रपातः, अशनिपातः. 2 रेखा, लेखा. 3 आक्रमः, अवतारः, आवेशः, लंघनं; 'sun-s.' आतपलंघनं, सूर्याभिघातः. 4 प्रयत्नः, आकस्मिकयत्नः; 's. of policy' नीत्युत्कर्षः, नयनिपुणता. -*v. t.* (पाणिना-हस्तेन) परामृश् 6 P, स्पृश् 6 P; (परामृशन् हर्षजडेन पाणिना R. III. 68); शनैः मृज् 2 P or समालभ् 1 A, हस्तेन लल् 10.

String, *s.* रज्जु *f.*, गुणः, तंत्रं-त्री (of lutes &c.), तंतुः, सूत्रं, दामन् *f. n.*, शुल्बं; *See* Rope; (of a bow) ज्या, गुणः, मौर्वी, झिंजिनी. 2 परंपरा, माला, पंक्ति *f.*, श्रेणि-णी *f.*, आवलि-ली *f.*; 's. of pearls' मुक्तावली, मुक्ताहारः-सरः. 3 (Human) शिरा. -*v. t.* सं-ग्रंथ् 9 P, गु(गु)फ 6 P, वि-,रच् 10, सं-,रभ् 6 P, 10, सूत्र् 10. 2 तंत्रीभिः-गुणैः-बंध् 9 P; (a bow) अधिज्यं कृ; धनुषि ज्यां आरुह् c. or आतन् 8 U; 'a bow strung' अधिज्य-आततज्य-आरोपितज्यं-धनुः; 'a string strung tight on a bow' धनुषि आतता मौर्वी (R. I. 19). -ed, *a.* तंत्रिन्, तंत्री-गुण-विशिष्ट, तंतुयुक्त. -y, *a.* सूत्रिन्, सूत्र-तंतु-मय (त्री *f.*).

Stringent, *a.* तीक्ष्ण, कठोर, दृढ, अशिथिल.

Strip, *v. t.* अप-,हृ 1 P, अप-नी 1 P निर्-हृ; gen. by अप, निर्, वि in comp.; 's. of clothes' विवस्त्रयति (D.), निर्वस्त्रीकृ 8 U, उच्छद् 10; 's. of bark' विवल्कयति (D.); निष्पत्रयति, निर्दलीकृ, &c. -*s.* खंडः-डं, पट्टः. -ped, *a.* अप-,हृत, अपनीत. 2 विवस्त्र, विवस्त्रीकृत, नग्नीकृत; हृतवस्त्र-वेश; 's. of one's all' हृतसर्वस्व.

Stripe, *s.* रे(ले)खा. 2 दीर्घखंडः. 3 कशाघातः-प्रहारः. -*v. t.* रेखाभिः चित्रयति (D.) or अंक् 10. 2 कशया तड् 10 or प्रह 1 P.

Stripling, *s.* शिशुः, अर्भकः, डिंभः, बालः, किशोरः.

Strive, *v. i.* प्र-,यत् 1 A, घट् 1 A, उद्यम् 1 A, चेष्ट् 1 A, व्यव-सो 4 P, प्रवृत् 1 A. 2 स्पर्ध् 1 A. 3 (Against) विवद् 1 A, विरुध् 7 U, कलहं कृ 8 U; *See* Contend.

Stroke, *s.* *See* under Strike.

Stroll, *v. i.* (आलस्येन) विचर् 1 P, परिक्रम् 1 U, 4 P, विह् 1 P, परिभ्रम् 1, 4 P. -*s.* परिक्रमः-मणं,

विहारः, परि-,भ्रमणं, यथेष्टचारः. -ER, *s.* पथिकः, यथेष्टविहारिन् *m.*

STRONG, *a.* बलिन्, बलवत्, सबल, वीर्यवत्, शक्तिमत्, समर्थ, ऊर्जस्वल, ओजस्विन्, प्रबल, ऊर्जित; 's.-minded' मनस्विन्, धीरप्रकृति. 2 क्षम, दक्ष, कुशल. 3 दृढ, स्थिर (resolution); उग्र (smell). 4 तीव्र, तीक्ष्ण, चंड, प्रखर, अति pr. 5 गाढ, उत्कट, प्रबल; *See* INTENSE. 6 वीर्यवत्, प्रतापवत्, गुणावह, गुणकारिन् (medicine); 'to grow s.' प्रबलीभू, मूर्च्छ् 1 P; '10000 s.' अयुतसंख्याक; 's.-bodied,' 's.-built' उपचितगात्र, मांसल, दृढांग, दृढावयव; 's.-hold' दुर्ग, कोटः. -LY, *adv.* बलवत्, दृढं, गाढं, परमं, उग्रं, उत्कटं, &c. -STRENGTH, *s.* बलं, वीर्यं, शक्ति *f.*, सामर्थ्यं, तेजस् *n.*, प्रभावः, ओजस् *n.*, ऊर्जः, सत्त्वं; वि-परा-क्रमः; क्षमता, बलवत्ता, प्राबल्यं, विभवः; 'the s. of mind' धीशक्तिः, बुद्धिप्रभावः, मतिविभवः; 'what is the s. of the enemy' कियत्संख्यकाः शत्रवः; 'on the s. of' अवलंब्य. -EN, *v. t.* प्रबलीकृ 8 U, बलं दा 3 U or वृध् c. 2 दृढीकृ, द्रढयति (D.); *See* CONFIRM, ESTABLISH; निवेशः शैलानां तदिदमिति बुद्धिं द्रढयति (U. 2) 's. s the belief that it is the same'; '*Sringâra* s. ed by Karu*na*' करुणानुप्राणितः शृंगाररसः -*v. i.* प्रबलीभू 1 P, प्र-उप-चि- pass.; वि-प्र-वृध् 1 A; प्ररुह् 1 P. -ING, *a.* बलवर्धन (नी *f.*), बलप्रद.

STRUCTURE, *s.* निर्माणं, संस्थानं, विधानं, रचनं-ना. 2 आकारः, रूपं. 3 मंदिरं, भवनं.

STRUGGLE, *v. i.* प्रयत् 1 A, प्रयासं-यत्नं-कृ, चेष्ट् 1 A; शार्दूलः पशुमिव हन्मि चेष्टमानं (S. 6) 'an animal s.-ing, while being killed' &c. 2 युध् 4 A, संयत्; *See* FIGHT. -ING, *s.* प्रयासः, प्रयत्नः, वि-चेष्टा-चेष्टितं, अतियत्नः; मुक्तप्रयत्नं मां सलिलबिंदुमपाययत् (Ka. 38) 'me who had ceased s.' &c. 2 युद्धं, कलहः, विवादः, द्वंद्वं.

STRUMPET, *s.* *See* PROSTITUTE.

STRUT, *v. i.* साटोपं-उद्धतं-धीरोद्धतं-परिक्रम् 1 U, 4 P, सगर्वं चल् 1 P. -*s.* साटोप-उद्धत-सगर्व-गति *f.* -TING, *a.* सगर्वगति, साटोपगामिन्.

STUBBLE, *s.* नालः-ली, लूनशस्यनालः.

STUBBORN, *a.* दुर्दांत, दुर्दम, प्रतिनिविष्ट, अवश्य, अविनेय, प्रतीप; *See* OBSTINATE.

STUCCO, *s.* सुधा, चूर्णलेपः. -*v. t.* सुधया लिप् 6 P. -ED, *a.* सुधालिप्त.

STUD, *s.* गंडः; (of horses) अश्वाः, अश्वं, अश्वीयं, वाडवं; (place) अश्वशाला, मंदुरा. -*v. t.* उत्-,खच् 10 (खचयति), प्रतिमंथ् 9 P, प्रतिवप् 1 P, अनुव्यध् 4 P; 'sky s. ed with stars' तारकितं नभः; 's. ed with gems' रत्नखचित, रत्नानुविद्ध-प्रत्युप्त &c.

STUDY, *v. t.* अधि-इ 2 A, अधिगम् 1 P, (acquire by s.); शिक्ष् 1 A; पठ् 1 P; आवृत् c., अभ्यस् 4 U. 2 ध्यै 1 P, चिंत् 10, क्लृप् 10; प्रयत् 1 A, विमृश् 6 P. -*s.* अध्ययनं, अभ्यासः, अभ्यसनं, शिक्षणं, पठनं, पाठः, अधिगमः-मनं; 's. of the Vedas' वेदाध्ययनं, उपाकरणं; 'close s.' अविरताभ्यासः, अनुपरि-शीलनं; 'desultory s.' चंक्रमणं. 2 अध्ययनशाला-आगारं, ग्रंथकुटी. 3 पाठः, अध्ययनविषयः. 4 चिंतनं, कल्पना, विचारः. -ENT, *s.* अध्येतृ *m.*, छात्रः, शिष्यः, आधीयानः, विद्यार्थी; 'a religious s.' ब्रह्मचारी, व्रती, लिंगी. -IED, *a.* पूर्वपठित, सुनिश्चित, पूर्वनिर्णीत, चिंतित-निर्णीत-पूर्व, कामतः कृत. -IOUS, *a.* अध्ययनपरायण-तत्पर-शील-आसक्त, विद्याप्रसित-अभिनिविष्ट. 2 उत्सुक, व्यवसायपर, अध्यवसायिन्; 'of s. habits' व्यवसायशील. -IOUSLY, *adv.* विद्याव्यासंगेन; संकल्प-निर्णय-पूर्वं, कामतः. -IOUSNESS, *s.* अध्ययन-विद्या-आसक्ति *f*-अभिनिवेशः, विद्याव्यासंगः.

STUFF, *s.* वस्तु *n.*, द्रव्यं, प्रकृति *f.*, पदार्थः. 2 पटः, वस्त्रं, वसनं; *See* CLOTH. 3 गृहोपस्करः, गृहसामग्री-द्रव्याणि-भांडानि. 4 तुच्छ-कुत्सित-द्रव्यं. 5 अनर्थकप्रलापः. -*v. t.* अत्यंतं पूर् 10, अतिशयेन तृप् c. 2 Crowd, Cram, q. v.; 's. -ed with cotton' कार्पासपूरित. -*v. i.* आतृप्ति पू pass. -ING, *s.* पूरणं &c.

STULTIFY, *v. t.* मूढीकृ 8 U, मूर्खवत् आचर् c.; (oneself) मूर्खवत् आचर् 1 P.

STUMBLE, *v. i.* प्र-,स्खल् 1 P, विषमीभू, (मार्गे पदानि खलु ते विषमीभवंति S. 4); प्र-वि-चल् 1 P, च्यु 1 A. -*v. t.* प्र-,स्खल् c. (स्खलयति). -*s.*,-ING, *s.* स्खलनं, स्खलितं; 's. ing-block' गतिकुंठनस्थानं; 'this is a s. ing-block to all' अत्र सर्वे स्खलंति; अत्र सर्वेषां गतिः कुंठिता भवति.

STUMP, *s.* कंदः-दं, स्थाणुः. -Y, *a.* ह्रस्वस्थूल.

STUN, *v. t.* बधिरीकृ 8 U, (आक्रोशेन दिशो बधिरीकृताः); (persons) आघातेन-प्रहारेण-जडीकृ 8 U, मूर्च्छां प्राप् c. or जन् c.; 's. the ears' कर्णविवरं-कर्णपुटं जर्जरीकृ or जर्जरयति (D.) or स्फुट् c. or उपहन् 2 P, जर्जरितकर्णविवरः (Ka. 27), जर्जरीकृतकर्णपुटः 'the ears being s.ed' &c.; 'he was s.ed by the noise' निनादश्रवणेनामूर्च्छत्. -NED, *a.* आघात-प्रहार-मूढ-जड-मोहित, जर्जरितकर्ण, बधिरीकृत. -NING, *a.* कर्णोपघातिन्, श्रवणशक्तिहारिन्.

STUNT, *v. t.* (वृद्धिं) स्तंभ् 9 P or c., रुध् 7 U, वामनी-खर्वी-कृ 8 U. -*s.* वृद्धिरोधः-स्तंभः. -ED, *a.* शृभि, अल्पतनु, वामनाकृति, रुद्धवृद्धि.

STUPEFY, *v. t.* जडीकृ 8 U, जडयति (D.), मुह् c., सं-व्या-°, निष्पंदीकृ, सं-,स्तंभ् c. -ACTION, STUPOR, *s.* जाड्यं, जडिमन् *m.*, जडता-त्वं, मोहः, सं-व्या-°, इंद्रियस्वापः-मोहः-स्तंभः. -ING, *a.* व्या-, मोहिन्, मोहकारिन्, स्तंभक. —STUPID, *a.* जड, मूढ,

मूर्ख, मंद, मूढ-स्थूल-जड-मंद-धी-मति-बुद्धि, निर्बुद्धि, दुर्बुद्धि, अविज्ञ, अज्ञ; 'a s. mistake' अतिगर्हणीयः प्रमादः. -ITY,-NESS, s. जाड्यं, मौर्ख्यं, मूढता, जड्डिमन् m., अज्ञानं &c. -LY, adv. जाड्यन, मूर्खतया, मूढवत्.

STUPENDOUS, a. अतिविशाल, अद्भुत, आश्चर्य विस्मयकर (री f.), विस्मयोत्पादक.

STURDY, a. कठिन, कठोर; दृढांग, प्रबल; See STOUT.

STUTTER, v. i. See STAMMER.

STY, s. शूकरशाला.

STYLE, s. रीति f., प्रकारः, पद्धति f., वृत्ति f, सरणि f. 2 भाषासरणिः, लेखनपद्धतिः; (of speaking) वाग्वृत्तिः-व्यापारः-सरणिः. 3 संज्ञा. आख्या, ख्याति f. 4 लेखनी, कलमः. 5 शलाका, कीलः; शंकुः (of a dial). -v. t. अभि-धा 3 U, वच् 2 P, संज्ञां दा 3 U, कृत् 10; See NAME, CALL; 's. ed Kakutstha' ककुत्स्थ इत्याहितलक्षण (R. VI. 71), ककुत्स्थसंज्ञ &c. -ISH, a. शिष्टजनमत, सभ्याचारानुरूप.

STYPTIC, a. रक्तस्तंभन, रक्तस्रावरोधिन्. -s. रक्तस्तंभनं-अवरोधः.

STYX, s. वैतरणी, प्रेतनदी.

SUAVITY, s. माधुर्यं, मनोज्ञता, स्वादुता.

SUBACID, a. ईषदम्ल.

SUBDIVIDE, v. t. प्रति-भज् 1 U, अंशांशान् कृ 8 U. -SUBDIVISION, s. प्रभागः, प्रविभागः, उपशाखा, प्रति-प्र-शाखा, उपांगं, अवयवः.

SUBDUE, v. t. वशं नी 1 P, वशीकृ 8 U, वि-परा-जि 1 A, अभि-परा-भू 1 P, दम् c. (दमयति), स्वायत्तीकृ, स्ववशे स्था c. (स्थापयति). 2 (Passions) जि, सं-नि-यम् 1 P, निग्रह् 9 P, दम् c., वशं नी; See CONTROL. -ER, s. जेतृ m., दमनकारिन्. 2 वशिन् m. -ING, s. वि-,जयः, दमः-मन, अभिभवः, नि-संयमः, निग्रहः, &c.

SUBJACENT, a. अधोवर्तिन्.

SUBJECT, s. प्रजा, प्रकृति f. (usually in pl.). 2 विषयः (विषयिन् m., as opp. to object); प्रकरणं, प्रस्तावः, प्रसंगः, अर्थः, पदं, स्थानं, आस्पदं, भूमि f., अधिष्ठानं, आधारः, आश्रयः, आशयः, भाजनं. 3 नायकः, कथापुरुषः-नायकः. 4 कर्ता (in grammar). 5 साध्यं; 's. in hand' प्रकृतं, प्रस्तुतं, प्रस्ततार्थः; 'this chapter is on the s. of Sankhya doctrines' सांख्यवादविषयकोऽयमध्यायः. -a. वशवर्तिन्, वशग, उपजीविन्, आश्रित; निग्र, वश, अधीन, आयत्त, तंत्र in comp. 2 (Liable) अधीन, आयत्त, &c., अर्ह, पात्रं. आस्पदं in comp.; See LIABLE; 'one that is born is s. to death' जातेन खलु मर्तव्यं, जातस्य हि ध्रुवो मृत्युः; 'not s. to anger' अनायत्तो रोषस्य (Ka 45); so अवशो विषयाणां, अदत्तावकाशो मत्सरस्य (ibid.); 's. to disease' रोगाधीन, नित्य-सदा-रोगिन्, रोगपात्रं, &c. -v. t. वशीकृ 8 U, अभिभू 1 P; See SUBDUE. 2 पदे नी 1 P, अधीनी-आयत्ती-आस्पदीकृ; 'you have s.-ed yourself to trouble' क्लेशस्यात्मा पदमुपनीतः (S. 1); 'you have s. ed yourself (soul) to great penance' आयोजितस्तपसि महत्यात्मा (Ka. 173); अयत्नेनैवोपहासास्पदतामीश्वरो नयति जनं (Ka. 151) 'easily s.s to ridicule' &c.; उपहासास्पदं कृ, &c. -ION, s. वशः-शं, वशता, निग्रता, तंत्रता, आश्रितत्वं, अधीनता, &c. in comp; 's. to another' परवशता, पराधीनता, परवत्ता, &c. -IVE, a. विषयिन्, अधिकरणनिष्ठ.

SUBJOIN, v. t. अनुबंध् 9 P, आयुज् 7 U, 10; अधः लिख् 6 P or निर्दिश् 6 P.

SUBJUGATE, v. t. वशीकृ 8 U, अभिभू 1 P, परा-वि-जि 1 A, भंज् 7 P, करदीकृ; See SUBDUE. -ION, s. दमः-मनं, जयः, परा-अभि-भवः, भंगः, नियमः, निग्रहः; See CONTROL also.

SUBLIMATE, s. रसकर्पूरः-पुष्पं. -v. t. बाष्पीकृ 8 U.

SUBLIME, a. उन्नत, अत्युच्छ्रित, उत्कृष्ट, विशिष्ट, गुरु; See LOFTY; उदात्त, प्रौढ (sentiment &c.). -v. t. Exalt, q. v. -ITY,-NESS, s. तुंगता, उन्नति f., अनुभावः, प्रौढि f., अत्युत्कर्षः, गौरवं; 's. of meaning' अर्थगौरवं, उदात्तार्थः.

SUBLUNARY, a. ऐहिक-सांसारिक (की f.); See WORLDLY.

SUBMARINE, a. समुद्ररथ-गत; 's. fire' और्वः, वडवानलः, वाडवः.

SUBMERGE, v. t. नि-,मस्ज् c. (मज्जयति), आप्लु c -v. i. नि-,मस्ज् 6 P, अवगाह् 6 A; See PLUNGE. -SUBMERSION, s. निमज्जनं, आप्लावः, प्लावनं.

SUBMIT, v. i. प्रणम् 1 P, वशं गम् 1 P, शरणं गम् or या 2 P or प्रपद् 4 A; (to order &c.) अनुरुध् 4A, अनुवृत् 1 A, अनुया c. (पालयति); See OBEY; सह् 1 A, क्षम् 1 A, मृष् 4 P, 10; oft. ex. by प्रमाणं; आर्यमिश्राः प्रमाणं (M. 1) 'I s. to your honor's opinion (decision)'. 2 सविनयं वद् 1 P or प्रार्थ् 10 A. -v. t. सविनयं कृ c. (अर्पयति) or निक्षिप् 6 P or निर्दिश् 6 P; See REFER. -SUBMISSION, s. प्रणति f., वशता-त्वं. 2 अनुवृत्ति f., अनुवर्तनं, अनुरोधः. 3 क्षमा, क्षांति f., सहिष्णुता. -SUBMISSIVE, a. वश्य, प्रणतिप्रणव, वशग, वशवर्तिन्, विधेय, अनुविधायिन्, आज्ञाकर (री f.). 2 सविनय, नम्र, दीन. -LY, adv. सविनयं, नम्रतया, प्रार्थनापूर्वं, प्रणतिपूर्वं.

SUBORDINATE, a. अधीन, आयत्त. 2 अप्रधान, गौण (णी f.), अमुख्य; 'any thing s. to another' अप्रधानं, उपसर्जनं. -v. t. (to) अन्यापेक्षया गौण-अप्रधान- a. मन् 4 A. -ION, s. अधीनता, वशता, वश्यता, परवशता, पारतंत्र्यं, पराधीनता. 2 अप्राधान्यं,

गौणता. -LY, *adv.* गौणतः, अप्राधान्येन, अमुख्यतः.

SUBORN, *v. t.* (धनदानादिना) कूटसाक्ष्यं दा c. (दापयति).

SUBPŒNA, *s.* आह्वानपत्रं. -*v. t.* आह्वे 1 P.

SUBSCRIBE, *v.* (अधः) नाम लिख 6 P or निविश् c., हस्ताक्षरेण अंक् 10 or चिह्नयति (D.); *See* SIGN. 2 Agree, q. v. 3 (द्रव्यं) दातुं प्रतिज्ञा 9 A, अंशं दा desid. (दित्सति-ते). -ER, *s.* अंशदायिन् *m.* -SUBSCRIPTION, *s.* नामलिखनं-निवेशनं. 2 अंश-उद्धार-दानं; स्वांशः, उद्धारः. 3 (Of a paper) मूल्यं.

SUBSEQUENT, *a.* उत्तरगामिन्, उत्तर, पश्चात् in comp.; पर, पश्चात्कालीन; अनु pr.; 's. rites' अनुकर्माणि; अनुगमनं, &c.; 's. mention' वक्ष्यमाणता. -LY, *adv.* तत ऊर्ध्वं; अनंतरं, तत उत्तरं; पश्चात्; (to) परं; ऊर्ध्वं, अनंतरं, परतः (with abl.); अनु pr.; 's. to the marriage' अनुविवाहं, विवाहात्परं, &c. -SUBSEQUENCE, *s.* अनुगमनं-यानं.

SUBSERVE, *v. i.* पुरस्कृ 8 U, वृध् c., उपकृ; *See* PROMOTE. -SUBSERVIENT, *a.* आयत्त, अधीन, वश, निग्र, तंत्र in comp. 2 उपयुक्त, उपकारिन्, सहयोगिन्. -SUBSERVIENCE,-CY, तंत्रता, अधीनत्वं. 2 उपयोगः, उपकारः.

SUBSIDE, *v. i.* शम् 4 P, प्र-उप-°, निवृत् 1 A, वि-रम् 1 P, वि-गम् 1 P; प्रसद् 1 P. 2 अधस्तले आसद्, अधः गम् or पत् 1 P.

VOID, a. शून्य, रिक्त. 2 असिद्ध, अप्रमाण, आकिंचित्कर (री f.), निरर्थक. 3 Destitute, Devoid of, q. v. -s. शून्यं, शून्यस्थानं. -v. t. रिच् 7 P or c., शून्यीकृ 8 U. 2 निष्फलीकृ. 3 (Excrement) उच्चार c., वि-उत्-सृज्, उद्-गृ 6 P. -ABLE, a. विवर्जनीय, परित्यक्तव्य.

VOLATILE, a. वायुपरिणामशील. 2 चंचल, लोल; *See* FICKLE. -ITY, s. चापल्यं, चांचल्यं.

VOLCANO, s. ज्वालामुखः, आग्नेयगिरिः.

VOLITION, s. संकल्पः, इच्छा; *See* WILL.

VOLLEY, s. वर्षः, (शिलावर्षः, शरवर्षः &c.), वृष्टि f.,-पातः.

VOLUBLE, a. चंचल, चपल. 2 (Of tongue) वाचाल, चपलजिह्व. -VOLUBILITY, s. वाक्चापल्यं.

VOLUME, s. खंडः-डं, भागः, पुस्तकं (when the sense is clear). 2 अंतर्गतं घनफलं. 3 आवलि-ली f., पटलं, राशिः, संहति f. -VOLUMINOUS, a. विस्तीर्ण, बहुपुस्तक.

VOLUNTARY, a. ऐच्छिक-यादृच्छिक (की f.), इच्छामति-पूर्व; better ex. by 'v.-ily'. -ILY, adv. यदृच्छया, इच्छापूर्वकं, स्वेच्छातः, प्र-नि-कामं, आत्मसंतोषेण. -VOLUNTEER, v. t. अयाचितं उपानी 1 P or कृ c. (अर्पयति) or दा 3 U or कृ 8 U. -s. यादृच्छिकः युयुत्सुः, स्वेच्छासैनिकः.

VOLUPTUARY, VOLUPTUOUS, s., a. विषयासक्त, भोगनिरत, इंद्रियसुखासक्त, विषयिन्; *See* SENSUAL.

VOMIT, v. उद्-,वम् 1 P, उद्-गृ 6 P, छर्द् 10, उत्क्षिप् 6 P. -s. वांतं. 2 वमनं (emetic). -ING, s. वमनं, वमः-मि f., वमथुः, प्रच्छर्दिका. -IVE, a. वमन (नी f.), वांतिकर (री f.), वांतिकृत्.

VORACIOUS, a. घस्मर, गृध्नु, अतिलोलुप, औदरिक (की f.); *See* GLUTTONOUS.

VORTEX, s. भ्रमि f., आवर्तः.

VOTARY, s. भक्तः, उपासकः, पूजकः; आश्रितः.

VOTE, s. संमति f., संमतं. -v. t. संमतिं-अनुमोदनं-दा 3 U, मतं प्रकाश् c.; संमतिपूर्वं वृ 5 U or नियुज् 7 A, 10 or दा.

VOUCH, v. t. साक्षीकृ 8 U, प्रमाणीकृ, प्रमाणं दा 3 U. 2 दृढीकृ, द्रढयति (D.). -ER, s. प्रमाणपत्रं-लेखः, साधनपत्रं-लेखः, आगमः.

VOUCHSAFE, v. t. वि-तृ 1 P, कृपया दा 3 U; (with inf.) प्र-सद् 1 P; *See* CONDESCEND, PLEASE; भगवान् मारीचस्ते दर्शनं वितरति (S. 7) 'v. s thee an audience' 2 अनु-ज्ञा 9 U.

VOW, s. व्रतं, संकल्पः, प्रतिज्ञा, शपथः, नियमः; 'under a v.' व्रतबद्ध, धृतव्रत, संकल्पबद्ध. -v. प्रतिज्ञा 9 A, प्रतिज्ञां कृ 8 U or आरुह् 1 P, सशपथं-सप्रतिज्ञां वद् 1 P or अभि-धा 3 U, ('Say', q. v.); 'he has v. ed to destroy us' अस्मद्विनाशे कृतसंकल्पोऽसौ.

VOWEL, s. स्वरः, अच् m., अजक्षरं.

VOYAGE, s. जलयात्रा-यानं, समुद्रयानं, संयात्रा. -v.

Ex. by कृ with (*s.*), पोतेन गम् 1 P, जलवर्त्मना गम्. -ER, *s.* सांयात्रिकः, जलयात्रिकः.

VULGAR, *a.* ग्राम्य, असभ्य, अश्लील, अशिष्ट; प्राकृत, लौकिक (की *f.*). -ISM, *s.* ग्राम्या रीतिः. 2 ग्राम्य-शब्दप्रयोगः. -ITY, *s.* असभ्यता, अश्लीलता. -LY, *adv.* साधारणतः, लौकिकरीत्या. 2 असभ्यरीत्या, ग्राम्यतया. -IZE, *v. t.* ग्राम्यीकृ.

VULNERABLE, *a.* भेद्य, धृष्य; वेध्य; 'v. point' रंध्रं, छिद्रं, मर्मन् *n.*; आवृणोदात्मनो रंध्रं रंध्रेषु प्रहरन् रिपून् (R. XVIII. 61) 'guarded against his own v. points' &c.

VULPINE, *a.* धूर्त, शृगालवत्.

VULTURE, *s.* गृध्रः, दाक्षाय्यः.

W.

WAD, *s.* चूर्णरोधनी.

WADDLE, *v. i.* हंसवत् गम् 1 P or चर् 1 P.

WADE, *v. i.* तॄ 1 P, कष्टेन गम् 1 P, कृच्छ्रेण पारं गम्.

WAFT, *v. t.* वह् 1 P or c., उत्क्षु 6 P; कणवाही मालिनीतरंगाणां (S. 3); पुष्परेणूत्किरैर्वातैः (R. I. 38); (boat &c.) वह् c., प्रणुद् c., प्रचुद् 10, प्रेर् c.; *See* DRIVE. -*v. i.* भ्रु 1 A, वायुना वह्-नी pass.

WAG, *v. t.* सं-,चल् c., वि-,धू 5, 9 U, वि-क्षिप् 6 P; 'w. ging the tail' लांगूलचालनं-विक्षेपः-विधूति *f.* -*v. i.* चल् 1 P, धू pass. -*s.* परिहासवादिन् *m.* -GISH, *a. See* WITTY.-WAG-TAIL, *s.* खंजनः.

WAGE, *v. t.* (War) विग्रह् 9 P, युद्धं आरभ् 1 A.

WAGER, *s.* ग्लहः, पणः. -*v.* ग्लह्-पण् 1 A, (with gen. of thing staked).

WAGES, *s.* वेतनं, भृति *f.*, मूल्यं, निर्वेशः, पणः; *See* HIRE.

WAGON, *s.* प्रवहणं, यानं, शकटः-टं, चातुरं. -ER, *s.* शाकटिकः, शकटवाहः, चातुरिकः.

WAIF, *s.* अज्ञातस्वामिकं द्रव्यं.

WAIL,-ING, *See* LAMENT,-ATION.

WAIN, *s.* गोवहनं, शकटः-टं.

WAINSCOT, *s.* भित्तिपटलं.

WAIST, *s.* मध्यः-ध्यं, मध्यमः-मं, कटि-टी *f.*, कटिदेशः; 'w.-coat' कटिवस्त्रं.

WAIT, *v. i.* स्था 1 P; (for) प्रति-इक्ष् 1 A, अनु-प्रतिपा c. (पालयति) (of time and persons); 'w. for some time' कालः कश्चित्प्रतीक्ष्यतां (K. II. 54); मां प्रतिपालय &c.; सह् 1 A, स्था, (of time only) (द्वित्राण्यहान्यर्हसि सोढुमर्हन् R. v. 25); स्फुलिंगावस्थया वह्निरेधापेक्ष इव स्थितः (S. 7) 'here is fire in the state of a spark (only) w. ing for fuel (to blaze up)'; (on or upon) उप-स्था 1 A, उप-अनु-आस् 2A, उप-सेव् 1A, उप-चर् 1 P; 'w. at table' परिविष् c. -ER, *s.* सेवकः, परिविवकः, परिवेष्टृ *m.* (at table).

WAIVE, *v. t.* परि-,त्यज् 1 P; *See* ABANDON.

WAKE, *v. t.* प्र-बुध् c., जागृ c. -*v. i.* प्र-वि-बुध् 4 A, जागृ 2 P. -*s.* जागरणं, जागरः, प्र-बोधः-धनं. 2 पदवी; 'follow in the w. of' पदवीं प्रतिपद् 4 A; *See* TREAD. -FUL, *a.* (lit.) रात्रिजागर, निद्राविमुख, विनिद्र, उन्निद्र; जागरूक, दक्ष, अवहित, सावधान. -FULNESS, *s.* जागरः-रणं, अस्वापः, अस्वप्नः, अनिद्रा, प्रबोधः, जाग्रदवस्था. 2 दक्षता, अवधानं, &c.

WALK, *v. i.* (पद्भ्यां) चर्-चल्- गम् 1 P, परि-,क्रम् 1 U, 4 P, पादाभ्यां या 2 P &c.; 'w. about', 'w. to and fro' परिक्रम्, इतस्ततः भ्रम् 1, 4 P; (for pleasure) वि-हृ 1 P; 'w. away,-off' अपसृ 1 P, अप-या-क्रम्-गम् &c. -*s.*-ING, *s.* पादचारः-गमनं; 'w. about' परिक्रमः-मणं; 'taking a w.' विहारः, विहरणं, (वायुसेवनार्थं) परिक्रमणं. 2 गमनागमनस्थानं; अध्वगमार्गः. -ER, *s.* पादचारिन्, पा-(प)दगः.

WALL, *s.* भित्ति *f.*, कुड्यं; 'enclosing w.' प्राकारः, वरणः, सालः, प्राचीरं; 'take the w. of' अन्रस्थानं आ-सद् c.; 'go to the w.' अव-सद् 1 P, अवसन्न-उच्छिन्न- *a.* भू 1 P; 'drive to the w.' अव-सद् c., उच्छिद् 7 P. -*v. t.* प्राकारेण आ-वृ 5 U.

WALLET, *s.* भस्त्रा; क्षुद्रकोषः.

WALLOW, *v. i.* लुठ् 6 P, लुड् 4 P; क्रीड् 1 P.

WALNUT, *s.* अक्षोटः; अक्षोटं (fruit).

WAN, *a. See* PALE.

WAND, *s.* दंडः, यष्टि *f.*

WANDER, *v. i.* परि-,भ्रम् 1, 4 P, अट् 1 P, वि-चर् 1 P, परि-,क्रम् 1 U, 4 P; 'w. from' भ्रंश् 1 A, 4 P, च्यु 1 A. -*s.*, -ING, *s.* परि-,भ्रमणं-अटनं. -ER, *s.* परिभ्रमकः, भ्रमिन् *m.*

WANE, *v. i.* परि-,क्षि 1 P or pass., ह्रस् 1 P; *See* DECAY, DECLINE. -*s.* क्षयः, ह्रासः. -ED, *a.* परि-क्षीण, क्षीणकल, प्राप्तक्षय, निष्कल, कलाशेष (चंद्रः). -ING, *a.* क्षयिन्, क्षय in comp.; 'w. period' क्षयकालः, कृष्णपक्षः, बहुलः, तमिस्रपक्षः.

WANT, *v.* अपेक्ष् 1 A, आ-,कांक्ष् 1 P, इष् 6 P; gen. ex. by कार्यं, प्रयोजनं, अर्थः, किं, (with gen. of that which wants and instr. of thing wanted); 'I do not w. this house' ममानेन गृहेण न कार्यं, न प्रयोजनं &c.; 'why do you w. to see her' किं तया दृष्टया (S. 2). 2 Wish, q. v. 3 परि-,हा pass.; हीन, रहित, निर् in comp.; आर्यस्य सुविहितप्रयोगतया न किमपि परिहास्यते (S. 1) 'nothing will be w. ing' &c.; 'w. ing in courage' शौर्यहीन, निर्वीर्य, &c.; 'he w. s wisdom' स निर्बुद्धिः, ज्ञानरहितः. -*s.* अपेक्षा, प्रयोजनं, कार्यं,

पत्रयः, उपयोगः. 2 धर्षणं. 3 हेतुः, आलि *f.* -ER, *s.* धारिन्, भृत् in comp. -ING, *a.* धारिन्, भृत्, धर in comp. 2 परिधानयोग्य.

WEARY, *v. t.* आयस् c., क्लम् c., खिद् c. -*v. i.* आयस् 1, 4 P, क्लम् 1, 4 P. -IED, *a.* खिन्न, क्लांत, परिश्रांत, म्लान, जातखेद; 'w. of' निर्विण्ण, निर्वेदमापन्न; *See* DISGUSTED; 'w. of life' जीवितादुद्विजमानः (Mal. 3). -INESS, *s.* क्लमः, श्रमः खेदः, आयासः; *See* FATIGUE,-ED &. -ISOME, *a.* श्रमखेद-जनन (नी *f.*), आयासकर (री *f.*), श्रमावह, कष्टप्रद.

WEASEL, *s.* नकुलः, बभ्रुः, अंगूषः.

WEATHER, *s.* कालः, दिनं; 'bad w.' दुर्दिनं; 'good w.' सुदिनं; 'if the w. be fine' यदि दुर्दिनं न स्यात्; 'w.-beaten' वाताहत, प्रभंजनोपहत; 'w.-wise' वातादिलक्षणविद्, कालविद्. -*v. t.* तॄ 1 P, प्रत्यव-स्था 1 A; पारं गम् 1 P.

WEAVE, *v. t.* वे 1 P; वप् 1 P, गुं(गु)फ् 6 P, वि-,रच् 10. -ER, *s.* तंतुवायः-पः, कुविंदः, पटकारः. -ING, *s.* वायः-पः, तंतु-तंत्र-वायः, ऊति-च्युति *f.*, पटनिर्माणं, पटकर्म.

WEB, *s.* जालं, तंत्र-तंतु-संतति *f.*; (of the eye) पटलं; 'w.-footed' जालपाद.

WED, *v. t.* वि-उद्-वह् 1 P, परि-णी 1 P. -DED, *a.* ऊढ, परिणीत. 2 आसक्त, अवलंबिन्, रक्षिन्, (to an opinion); 'w.-lock' विवाहः; 'a wife married in w.-lock' धर्मपत्नी, सहधर्मचारिणी; *See* MARRIAGE.

WEDGE, *s.* कीलः, शंकुः. -*v. t.* संपीड् 10, संबाध् 1 A, संमृद् 9 P.

WEDNESDAY, *s.* बुधवासरः.

WEED, *s.* कक्षः, तृणादिकं, स्तंबः; (fig.) गतिरोधनं, प्रसरस्तंभनं. 2 (W. s) वासस् *n.*; *See* GARMENT; 'widow's w. s' क्लिष्टनिवसनं, चीरं. -*v. t.* (Out) (कक्षं) उद्-हृ 1 P, निर्दो 4 P, उत्पद् 10. -ER, *s.* निर्दातृ *m.*, कक्षोद्धारिन्. -Y, *a.* कक्षपूर्ण-बहुल.

WEEK, *s.* सप्ताहः, सप्तदिनं; 'w.-day' वारः. -LY, *a.* साप्ताहिक (की *f.*), सप्तदैनिक (की *f.*). -*adv.* प्रतिसप्ताहं.

WEEN, *v. i.* मन् 4 A; *See* THINK; 'over w.-ing' अत्यंताभिमानिन्.

WEEP, *v. i.* रुद् 2 P, वि-लप् 1 P, अश्रूणि पत् c. or विमुच् 6 P, आ-,क्रंद् 1 P; *See* CRY, LAMENT -ING, *s.* रुदितं, रोदनं, विलापः, आक्रंदनं, क्रंदितं, अश्रुपातः. -*a.* साश्रु, अश्रुलोचन.

WEIGH, *v. t.* तुल्-तूल् 10, तुलायां धृ 10. 2 (In mind) वि-मृश् 6 P, आलोच् 10, वि-चर् c., वि-गण् 10; *See* THINK. 3 (Anchor) उत्तुल्; 'w. down' आभि-भू 1 P, आकुलीकृ; 'w. duly' परिच्छिद् 7 P, सूक्ष्मं निरूप् 10. -*v. i.* Ex. by 'Weight' q. v.; 'what does it w.' किंभारमिदं; किं भारपरिमाणं; 'w. upon' पीड् 10, बाध् 1 A; *See* AFFLICT; 'w. with' मन् pass.; 'dress w. s much with them' वेषस्तैर्बहु मन्यते. -ING, *s.* तोलनं, विगणनानं. -WEIGHT, *s.* मानं, भारः, तोलः, परिमाणं, भारपरिमाणं, गुरुत्वं. 2 गुरुत्वं, गौरवं, प्रभावः, भारः. 3 भारः, धुर् *f.*; 'of little w.' लघ्वर्थ, लघुप्रभाव, अगुरु. -Y, *a.* गुरु, महत्, सप्रभाव; सप्रमाण.

WEIR, *s.* बंधः, योगः.

WELCOME, *a.* स्वागत. 2 शुभ, इष्ट, हित; प्रिय, अभिमत, सुखदः -*v. t.* स्वागतं व्याहृ 1 P, सभाज् 10, अभिनंद् 1 P, सत्कृ 8 U, पूज् 10; (आश्रममृगैरभिनंदितागमनेषु समीरेषु Ka. 49). -*interj.* स्वागतं (with dat.). -*s.* स्वागतं, सभाजनं, अभिनंदनं.

WELD, *v. t.* *See* UNITE.

WELFARE, *s.* हितं, कल्याणं, क्षेमं, कुशलं, श्रेयस् *n.*, भद्रं, मंगलं, सुखं, भूति *f.*, शिवं, सुस्थिति *f.*

WELKIN, *s.* नभस् *n.*; *See* SKY.

WELL, *s.* वापी, कूपः, प्रहिः, अंधुः, दीर्घिका (large w.), उदपानं; 'covering of a w.' वि(वी)नाहः; 'reservoir near a w.' आहावः, निपानं, उपकूपजलाशयः. 2 गुप्ति *f.* -*a.* कुशलिन्, स्वस्थ, सुस्थशरीर, निरामय, नीरोग, कल्य; *See* HEALTHY. 2 कुशल, क्षेम, सुखिन्; oft. by कुशलं; अपि कुशलमस्याः प्रजापालस्य मातुः (U. 4) 'is she w.'; 'got w. again' पुनः प्रकृतिस्थोऽभवत्, प्रकृतिमापन्नः; 'know that we are doing w. in every respect' सर्वत्र नो वार्तमवेहि (R. v. 13). -*adv.* सु pr., (सुकृत, सुदर्शन &c.); सुष्ठु, साधु, सम्यक्; 'w. said' साधूक्त, सूक्त; 'w. off' सुस्थित *a.*, वित्तवत्, सुस्थ; 'you might as w. have kept all (fruits)' सर्वेषां रक्षणेपि न तव काश्चिद्दोषोऽभविष्यत्. -*interj.* बाढं, तथा; 'saying very w.' युज्यते, बाढं, तथेति उक्त्वा; 'very w.' भवतु; 'w. then' तेन हि. 2 (As expletive) भवतु, अस्तु, gen. by तावत्; 'w. we go away now' साधयामस्तावदधुना; 'w.-behaved' साधुशील, सुवृत्त; 'w.-being' हितं, कुशलं; *See* WELFARE; 'w.-born' कुलीन, सत्कुलजात; 'w.-done' साधु साधु; 'w.-informed' बहुज्ञ, बहुश्रुत; 'w.-meaning' सदाशय, हितबुद्धि; 'w. nigh; *See* NEARLY; 'w.-read' अधीतिन्, सर्वशास्त्रपारंगत, बहुदृश्वन्; 'w.-wisher' हितकामः, हितैषिन् *m.*, प्रियैषी.

WELTER, *v. i.* लुठ् 6 P, लुट् 4 P; *See* ROLL.

WEN, *s.* मांसार्बुदं.

WENCH, *s.* बंधकी, पुंश्चली, दुर्वृत्ता. 2 कन्या, तरुणी. -*v. i.* Fornicate, q. v.

WEND, *v. t.* (One's way) गम् 1 P, चल् 1 P; *See*

Go; 'here he w. s his way' इत एवाभिवर्तते.

West, *s.* प्रतीची, पश्चिमा, वारुणी. **-a.,-erly, -ern**, *a.* पाश्चात्य, प्रतीच्य, चरम, अपर. **2** पश्चिमाभिमुख (स्त्री *f.*). **-wards**, *adv.* प्रतीचीमभि, प्रतीच्यभिमुखं, पश्चिमादिशि.

Wet, *a.* आर्द्र, क्लिन्न, सिक्त, उक्षित, उन्न, जलार्द्र. **-***v. t.* क्लिद् c., आर्दीकृ 8 U, आर्द्रयति (D.); *See* **Melt.** **-***s.* आर्द्रता, नेमः, क्लेदः. **2** दुर्दिनं; 'w.-nurse' स्तन्यदायिनी, धात्री, उपमाता.

Wether, *s.* छिन्नवृषणो मेषः.

Whack, *v. t. See* **Strike.**

Whale, *s.* तिमिः, तिमिंगिलः.

Wharf, *s.* घट्टः, तरस्थानं. **-age**, *s.* तरपण्यं-मूल्यं, घट्टदेयं शुल्कं.

What, *pron.* किं (कः-का-किं), किं in comp.; 'w. then' ततः किं, किं तर्हि; 'w. is he doing now' स (राजा) किमारंभः संप्रति (U. 2); 'w. is his name' किंनामासौ; 'w. else' अथ किं; 'w. is that to me' किं मम तेन; 'w. though' यद्यपि. **2** यद्यद्. **-***interj.* कथं, आः, किं, ननु. **-ever,-soever**, *a.* यद्-यद्. **2** यत्किम्, यत्किंचित्; 'to w. person' यस्मै कस्मैचित्पुरुषाय; यो वा को वा भवान्यहं, &c.

Wheat, *s.* गोधूमः, सुमनः. **-en**, *a.* गोधूममय, (*s.*) in comp.

Wheedle, *v. t.* चाटूक्तिभिः प्र-तृ c. or वंच् 10 or लल् 10; *See* **Flatter.**

Wheel, *s.* चक्रं, रथांगं, मंडलं. **-***v. i.* परि-भ्रम् 1, 4 P, परा-परि-आ-वृत् 1 A, मंडलाकारेण भ्रम्. **-***v. t.* व्यावृत् c., भ्रम् c. **-ed**, *a.* चक्रिन्, चक्रयुक्त. **-Wheel-wright**, *s.* रथकारः, चक्रकारः.

Wheeze, *v. i.* कृच्छ्रेण श्वस् 2 P.

Whelp, *s.* शावः-वकः, शिशुः, किशोरः.

When, *adv.* यदा; by loc. abs.; 'w. the speech was over' वचस्यवसिते तस्मिन्. **2** कदा; 'w.-ever,-soever' यदा यदा, यदा कदाचित्. **-Whence**, *adv.* यतः, यस्मात्. **2** कुतः, कस्मात्.

Where, *adv.* क्व, कुत्र. **2** यत्र; 'w.-ever' यत्र यत्र; यत्र कुत्रापि, यत्र कुत्रचित्; 'w.-as' यतः, विपर्ययेण तु; 'w.-by' येन; 'w.-fore' यदर्थं, यतः, येन, किमर्थं, कस्य हेतोः; 'w.-in', 'w.-to' यत्र; 'w.-upon' यदनंतरं, तदनु.

Whet, *v. t.* तिज् c., नि-,शो 4 P, क्षणु 2 P. **-***s.*, **-stone**, *s.* शाणः-णी, शाणाश्मन् *m.*

Whether, *pron.* कतरः-रा-रत्. **-***conj.* किं followed by वा, उत, आहो or आहोस्वित् (for 'or'), 'w. he do that or not' स तत्करोतु न करोतु वा.

Whey, *s.* मस्तु *n.*, दधिमंडः.

Which, *pron. a.* यत् (यः-या-यत्). **2** किं (कः-का-किं); 'w. of two' यतर, कतर; 'w. of many' यतम, कतम; 'w.-ever' ex. by repeating (1).

Whiff, *s.* फूत्कारः, फूत्कृतं.

While, *s.* क्षणः, मुहूर्तः, कालः, समयः; 'for a w.' कंचित्कालं, क्षणं; 'after a long w.' चिरेण; 'not worth w.' निष्फलं, निरर्थकं, न उपयुक्तं; 'worth w.' उपयुक्तं. **-***conj.*, **Whilst**, यदा, यावत् (followed by तावत्); gen. by pres. part.; ग्रामं गच्छंस्तृणं स्पृशति 'w. going' &c. **-***v. t.* (away) क्षिप् 6 P, गम् c., हृ 1 P, वि-नुद्.

Whim, *s.* कामचारः, कामवृत्ति *f.*, छंदः, छंदस् *n.*, चापल्यं, मनोलौल्यं, लहरी, चित्ततरंगः; 'at one's w.' स्वच्छंदेन, स्वेच्छया; 'acting according to another's w.' छंदोनुवृत्ति *f.* **—Whimsical**, *a.* कामचारिन्, स्वैरिन्, स्वैर, स्वच्छंदानुवर्तिन्, स्वच्छंद; चपल, लोल, अनवस्थित.

Whimper, *v. i.* बालकवत् रुद् 2 P or क्रंद् 1 P.

Whine, *v. i. See* **Murmur.**

Whip, *s.* कशा-षा, प्रतोदः, प्रतिष्कषः-शः. **-***v. t.* कशया प्र-हृ 1 P or तड् 10 or क्षुद् 10 or दंड् 10 or आहन् 2 U. **-ping**, *s.* कशाघातः-ताडनं-प्रहारः; 'deserving w.' कश्य, कशार्ह.

Whirl, *v. i.* घूर्ण् 6 P, 1 A, परि-,भ्रम् 1, 4 P. **-***v. t.* घूर्ण c., भ्रम् c. (भ्रमयति). **-***s.*,**-ing**, *s.* भ्रमणं, घूर्णनं, भ्रमि *f.*, आवृत्ति *f.*; 'w.-pool' आवर्तः, भ्रमिः, भ्रमः, जलावर्तः, जलगुल्मः; 'w.-wind' चक्रवातः, वातावर्तः; वात्या, वातभ्रमः.

Whisk, *v. t.* अतिशीघ्रं चल् c. or विक्षिप् 6 P. **-***s.* लघुक्षेपः. **2** चामरं (for flies).

Whiskers, *s.* गंडलोमन् *n.*, गुंफः.

Whisper, *v.* नीचैः-उपांशु-वद् 1 P; कर्णे जप् 1 P or कथ् 10 or ख्या 2 P; कर्णे उप-जप्; 'w. aside' जनांतिकं वद्. **-***s.*,**-ing**, *s.* कर्णेवादः, उपांशुवादः, कर्णेजपः; जपः-पनं; 'in a w.' उपांशु, जनांतिकं, नीचस्वरेण. **-er**, *s.* कर्णे(र्ण)जपः-कथकः.

Whistle, *s.* शिश्शब्दः. **2** वंशः-शी. **-***v. i.* शिश्शब्दं कृ 8 U.

Whit, *s.* लेशः, लवः, गंधः, अणुः; 'not a w.' न मनागपि, न स्तोकमपि, नाल्पमपि.

White, *a.* शुक्ल, श्वेत, धवल, शुभ्र, सित, गौर (री *f.*), शुचि, अवदात, विशद; धौत, पांडुर, अवि-मल. **-***s.* श्वेतवर्णः, शुक्लवर्णः, शुक्लः; श्वेतः, सितः, &c.; 'dressed in w.' श्वेतवासो दधान. **-en**, *v. t.* धवलीकृ 8 U, धवलयति (D.) &c. **-***v. i.* धवलीभू 1 P, धवलायते (D.). **-ish**, *a.* आपांडु. **-ness**, *s.* शुक्लता, धावल्यं, शुभ्रता, धवलिमन्-शुक्लिमन् *m.* **-White-wash**, *v. t.* सुधया लिप् 6 P or धवलीकृ; 'a house w.ed' सुधाभवनं. **-***s.* सुधा, सुधालेपः. **-Whites**, *s.* श्वेतमदरः.

Whither, *adv.* कुत्र, क्व. 2 यत्र.
Whitlow, *s.* नखपच्चः, चिप्यं, नखव्रणं.
Who-ever, &c. *See* Which &c.
Whole, *a.* सकल, समग्र, कृत्स्न, अखिल, समस्त, सर्व, अखंड, निखिल, विश्व, अशेष, निःशेष, पूर्ण, अनून. 2 (Number) अभिन्न. -*s.* साकल्यं, कार्त्स्न्यं, सामग्र्यं, समासः; 'on the w.' एवं च, एतावता, समासतः, समासेन; 'the w. of' ex. by (*a.*). -LY, *adv.* समग्रं, साकल्येन, अशेषेण, निरवशेषं, सर्वथा, सर्वतः-शः, सर्वभावेन, एकांततः. -WHOLESALE, *a.* Ex. by स्तूप in comp., समस्त (विक्रयः); 'w. dealer' स्तूपविक्रायिन्; 'w. buying' समस्तराविक्रयः.
Wholesome, *a.* पथ्य, आरोग्यावह; हितावह; *See* Salutary.
Whoop, *s.* सिंहनादः, क्ष्वेडा.
Whore, *s. See* Prostitute; 'w.'s son' वेश्यापुत्रः; 'w.-monger' भुजंगः, विटः. -DOM, *s.* वेश्यावृत्ति *f.*-प्रसक्ति *f.*
Why, *adv.* किं, कुतः, कस्मात्, किमर्थं, किन्निमित्तं, केन हेतुना; 'w. do you do so' एवं करणे कस्तव हेतुः. 2 ननु; 'w. you yourself are before me' ननु भवानेव ममाग्रे वर्तते (S. 2).
Wick, *s.* दशा, वर्ति *f.*, वर्तिका, तैलिनी.
Wicked, *a.* (Of persons) दुष्ट, दुर्जात, दुरात्मन्, पाप, शठ, दुराचार, खल, पापकर्मन्, दुर्वृत्त, नृशंस, पापात्मन्, पापचरित, अधार्मिक (की *f.*), दुश्चरित्र. 2 (Of things) दुष्ट, पाप in comp., दुर् pr.; 'w. policy' दुर्नीतिः; *See* Sinful. -LY, *adv.* दुष्टतया, दुर्वृत्ततया, खलवत्. -NESS, *s.* दुष्टता, दौर्जन्यं, दौरात्म्यं, पापं, दुष्कृतं-ति *f.*, पापकर्म, दुराचारः, अनाचारः.
Wicker, *a.* वैणव (वी *f.*), वैदल (ली *f.*); 'w.-work' वैदलं.
Wide, *a.* विस्तीर्ण, विशाल, उरु, विपुल, पृथु; *See* Broad; 'w. of the mark' लक्ष्यभ्रष्ट-च्युत, अप्रास्ताविक (की *f.*). -*adv.*, -LY, *adv.* विपुलं, सर्वत्र, सु-अति-बहु pr.; 'w. known' सुविख्यात; 'w. awake' सुप्रबुद्ध; 'with eyes w. open' उत्फुल्लनयन. -EN, *v. t.* पृथूकृ 8 U, विशालीकृ, प्रथ् 10. -WIDTH, *s.* विस्तारः, व्यासः, परिणाहः, विशालता.
Widow, *s.* विधवा, अ-गत-भर्तृका, विश्वस्ता, अनाथा, रंडा; 'child-w.' बालविधवा. -ED, *a.* अनाथा, नष्टभर्तृका. -EE, *s.* मृतपत्नीकः, गतभार्यः. -HOOD, *s.* वैधव्यं, वैधव्यदशा.
Wield, *v. t.* (हस्तेन) भृ 3 U, धृ 1 P, 10, प्र-उप-युज् 7 A, 10. 2 (A state &c.), प्र-, शास् 2 P, निर्वह् c.; राज्यधुरां वह् 1 P. -Y, *a.* सुप्रयोज्य; (body) उत्थानयोग्य (S. 2).
Wife, *s.* भार्या, पत्नी, जाया, वधूः, कलत्रं, दार *m.* (pl.), स्त्री, परिग्रहः, गृहिणी, गेहिनी, सहधर्मिणी, दयिता, वल्लभा, प्रिया, कांता, रमणी, क्षेत्रं, गृहाः (pl.); 'a rival w.' सपत्नी; 'taking a w.' दारपरिग्रहः-क्रिया; 'a w. whose husband has gone abroad' प्रोषितभर्तृका.
Wig, *s.* उपकेशः, कृत्रिमकेशः.
Wight, *s.* माणवकः, जंतुः, प्राणिन् *m.*
Wild, *a.* वन्य, वनजात, आरण्यक, वन-अरण्य in comp.; 'a w. mountain' कांतारमध्यवर्ती-वनांतर्गतः-पर्वतः; वनपशुः, वनगजः, वनपुष्पं &c. 2 हिंस्र, क्रूर, क्रव्याद्. 3 उन्मत्त, अतिव्याकुल; 'w. with anger' क्रोधोन्मत्त; 'w. with joy' हर्षोन्मत्त, हर्षनिर्भर. 4 प्रचंड, तीव्र; दुर्दांत, अनियंत्रण, उद्दामवृत्ति, उच्छृंखल; 'w. storm' प्रचंडप्रकंपनः. 5 अयुक्तिक, अनुपपन्न, निरर्थक; *See* Absurd. -ERNESS, *s.* वनं, अरण्यं; *See* Forest. 2 महः-,भूमि *f.*, धन्वन् *m.* -LY, *adv.* उन्मत्तवत्, प्रचंडं, सोन्मादं, उच्छृंखलं. -NESS, *s.* वन्यता, रौद्रता, उन्मादः, &c.
Wile, *s.* छलं, कपटं, वंचनं, माया, छद्मन् *n.* -WILY, *a.* भूरिमाय, मायाविन्, समाय, छद्मपर, कापटिक-छाद्मिक (की *f.*), सकपट.
Will, *v.* संकृप् c., निर्दिश् 6 P, निश्चि 5 U, निर्णी 1 P. 2 Wish q. v. 3 (As auxiliary) by Futures or Pot. mood. -*s.* संकल्पः, संकल्प-इच्छा-शक्ति *f.* 2 कामः, इच्छा, अभिलाषः, आकांक्षा, इष्टं; 'god's w. be done' ईश्वरेच्छा बलीयसी, प्रभवति भगवान् विधिः; 'against one's w.' बलात्, हठात्, अकामतः; 'would have her w.' आत्माभिप्राये निर्बंधपरासीत्; 'at w.' स्वेच्छया, यथाकामं, स्वैरं, काम in comp.; 'subject to the w. of another' परतंत्रवशः. 3 इच्छापत्रं. -FUL, *a.* कामतः कृत. 2 स्वैरिन्, काम-स्वेच्छा-चारिन्, स्वैरवृत्त-गामिन्, *See* Wanton. -FULLY, *adv.* कामतः, इच्छापूर्वकं, स्वैरं, बुद्ध्या, जानत्- *a.* अपि. -FULNESS, *s.* कामचारः, स्वेच्छाचारः, यदृच्छा, स्वैरिता, स्वाच्छंद्यं. -ING, *a.* इच्छु, सकाम, उद्यत; oft. by desid. 2 इष्ट, अनुमत, यथेप्सित. -INGLY, *adv.* प्रकामं, स्वेच्छया, कामतः, स्वेच्छापूर्वं. -WOULD (that) Ex. by अपि नाम; अपि नामाहमप्यात्मनोनुरूपं वरं लभेयेति (S. 1); 'w. I had loved him more' वरं तस्मिन्नहमधिकतरं स्निग्धोऽभूवं; यदि...अभविष्यं तर्हि अहो शोभनमापतिष्यत्.
Win, *v. t.* वि-जि 1 A, विजयिन् *a.* भू; 'won the battle' युद्धे जयमाप, समरविजयी बभूव; 'who is said to w.' यो विजयीति गण्यते-मन्यते. 2 लभ् 1 A, प्राप् 5 P; *See* Get. 3 आकृष् 1 P, प्र-वि-लुभ् c., *See* Attract; 'w. over' स्वपक्षं ग्रह c., अनुयायिन् *a.* कृ. -NER, *s.* जयिन् *m.*, जेतृ *m.* -NING, *s.* जयः. 2 लाभः, अर्जितं. -*a.* हृदयहारिन्, चित्ताकर्षिन्.
Wince, *v. i.* वि-,कंप् 1 A, स्फुर् 6 P; 'he did

not w.' स भयचकितो नाभवत्; *See* START.

WIND, *s.* वातः, वायुः, पवनः, पवमानः, अनिलः, समीरणः, मारुतः, मरुत् *m.*, मातरिश्वन्, श्वसनः, स्पर्शनः, गंधव(वा)हः, आशुगः. **2** (In stomach) वातः, वायुः. **3** श्वासः; 'w.-fall' वायुपातः; (fig.) अलभ्यलाभः; 'w.-lass' उत्तोलनी; 'w.-mill' वायुचाल्यं चक्रं, वायुपेषणी. **-***v. i.* वक्रं-कुटिलं-गम् or सृप् 1 P, जिह्मं या 2 P; 'the river runs w. ing for a koss' क्रोशं कुटिला नदी (S. K.). **2** Turn, q. v. **-***v. t.* परि-आ-वृत् c. **2** पूर् 10 (मारुतेन), धमा 1 P. **2** (Up) संपुटीकृ 8 U, पिंडीकृ, उप-,सं-हृ 1 P; अव-सो 4 P; (hair) सं-हृ, सं-यम् c., (संयमय केशपाशं Ka. 84). **-ING,** *a.* वक्र, कुटिल, जिह्म. **-***s.* वक्रं, वंकः, पुटभेदः. **-WARD,** *adv.* वाताभिमुखं. **-Y,** *a.* वातमय (यी *f.*), वातुल. **-WINDOW,** *s.* वातायनं, जालं, गवाक्षः.

WINDPIPE, *s.* श्वासनालिका.

WINE, *s.* मद्यं, द्राक्षारसः-आसवः; मधु *n.*, माध्वीकं; मदिरा, सुरा; 'w.-bibber' मद्यपः, सुरापः; 'w.-seller' मद्यविक्रायिन्, शौंडिकः.

WING, *s.* पक्षः, पत्रं, पतत्रं, मरुत् *m.*, छदः, पक्ष्मन् *n.*; 'root of a w.' पक्षति *f.*, पक्षमूलं; 'to be on the w.' डी 1 A; 'under the w. of' आश्रित- *a.* **2** (Of army &c.) पक्षः, दलं, पार्श्वदलं. **-***v. t.*, 'w. the way' अध्वक्रमणं कृ 8 U. **-ED,** *a.* पक्षिन्, पतत्रिन्.

WINK, *v. i.* नि-मिष् 6 P, नि-मील् 1 P, पक्ष्म संकुच् 1 P. **2** संकेत-संज्ञां-कृ 8 U (नेत्रेण); 'w. at' उपेक्ष् 1 A, न गण् 10. **-***s.* निमि(मे)षः, निमीलनं, पक्ष्मसंकोचः. **2** नेत्रसंज्ञा, अक्षिसंकेतः.

WINNOW, *v. t.* वि-,शुध् c., पू 9 U, बहलीकृ 8 U, प्रस्फुट् c.; (fig.) परीक्ष् 1 A; *See* DISCRIMINATE. **-ER,** *s.* पावकः. **-ING,** *s.* पवनं, प्रस्फोटनं; 'w. ing basket' शूर्पः-र्पं, प्रस्फोटनं.

WINTER, *s.* हेमंतः, शिशिरः, तुषारकालः, हिमागमः, हिम-शीत-कालः. **-WINTRY,** *a.* (*s.*) in comp.; हैमंत (ती), हैम (मी *f.*). **2** शीत, शिशिर.

WIPE, *v. t.* प्र-परि-मृज् 2 P or c., प्र-क्षल् 10, निर्घृष् 1 P, सं-मृद् 9 P; *See* WASH; 'w. away,' 'w. out' प्रमृज्, (स्वभावलोलेत्ययशः प्रमृष्टं R. VI. 41), अप-अव-मृज्. **-***s.* मार्जनं, प्रक्षालनं. **2** प्रहारः. **-ER,** *s.* मार्जनी, प्रक्षालनी.

WIRE, *s.* तंत्र, तंत्री, तारः-रा, धातुसूत्रं, लोहतारा-सूत्र-तंतुः. **-***v. t.* तारायंत्रेण प्रेष् c. **-Y,** *a.* तंत्रमय (यी *f.*).

WISE, *a.* प्र(प्रा)ज्ञ, विज्ञ, विदग्ध, ज्ञानवत्, पंडित, प्रज्ञावत्, धीमत्, विवेकिन्, सुधी, धीर, मति-बुद्धि-मत्, मनीषिन्, विद्वस्; *See* LEARNED also. **2** (Of acts) सु in comp.; ज्ञानप्रयुक्त, वैदग्ध्यमूलक; 'w. saying' सुभाषितं; 'w. step' साधुमार्गः. **-***s.* प्रकारः; *See* MANNER; 'in this w.' एवं, इत्थं. **-LY,** *adv.* प्रज्ञया, ज्ञानेन, सविवेकं, सम्यक्, सुलक्षीकृत्य, सुष्ठु, प्राज्ञवत्. **-WISDOM,** *s.* प्रज्ञा, ज्ञानं, वैदग्ध्यं, बुद्धि *f.*, धीः, विवेकः, वैदुष्यं, पांडित्यं, धीरता, मनीषा. **-WISEACRE,** *s.* पंडितंमन्यः.

WISH, *v. t.* इष् 6 P, स्पृह् 10 (with dat.), सं-,ईह् 1 A, वांछ् 1 P, आ-,कांक्ष् 1 P, अभिलष् 1, 4 P, कम् 1 A, वश् 2 P; oft. by desid. forms; जिगमिषति 'w. es to go;' जिघृक्षति &c.; 'w. ill to' असूयति (D.) (with dat.); अमंगलं आशंस् 1 A; 'I w. no evil to any' न मे कस्मिन्नपि द्रोहबुद्धिः-द्वेषभावः; 'I w. I could see him again' अपि नाम तं पुनरपि पश्येयं; 'he had nothing left to w. for' न किमपि तस्य स्पृहणीयमासीत्. **-***s.* इच्छा, मनोरथः, स्पृहा, ईहा, कामः, इष्टं, वांछितं, अभिलाषः; वांछा, कांक्षा.

WIST, *s.* शुष्कतृणकूर्चकः.

WISTFUL, *a. See* EAGER.

WIT, *s.* बुद्धि-मति *f.*, मेधा, धीः; *See* INTELLECT. **2** बुद्धितीक्ष्णता, बुद्धिविलासः-चातुर्यं; 'was at his w.'s end' किंकर्तव्यतामूढः-कुंठितमतिः-आसीत्, निरुत्तरीकृतः. **3** (Person) वाक्चतुरः, नर्मज्ञः, परिहासकथः, नर्मभाषी. **4** रसः, नर्मन् *n.*, वैदग्ध्यं, सारस्यं, नर्म-रसिक-उक्ति *f.*, नर्मालापः-भाषणं; 'to w.' तथा-था. **-TY,** *a.* नर्मवेदिन्, नर्मभाषिन्; सरस, विदग्ध, रसयुक्त; परिहासजनन ('नी *f.*); 'w. speech' परिहासालापः, नर्मवाक्यं, नर्मालापः.

WITCH, *s.* डाकिनी, मायाविनी, कुहकिनी, मायिनी. **-ERY,** 'w.-craft', *s.* माया, अभिचारः.

WITH, *prep.* Gen. ex. by instr. **2** (Manner) by instr.; प्रीत्या 'w. affection'; by comp. with स; सहर्षं, सभयं &c.; पूर्वं, पूर्वकं in comp.; 'w. respect' मानपुरःसरं, आदरपूर्वकं. **3** (Accompaniment) by Bah. comp.; 'Madana w. Rati' रतिसहायो मदनः; सकृष्णो रामः; gen. by समं, साकं, सार्धं, सह, सहितं, with instr.; 'send the book w. Rama रामहस्ते पुस्तकं प्रेषय. **4** (With verbs) सं;-'to live w.' सं-वस्. **5** (On the side of) पक्षे. **6** (In the opinion of) मतेन, मते, (तव मतेनाकिंचित्करमिदं); 'w. all' अनादृत्य; *See* 'in spite of' under SPITE. **-AL,** *adv.* समं, तथा च, अपि च, तथैव.

WITHDRAW, *v. t.* प्रति-,सं-हृ 1 P, अपाकृष् 1 P, अप-नी 1 P, प्रत्यव-हृ; 'w. s the world into himself' आत्मन्येवाखिलं विश्वं संहरति. **-***v. i.* अप-क्रम् 1 U, 4 P, अप-सृ 1 P, अप-गम् 1 P, परावृत् 1 A; *See* RETIRE. **-AL,** *s.* संहारः, संहरणं, अपनयनं, अपक्रमः-मणं.

WITHER, *v. i.* म्लै 1 P, ग्लै 1 P, वि-शु pass.; सुष्क

1 P, क्षि pass. —*v. i.* नश् c., शू c.; *See* FADE. —ED, *a.* म्लान, ग्लान, विशीर्ण, शुष्क, जीर्ण.

WITHERS, *s.* स्कंधदेशः, स्कंधः.

WITHHOLD, *v. t.* नि-ग्रह् 9 P, अव-नि-रुध् 7 U, नियम् 1 P, प्रति-,संह 1 P, अपसं-ह, वि-धृ 10; न दा 3 U.

WITHIN, *adv.* अंतर् in comp.; अंतर्वर्तिन्. 2 चित्तीभूत, आंतर. (*a.*). —*prep.* अंतरे, अभ्यंतरे, मध्ये, अंतर् in comp.; 'w. the house' गृहाभ्यंतरे, अंतर्गृहं &c.; 'w. six months' षण्मासाभ्यंतरे, षण्मासमध्ये; अर्वाक् (with abl.). 2 (In the reach of) गोचर, विषय, ग्राह्य, in comp.; 'w. hearing' कर्णगोचरीभूत; 'w. the reach of eyes' नयनगोचरे, नयनविषये &c.; 'w. the reach of the hand' हस्तप्राप्य-ग्राह्य.

WITHOUT, *prep.* विना (with acc., instr., abl.), अंतरेण (with acc.), ऋते (with abl.), वर्जयित्वा, मुक्त्वा, विहाय (with acc.); by अ-निर्-pr., हीन, रहित, वर्जित, व्यतिरेकेण, व्यतिरिक्तं in comp.; 'w. delay' अविलंबं; 'w. doubt' निःसंशयं, असंशयं; 'w. money' धनहीन-रहित, निर्धन. 2 (Before participles) By अ (अन्); 'w. burning' अदहन्, अदग्ध्वा; 'w. being marked' अलक्षित. 3 बहिः (with abl.), बहिर्भागे. —*adv.* बहिः, बाह्यतः; 'lying w.' बहिःस्थित.

WITHSTAND, *v. t.* निरा-गतिं-कृ 8 U, प्रतिकूलयति (D.), वि-रुध् 7 U, परिपंथीभू 1 P, (बद्धपरिकरस्य तेन त्रैलोक्यमपि क्षमं परिपंथीभवितुं Ve. 3); प्रत्यव-स्था 1 A; *See* OPPOSE.

WITNESS, *s.* साक्षिन् *m.*; 'w. es for prosecution' पूर्ववादिनः साक्षिणः; 'ear-w.' श्रुतसाक्षी; 'eye-w.' दृष्टसाक्षी. 2 साक्षात् द्रष्टृ *m.* 3 साक्ष्यं, प्रमाणं. —*v. t.* प्रत्यक्षीकृ 8 U, प्रत्यक्षं दृश् 1 P; *See* SEE. 2 साक्ष्येण प्रमाणीकृ. —*v. i.* साक्ष्यं दा 3 U, साक्षीभू 1 P.

WIZARD, *s.* मायाकारः; *See* MAGICIAN.

WOE, *s.* दुःखं, शोकः; *See* SORROW, GRIEF. —*interj.* हा, धिक्, (with acc.); अहो बत, हा कष्टं. —FUL, *a.* Sorrowful, q. v.; 'is in a w. plight' कष्टमभ्यापन्नः (U. 3).

WOLF, *s.* वृकः, कोकः, ईहामृगः.

WOMAN, *s.* स्त्री, नारी, अंगना, अबला, योषित्, वनिता, ललना, योषा, सीमंतिनी, वधूः, वामा, महिला; 'noblyborn w.' कुलांगना, कुलजा; 'young w.' युवतिः-ती, यूनी, तरुणी, प्रमदा, बाला; 'beautiful w.' सुंदरी, प्रमदा, सुभगा, नितंबिनी, वामलोचना; 'an excellent w.' वरारोहा, मत्तकाशिनी, उत्तमा, वरवर्णिनी; 'passionate w.' कोपना, भामिनी; 'old w.' स्थविरा, वृद्धा, जरती; 'virtuous w.' सती, साध्वी, पतिव्रता, सुचरित्रा, कुलस्त्री, कुलपालिका. —HOOD, *s.* यौवनं. —ISH, *a.* स्त्रीवत् *ind.*, स्त्रैण (णी *f.*). —KIND, *s.* स्त्रीजनः, अबलाजनः, स्त्रैणं. —LY, *a.* (*s.*) in comp.; 'with w. timidity' स्त्रीस्वभावसुलभकातरतया.

WOMB, *s.* गर्भः, गर्भाशयः, गर्भस्थानं.

WONDER, *s.* विस्मयः, चमत्कारः. आश्चर्यं, कौतुकं. 2 अद्भुतं, चित्रं, अद्भुतवस्तु; 'it is no w. that' नैतच्चित्रं यद् &c., किमत्र चित्रं; 'w.-struck' विस्मयाकुल-उपहत-आपन्न. —*v. i.* वि-स्मि 1 A, by (*s.*) in comp.; w. ed at hearing the news' वार्ताश्रवणेन संजातविस्मयः-साविस्मयः-बभूव. —FUL, WONDROUS, *a.* अद्भुत, आश्चर्यभूत, विस्मयकर (री *f.*), आश्चर्य, वि-,चित्र, विस्मापक. —FULLY, *adv.* अद्भुतं, साश्चर्यं. —INGLY, *adv.* सविस्मयं, साश्चर्यं.

WONT, *s.* अभ्यासः, रीति *f.*, संप्रदायः, आचारः, नित्यव्यवहारः. —ED, *a.* परिचित, नित्य, अभ्यस्त; 'w. nature' स्वभावः, प्रकृति *f.*; *See* NATURE; 'to bring to one's w. nature' प्रकृतौ स्था c., प्रकृतिस्थ-*a.* कृ.

WOO, *s.* (विवाहार्थं) याच् 1 A, अर्थ् 10 A, आराध् c. —ER, *s.* विवाहकामः, विवाहार्थी.

WOOD, *s.* काष्ठं, दारु *n.* 2 वनं, अरण्यं; *See* FOREST; 'w.-apple' कपित्थः; 'w.-cock' काष्ठ-वन-कुक्कुटः; 'w.-cutter' काष्ठच्छिद्, काष्ठिकः; 'w.-land' वृक्ष-वृक्षावृत-भूमि *f.*; 'w.-man' आटविकः, वनजीविन् *m.*, 'w.-cutter', q. v.; 'w.-nymph' वनदेवता; 'w.-pecker' काष्ठकूटः, दार्वाघाटः; 'w.-pigeon' हारीतः; 'w.-sorrel' चुक्रिका, दंतशठा. —ED, *a.* वृक्षावृत, सवृक्ष. —EN, *a.* काष्ठ-दारु-मय (यी *f.*), काष्ठ-दारु in comp. —Y, *a.* वृक्षाकीर्ण, द्रुमभूयिष्ठ, द्रुमावृत. 2 Silvan, q. v.

WOOF, *s.* प्रतितंत्रः, वाणि-णी *f.*

WOOL, *s.* लो(रो)मन् *n.*, ऊर्णा (of sheep). —LEN, *a.* लोमज, और्ण (णी *f.*), ऊर्णामय (यी *f.*); मेषलोमज; 'w. cloth' और्णवस्त्रं-पटः. —LY, *a.* लोमश, रोमवत्.

WORD, *s.* शब्दः, नामन् *n.*, पदं, वाचकः; 'w. for w.' यथाशब्दं. 2 वचनं, संगरः, प्रतिज्ञा; *See* PROMISE.; 'true to, or keeping, one's w.' सत्यपालित-संगरः; 'you have given your w.' विहितप्रतिज्ञः-दत्तवचनः-असि; 'to break one's w.' विसं-वद् 1 P, प्रतिज्ञां लुप् c. 3 वाक्यं, वचस् *n.*, वाच् *f.*, उक्ति *f.*, वचनं; 'whose w. can be trusted' आप्तः, आप्तवाक्; यथार्थवक्ता; 'war of w.s' वाग्युद्धं, वाक्कलहः; 'a man of few w.s' मितवाक्, अल्पभाषी. 4 संदेशः, वार्ता; 'in a w.' किं बहुना; 'in a few w.s' समासतः, समासेन; 'upon my w.' (I tell you &c.) यदि मद्वचः श्रद्धेयं मन्यसे, यदि

ते मद्वचने विश्वासः. —*v. t.* शब्दान् रच् 10 or युज् 10 or ग्रंथ् 9 P; gen. ex. by (*s.*); 'a briefly w. ed message' लघुसंदेशपदा सरस्वती; 'well-w. ed' सम्यग्ग्रथित, साधुविन्यस्तशब्द; 'pathetically w.-ed' करुणार्थग्रथित (संदेश &c.). —WORDY, *a.* बहुशब्द, विस्तीर्णवाच्, बहुवाङ्मय (यी *f.*), उपचित-वाक्. —INESS, *s.* शब्द-वाक्य-विस्तरः, वागुपचयः, बहु-शब्दत्वं.

WORK, *s.* कर्मन् *n.*, कृति *f.*, कार्यं, व्यापारः, व्यवसायः, नियोगः; क्रिया. 2 Labour, q. v.; उद्यमः, उद्योगः. 3 ग्रंथः, क्रिया, कृतिः; 'at w.' कर्मव्यग्र *a.*, कार्यव्यापृत *a.*; 'had hard w. to go' गच्छन्नतीवायासितः. 'w.-house' कर्मशाला; 'w.-shop' कर्म-शिल्प-उद्योग-शाला. —*v. i.* परिश्रम्-कर्म-कृ 8 U, व्या-पृ 6 A (with loc.), कार्यासक्त,-कार्यव्यापृत् *a.* भू 1 P, परि-श्रम् 4 P, उद्यम्. 2 फल्, गुणं आवह् 1 P or दा 3 U, oft. by गुणः; अतिवीर्यवतीव भेषजे बहुरल्पीयसि दृश्यते गुणः (Ki. II. 4) 'w. s well or efficaciously'. —*v. t.* सं-,चल् c., सृ c. 2 कृ 8 U, वि-धा 3 U, निर्मा 3 A, 2 P, रच् 10, घट् c. (घटयति), कॢप् c. 3 उत्पद् c., जन् c., आवह्. 4 आयस् c., परि-श्रम् c., क्लिश् c. 5 Manage, q. v.; 'w. out' परि-उप-कॢप् c., साध् 5 P or c.; 'w. up,' Excite, q. v.; उप-प्र-युज् 7 A, 10. —ING, *s.* चेष्टा, व्यापारः, प्रवृत्ति *f.*, क्रिया; *See* (*s.*). —WROUGHT, *a.* कृत, विहित &c. 2 संस्कृत, परिष्कृत, कृत; 'w. gold' कृतहेम; 'w. iron' कुशी. —WORKMAN, *s.* कर्मकरः-री *f.*, कर्मकारः, कर्मकारिन्-णी, कारुः, शिल्पकारः. —LIKE, *a.* दक्ष, कर्मठ. —SHIP, *s.* कर्मकौशलं, हस्तक्रिया. 2 कर्म, निर्माणं, घटना, आकृतिः.

WORLD, *s.* विश्वं, जगत् *n.*, भुवनं, लोकः, चराचरं, त्रिविष्टपं, अखिलं जगत्, ब्रह्माण्डं; 'three w. s' त्रिभुवनं, त्रिलोकी, त्रैलोक्यं. 2 Earth, q. v.; 'end of the w.' कल्पांतः. 3 लोकः, जनः, (pl. also). 4 संसारः, भवः, संसृति *f.*, प्रपंचः, जीवयात्रा. 5 लोकाचारः-मार्गः, जनरीति *f.*, रूढि *f.*, लौकिकं, लोकः; 'in this w.' इह; 'in the next w.' अमुत्र, परत्र, प्रेत्य; 'the next w.' पर-प्रेत-लोकः, लोकांतरं; 'of this w.' ऐहिक; 'of the next w.' पारत्रिक-आमुष्मिक-पारलौकिक- (की *f.*); 'you are my all the w.' त्वं मम जीवितसर्वस्वीभूतः; 'renounce the w.' संन्यस् 4P, वैराग्यं भज् 1U; 'aversion to w.' वैराग्यं; 'knowing the ways of the w.' लौकिकज्ञ (S. 4); 'snares of the w.' मोहपाशः, मायाजालं-चक्रं. —WORLDLY, *a.* लौकिक; 'w. sages' लौकिकाः साधवः; (*s.*) in comp; 'w. tie' संसारतंतुः-निबंधनं, भवपाशः. 2 ऐहिक, सांसारिक, ऐहलौकिक, प्रापंचिक. 3 (W.-minded), ऐहिकदृष्टि-बुद्धि, संसारनिष्ठ, विषयासक्तचित्त, प्रपंचासक्त; 'w. wise' संसारज्ञानिन्; 'w. wisdom' संसारज्ञानं, व्यवहारज्ञानं. —INESS, *s.* संसारनिष्ठा, प्रपंच-विषय-आसक्ति *f.* —WORLDLING, *s.* *See* above; SENSUALIST also.

WORM, *s.* कृ(कि)मिः (in the stomach also), कीटः-टकः; 'w.-disease' कृमिरोगः; 'destroying w. s' कृमिहर, कृमिघ्न. —Y, *a.* कृमिल, कृमिमय (यी *f.*), कृमिकुलचित. 2 कृमिभाक्षित-निष्कुषित.

WORRY, *v. t.* प्र-,बाध् 1 A, अर्द् 1 P or c., आयस् c., क्लिश् c., पीड् 10, प्र-हृ 1 P.

WORSE, *a.* निकृष्टतर, अधिकदुष्ट, पापीयस्, दुष्ट-खलतर. 2 अधिकरुग्ण, or by वृध् 1 A; 'she is getting w. day by day' अनुदिवसं तस्या विपर्ययो दृश्यते or तस्या विकारो वर्धते एव; 'you are none the w. for it' न तर्हि प्रागवस्थायाः परिहीयसे (Mal. 4). —*adv.* कु, दुष्टतया; ex. by (*a.*).

WORSHIP, *v. t.* पूज् 10, उपास् 2 A, उप-स्था 1 A, अभि-,अर्च् 1 P, 10, आ-राध् c., भज् 1 U, सेव् 1 A, नमस्यति (D.). —*s.* पूजा, उपासना-नं, अर्चा, अर्चनं-ना, आराधनं, नमस्या, सपर्या, अपचिति *f.*, अर्हणा. 2 (As a title) देवः, महाराजः. —PER, *s.* पूजकः, अर्चकः, उपासकः, भक्तः,-जनः, आराधकः, सेवकः; 'w. of *Siva*' शैवः; 'w. of *Vishnu*' वैष्णवः.

WORST, *a.* दुष्टतम, पापिष्ठ, निकृष्टतम, कष्टतम. —*s.* कष्टतमावस्था, कष्टतमो भागः. —*v. t.* Humble, Subdue, q. v.

WORSTED, *s.* और्णसूत्र-तंतुः.

WORTH, *s.* अर्घः, मूल्यं; *See* VALUE. 2 गुणः, उत्कर्षः, सारवत्ता. —*a.* अर्घ, मूल्य, अर्ह in comp.; ex. by pot. pass. part. or अर्ह 1 P; 'w. considering' विचारार्ह, विचारमर्हति, विचार्य; 'w. much' बहुमूल्य; 'w. little' अल्पार्घ; 'w. while' सांप्रत, उचित, श्रमार्ह. —LESS, *a.* निर्गुण, गुणहीन, निरर्थक, असार, अकिंचित्कर (री *f.*), सार-गुण-हीन, अल्पमूल्य, तृणप्राय, अधम, कुत्सित; *See* MEAN; oft. by अ in comp., अवैद्य, अपात्र 'a w. object'. —WORTHY, *a.* योग्य, उचित, अर्ह, सदृश, अनुरूप, or by pot. pass. part. or अर्ह; 'a pupil w. of the name' परमार्थतः यः शिष्यः, यः शिष्य-नामार्हः; 'having a husband w. of her' अनुरूपभर्तृगामिनी (S. 1); 'a w. object' पात्रं, सत्पात्रं, गुणास्पदं. 2 आर्य, मान्य, पूज्य, भगवत्. 3 गुणिन्, गुणवत्, गुणोपेत. —*s.* मान्यजनः, आर्यः, जनः, सज्जनः. —ILY, *adv.* योग्यतया, उचितं, यथार्थं, उपपन्नं. —INESS, *s.* योग्यता, अर्हता, गुणः, पात्रता.

WOULD, *See* under WILL.

WOUND, *s.* व्रणः, क्षतं, क्षति *f.*; अरुष् *n.*, ईर्म, आघा-

तः, प्रहारः; 'a w. in the flesh' त्वग्व्रणः; 'fresh w.' आर्द्रक्षतं, सद्योव्रणः. -v. t. व्यथ् 4 P, क्षण् 8 P, तुद् 6 P, आ-अभि-हन् 2 U, क्लिश् 5 P, व्रण् 10, भिद्-छिद् 7 P, वि-दृ 9 P; *See* OFFEND, HURT. -ED, a. क्षत, व्रणित, भिन्न, विद्ध, भिन्नदेह; 'greatly w.' क्षतविक्षत; 'mortally w.' भिन्नमर्मन्.

WRANGLE, v. i. *See* QUARREL.

WRAP, v. t. आ-वृ 5 U, आ-परि-वेष्ट् 1 A or c., अव-गुंठ् 10, आच्छद् 10. -PED, a. वेष्टित &c.; कोशीकृत, कोशस्थ. -PER, s. प्रावारः, प्रावरणं, अवगुंठनं, आ-,वेष्टनं, पुटः-टं, कोशः-षः, आच्छादनं, पिधानं.

WRATH,-FUL, *See* INDIGNANT &c.

WREAK, v. t. (revenge) सिध् c.-साध् c. (साधयति), शुध् c., निर्यत् 10; 'w. ing revenge' वैरसाधनं-निर्यातनं; 'w. anger upon one' कोपसांत्वनं कृ, क्रोधं शम् c.

WREATH, s. माला, स्रज् f., माल्यं, हारः, उत्पीडः, दामन् f. n., आवलि-ली f.; *See* GARLAND; 'w. of smoke' धूमस्य उत्पीडः. -WREATHE, v. t. ग्रंथ् 9 P, सूत्र् 10, गु(गुं)फ् 6 P, सं-नह् 6 P, 10. -ED, a. स्रगन्वित, माल्यवत्, सूत्रित.

WRECK, v. t. (नावं &c.) भंज् 7 P, नश् c., उच्छिद् 7 P, भिद् 7 P. -v. i. भंज् pass. -s. पोतभंगः, यानभंगः, नौव्यसनं. 2 भग्नपोतः (portion w.-ed) भिन्ननौः. 3 उच्छेदः, भंगः, नाशः.

WRENCH, WREST, v. t. संपीड्य ग्रह् 9 P, बलात् आकृष् 1 P or आच्छिद् 7 P, अप-हृ 1 P, आच्छिद्य ग्रह्. -s. बलादाकर्षणं.

WRESTLE, v. i. मल्लयुद्धं-बाहुयुद्धं-कृ 8 U, बाहू-बाहवि युध् 4 A. -ER, s. मल्लः, बाहुयोधः-धी. -ING, s. बाहु-मल्ल-युद्धं, मल्लक्रीडा-युद्धं.

WRETCH, s. दुरात्मन् m., दुर्जातः, पापः, पापिष्ठः, जाल्मः, हताशः, नराधमः, चंडालः, खलः. 2 मंद-हत-भाग्यः, वराकः, अधन्यः, दीनः, तपस्विन्. -ED, a. दीन, वराक (की f.), अधन्य; gen. ex. by हतक affixed, दग्ध pr.; दग्धोदरं, मदनहतकः &c.; हताश; दुर् pr.; 'w. state' दुर्दशा. 2 निकृष्टतम, जघन्य. 3 दुःखभाज्, अतिदुःखित. -EDLY, adv. दीनवत्, दीन in comp.; 'w. dressed' दीनवेष; *See* MISERABLE.

WRIGGLE, v. t. इतस्ततः चल् c.

WRING, v. t. (बलवत्) आकुंच् c., सं-पीड् 10; 'w.-ing his hands in grief' दुःखात् हस्तं हस्तेन निष्पेषयन्; 'w. off' बलात् निष्कृष् 1 P or निर्हृ 1 P; 'w. out' निष्पीड्य ग्रह् 9 P, निष्कृष्, बलवत् निःसृ c. or निर्गम् c.

WRINKLE, s. वलि-ली f., भंगः, रे(ले)खा, चर्मलेखा-भंगः, चर्मसंकोचः. -v. t. चर्म-त्वच्-संकुच् 1 P or सं-हृ 1 P. -a. वलिभ-न, वलीमत्. -ED,-Y, a. रेखांकित, भंगुरवत्.

WRIST, s. मणिबंधः-धनं, प्रकोष्ठः.

WRITE, v. t. लिख् 6 P, (in all senses), पत्रे आरुह् c. or नि-विश् c. 2 प्रणी 1 P, रच् 10, ग्रंथ् 9 P, निर्मा 3 A, 2 P, नि-प्र-बंध् 9 P. -ER, s. लेखकः, लिपिकारः, लिख् in comp. 2 प्रणेतृ m., ग्रंथकृत्-कारः, रचकः, निर्माता. -ING, s. लेखः, लेख्यं, लिखितं, पत्रं, लेख्यपत्रं; 'committed to w.' पत्रारूढ, लेख्यार्पित, पत्रे-निवेशित. 2 (Art of w.) लिपि-वि f., लि(ले)खनं. 3 रचना, निर्माणं, प्रणयनं. 4 अक्षरसंस्थानं-रचना-विन्यासः.

WRITHE, v. i. (दुःखात्) संकुच् 1 P (limbs &c.) or आकृष् 1 P; *See* SMART.

WRONG, a. अन्याय्य, अधर्म्य, न्यायविरुद्ध, अयथान्याय; oft. by उत्-कु pr.; 'w. road' विमार्गः, उत्पथः, कुमार्गः. 2 अयुक्त, अनुचित, अनुपपन्न, अनर्ह. 3 भ्रांत, मिथ्या, अयथार्थ, सदोष, वितथ, असत्य, अनृत; 'you are w.' मिथ्या-अनृतं-भ्रांतिमूलकं-ते वचः; 'this is not w.' नैष दोषः. -s. अन्यायः, अधर्मः. 2 अपकारः, निकृति f., अपराधः. 3 भ्रांति f., भ्रमः, अयाथार्थ्यं, असत्यता. 4 दोषः; 'in the w.' सदोष, भ्रांत, भ्रांतियुक्त; 'yourself are in the w. here' अत्र तवैव दोषः. -v. t. नि-अप-कृ, वि-प-कृ, अपराध् 4 P, (with gen. or loc.). 2 मिथ्यादोषं निक्षिप् 6 P or न्यस् 4 P; 'w.-doer' अपराधिन्, अपकारकः. -FUL, a. अन्याय्य, दुष्ट. -FULLY, adv. अन्यायतः, अन्यायेन. 2 दुष्टतया. -LY, adv. मिथ्या, अयुक्तं, अन्यथा, अवितथं. 2 अन्यायतः, अयथान्यायं, अन्यायेन, अधर्मेण; भ्रांत्या, &c.

WROTH, a. *See* ANGRY.

WRY, a. वक्र. -NESS, s. वक्रता. 2 विकृतं, विकृति f.

X

XANTHIPPE, s. कैकेयी, कर्कशा, वक्रशीला.

Y

YACHT, s. केलिपोतः, क्रीडानौ f.

YAK, s. चमरः (री f.).

YAM, s आलु(रु)कं.

YARD, s. अंगनं, प्रांगणं, चत्वरं, अजिरं. 2 गजः. 3 कूपकाष्ठं.

YARN, s. सूत्रं, (और्णं-) सूत्रं-तंतुः.

YAWN, v. i. वि-जृंभ् 1 A, ज(जं)भ् 1 A.

-ING, *s.* जृंभः-भा, वि-,जृंभणं, वि-,जृंभिका-जृंभितं. -ER, *s.* वि-,जृंभकः.

YEA, *adv.* बाढं, ओम्; *See* YES. 2 अपरं च, अपि च.

YEAR, *s.* वर्षः-र्षं, सं-,वत्सरः, अब्दः, हायनः, समा *f.* (pl.), शरद् *f.*, संवत् *ind.*; '12 y.s old' द्वादशवार्षिक (की *f.*); '2 y.s old' द्विहायनी (बाला), 'approached their 16th y.' षोडशवर्षात्मका बभूवुः, षोडशवर्षवयोवस्थामस्पृशन्; 'this or current y.' वर्तमानवर्षं, ऐषमस्; 'last y.' गतवर्षं, परुत् *ind.*; 'the y. before last' परारि *ind.*; 'next y.' उत्तर-आगामि-वत्सरः; परवर्षं; 'half-y.' षण्मासं, वर्षार्धं; 'throughout the y.' आवर्षांतात्; 'y. after y.' प्रतिवर्षं, वत्सरे वत्सरे. -LY, *a.* वार्षिक-सांवत्सरिक-आब्दिक-(की *f.*), प्रति°; 'half-y.' अर्धवार्षिक-षाण्मासिक (की *f.*). -*adv.* वर्षे वर्षे, प्रतिवर्षं, प्रतिसंवत्सरं &c.

YEARN, *v. i.* स्पृह् 10; स्निह् 4 P; *See* LONG; उत्कंठ् 1 A (उत्कंठते च युष्मत्सन्निकर्षस्य U. 6), उत्सुकायते-वत्सलायते (D.); नूनमनपत्यता मां वत्सलयति (S. 7) 'causes me to y. towards the child'. -ING, *s.* स्पृहा, उत्कंठा, औत्सुक्यं, वात्सल्यं.

YEAST, *s.* सुरामंडः, कारोत्तरः; किण्वं, नग्नहूः (*m.*).

YELL, *v. i.* आ-उत्-क्रुश् 1 P, उच्चैः आ-क्रंद् 1 P; *See* SCREAM. -*s.* उत्क्रोशः, चीत्कारः,-शब्दः, महा-दीर्घ-शब्दः.

YELLOW, *a.* पीत, पीतल, हरिद्राभ, गौर (री *f.*), पीतवर्ण. -ISH, *a.* आपीत, हरिद्राभ; 'y.-white' पांडुर, आपांडु. -NESS, *s.* पीतवर्णः, पीतता.

YELP, *See* BARK.

YEOMAN, *s.* क्षेत्रपालः, गृहपतिः; 'y.-ly service' उपयुक्ता-बहुमाननीया-सेवा.

YES, *adv.* बाढं, आं, अथ किं, तथा, एवं; एवमेव; sometimes by repeating verbs; 'saying y.' तथेति उक्त्वा.

YESTER, *a.* ह्यस्तन (नी *f.*), ह्यस्त्य. -YESTERDAY, *adv.* ह्यः, पूर्वेद्युः; 'of y.' ह्यस्तन (नी *f.*). -YESTERNIGHT, *s.* गतरात्रिः. -*adv.* अतीतायां रात्रौ.

YET, *conj.* तथापि (correl. of यद्यपि), not ex. when y. comes after अपि (पुष्पवत्यपि पवित्रा). -*adv.* अद्यापि, अधुनापि, इदानीमपि. 2 (With adjectives) by अधिकं, परं in comp.; 'y. more glorious' अतोधिकतरं तेजस्विन्.

YIELD, *v. t.* प्र-,दा 1 P, 3 U; 'y.ing fruits and flowers' फलपुष्पदा (भूः); प्र-,सू 2, 4 A, उत्पद् c., जन् c. (जनयति). 2 त्यज् 1 P, उत्-वि-सृज् 6 P, हा 3 P. 3 प्र-दा, वि-तु 1 P, (with loc.). -*v. i.* वशं गम् 1 P or या-इ 2 P, वशीभू 1 P. 2 शरणं प्रपद् 4 A or गम् &c. 3 (To another's opinion) अनु-मन् 4 A, निर्बंध-स्वाग्रहं-त्यज्, अनुरुध् 4 A; 'y. to a superior foe' वैतसीं वृत्तिं आश्रि 1 U (R. IV. 35); 'y.ed to his prowess' विक्रमशालिनस्तस्य वशं ययौ; 'does not y. to Sachi in majestic splendour' ओजस्वितया न परिहीयते शच्याः (V. 3). -*s.* उत्पन्नं, फलं, लाभः. -ING, *a.* फलद-प्रद-दायिन्. 2 अनुरोधिन्, अनुवर्तिन्, अनुकूल.

YOKE, *s.* युगः-गं, धुर् *f.*, (धुरा in comp.); 'fit for the y.' युग्य, धुर्य, प्रासंग्य; (fig.) 'being under a foreign y.' परवशता, पारतंत्र्यं. 2 युगं, युगलं, युग्मं. 3 योक्त्रं बंधनं, आबंधः. -*v. t.* युज् 10, योक्त्रयति (D.), सं-गम् c.; 'y.ed to an unfit husband' अननुरूपपतिसंगता; 'y.-fellow' सहचरः (री *f.*).

YOLK, *s.* अंडमध्यं, पेशीगर्भः.

YON, YONDER, *a.* अदस्, इदम्, (*pron. a.*) पुरो दृश्यमान, नातिदूरस्थ. -*adv.* नातिदूरं-रे, स्तोकांतरे, अग्रतः.

YORE, (of) पुरा, पूर्वं; *See* FORMERLY.

YOU, यूयं. -YOUR, *a.* त्वदीय, युष्मदीय, तावक-यौष्माक (की *f.*), यौष्माकीण.

YOUNG, *a.* युवन् (यूनी-युवति-ती *f.*), तरुण-(णी *f.*), बाल (of trees &c. also), अल्पवयस्, कौमार (री *f.*), अभिनववयस्क; (of men) oft. ex. by दारकः, कुमारः in comp.; 'y. sage' मुनिकुमारः-रकः, ऋषिदारकः; 'y. warrior' वीरपोतः, बालवीरः, oft. by (*s.*) in comp., *See* below. -*s.*, 'y. one' शावः-वकः, अर्भकः, अपत्यं, पोतः-तकः, शिशुः, डिंभः, पृथुकः; 'y. of an elephant,' 'y. elephant' गजशिशुः, कलभः. -ER, *a.* यवीयस्, कनीयस्, अनुजन्मन्; 'y. brother or sister' अनुजः-जा, अवरजः-जा, अनंतरजः-जा. -YOUNGSTER, *s.* बटुः, अर्भकः, कुमारकः, बालः. -YOUTH, *s.* यौवनं, तारुण्यं, पूर्वं-नवं-प्रथमं-वयः, कौमारं-रकं; 'being in the prime or heyday of her y.' प्रथमे वयसि वर्तमाना, नवयौवना; (state of y.) यौवनदशा-पदवी, तारुण्यावस्था, यौवनकालः &c. 2 (Young man) युवन् *m.*, तरुणः, बालः, कुमारः-रकः बालजनः, किशोरः. -FUL, *a.* तरुणवयस्क; by पोतः, बालः, in comp., *See* (*a.*). -FULNESS, *s.* तारुण्यं.

Z.

ZANY, *s.* भंडः, वैहासिकः, विदूषकः.

ZEAL, *s.* उत्साहः, औत्सुक्यं, सोत्साहता, व्यग्रता, आस्था, अत्युत्कंठा, उद्योगः, उत्तापः, उच्चंडता, अत्यधुरा-

ग:. -ous, *a.* सोत्साह, अति-,उत्सुक, उत्साहवत्, व्यग्र, चंड, तीक्ष्ण, अत्यासक्त, उद्युक्त, तीक्ष्णकर्मन् *m.* -OUSLY, *adv.* औत्सुक्येन, सोत्साहं, व्यग्रतया. -ZEALOT, *s.* अतिव्यग्र:, सोत्साह:.

ZEBRA, *s.* वनगर्दभ:-रासभ:.

ZENITH, *s.* खमध्यं, शिरोबिंदु:, खस्वस्तिकं; (fig.) 'z. of prosperity' ऐश्वर्यस्य परा काष्ठा-परा कोटि:; 'z. distance' नतं.

ZEPHYR, *s.* मंदवायु:-वात:, मृदु-सुखस्पर्श-पवन:.

ZERO, *s.* शून्यं, खं, बिंदु:.

ZEST, *s.* आ-,स्वाद:, अभिरुचि *f.* 2 Zeal, q. v.

ZIGZAG, *a.* वक्र, कुटिल, जिह्म, कुटिलगति.

ZINC, *s.* दस्ता.

ZODIAC, *s.* ज्योतिश्चक्रं, भूचक्रं, मंडलं, राशिच 'a sign of the z.' राशि:, लग्नं.

ZONE, *s.* मेखला, रशना(स)ना, कांची; *See* GIRDI 2 मंडलं, (भू-)वलय:-यं, कटिबंध:.

ZOOGRAPHY, *s.* प्राणिवर्णनं.

ZOOLOGY, *s.* प्राणिविद्या-शास्त्रं, जीवादिशास्त्रं.

ZOOTOMY, *s.* प्राणिव्यवच्छेद:.